# वासवदत्ता ।

महाकवि-सुबन्धुविरचिता ।

पण्डितकुलपतिना, वि, ए, उपाधिधारिणा

श्रीमज्जीवानन्द-विद्यासागर-भट्टाचार्य्येण

विरचितया

तथा

तदात्मजाभ्यां

पण्डित-श्री-आशुबोध-विद्याभूषण-

पण्डित-श्री-नित्यबोध-विद्यारत्नाभ्यां

प्रतिसंस्कृतया च व्याख्यया समलङ्कृता प्रकाशिता च ।

द्वितीय संस्करणम्

कलिकातामहानगर्य्यां

वाचस्पत्ययन्त्रे

मुद्रिता ।

ई १८९३ ।

सर्वे स्वत्वं संरक्षितम् ।

मूल्यं राजतमुद्रासमम् ।

# वासवदत्ता ।

महाकवि-सुबन्धुविरचिता ।

पण्डितकुलपतिना, वि, ए, उपाधिधारिणा

श्रीमज्जीवानन्द-विद्यासागर-भट्टाचार्य्येण

विरचितया

तथा

तदात्मजाभ्यां

पण्डित-श्री-आशुबोध-विद्याभूषण-

पण्डित-श्री-नित्यबोध-विद्यारत्नाभ्यां

प्रतिसंस्कृतया च व्याख्यया समलङ्कृता प्रकाशिता च ।

द्वितीय संस्करणम्

कलिकातामहानगर्य्यां

वाचस्पत्ययन्त्रे

मुद्रिता ।

इं १८३३ ।

सर्वे स्वत्वं संरक्षितम् । मूल्यं राजतमुद्रात्रयम् ।

14796
891.267
Sh 93V
14796

प्रकाशक— { पण्डित-श्रीआशुबोधविद्याभूषण
तथा
पण्डित-श्रीनित्यबोधविद्यारत्न ।

प्राप्तिस्थान— { २न०, रमानाथ मजुमदार ष्ट्रीट्, आम्हार्ष्ट-
ष्ट्रीट् पोष्ट-अफिस । कलिकाता ।

प्रिण्टर—वि, वि, मुखर्जी ।
२ न०, रमानाथ मजुमदार ष्ट्रीट्, कलिकाता ।

1979

# वासवदत्ता।

करबदरसदृशमखिलं भुवनतलं यत्प्रमादतः कवयः।
पश्यन्ति सूक्ष्ममतयः सा जयति सरस्वती देवी॥
खिन्नोऽसि मुञ्च शैलं विभृमो वयमिति वदत्सु शिथिलभुजः।
भरभुग्नविततबाहुषु गोपेषु हसन् हरिर्जयति॥

---

प्रारिप्सितस्य निरन्तरायपरिसमाप्तये कृतं मङ्गलं शिष्यशिक्षार्थं निबध्नाति। करबदरेति। यत्प्रमादतः सूक्ष्ममतयः कवयोऽखिलं समस्तं भुवनतलं भुवनस्वरूपं करे बदरं बदरीफलम। फले लुगिति लुक्। तत्सदृशं पश्यन्ति। सा सरस्वती देवी वागधिदेवता जयति सर्वोत्कर्षेण वर्तते। स्वरूपानुद्योतलमिति रुद्रः। अधःस्वरूपयोरस्तो नित्यमरः। आर्याछन्दसम। लक्षणं तत्र सप्तगणा गोपेता भवति नेह विषमे जः। ऽयं नलघू वा प्रथमेऽर्धे नियतमार्यायाः। षष्ठे द्वितीयलात् परके नले मुखलाच्च तिपदनियमः। चरमेऽर्धे पञ्चमके तस्मादिह भवति षष्ठो लः इति लक्षणात। खिन्नोऽसीति। हे कृष्ण खिन्नोऽसि। गोवर्द्धनधारणादिति भावः। शैलं गोवर्द्धनं मुञ्च वयं विभृम इति गोपेषु वदत्सु शिथिलभुजः श्लथबाहुः। भरेण गिरिभरेण भुग्नाः कुटिला बाहवो येषां तादृशेषु सत्सु हसन् हरिः कृष्णो जयति। भुग्नो कौटिल्ये। खोटितयेति निष्ठानत्वम। यस्य च भावेन भावलक्षणमिति गोपेष्वित्यत्र सप्तमी। एकेन त्वयेदं धृतं विमलाभिर्न धार्यत इति भगवतया वयमिति बहुवचनाभिधानमुद्दीपनविभावः। तथा च भरतः। विपरीतालङ्कारैर्विकृताचाराभिधानवेशैश्च। इति। भुजकौटिल्यमनुभावः। तथा च भरतः। विकृताकारैर्वाक्यैरङ्गविकारैश्च विकृतवेशैश्च। इति। *स्मितफुल्लाननलोचनम्। किञ्चिल्लक्षितदन्तायं हसितं तद्विदो

कठिनतरदामवेष्टनलेखासन्देहदायिनो यस्य।
राजन्ति वलिविभङ्गाः स पातु दामोदरो भवतः॥
स जयति हिमकरलेखा चकास्ति यस्योमयोत्सुकाभिहिता।
नयनप्रदीपकज्जलनिघृष्टतया रजतशुक्तिरिव॥
भवति सुभगत्वमधिकं विस्तारितपरगुणस्य सुजनस्य।
वहति विकाशितकुमुदो द्विगुणरुचिं हिमकरोद्योतः॥
विषधरतोऽप्यतिविषमः खल इति न मृषा वदन्ति विद्वांसः।

---

विदुः॥ इति भरतः। कृष्णविषयरतिरूपभावस्य छायरसोऽङ्गमिति रसवदलङ्कारोऽत्र। कठिनेति। कठिनतरं यद्दामवेष्टनं तेन लेखा रेखाभासां सन्देहदायिनो यस्य वलिविभङ्गास्त्रिवलिपङ्क्तयो राजन्ति। स दामोदरो भूतपूर्वगत्या दामोदरता। भवतो युष्मान् पातु। वलित्रिवलिटैत्ययोरिति विश्वः। दामोदरविषयरतिरूपभावस्य परार्थत्वात् प्रेयोऽलङ्कारोऽत्र। स इति। उमयोत्सुकादौत्कण्ठ्यात्। नयनं भालनेत्रं तदेव प्रदीपो दीपस्तस्य कज्जलनिघृष्टया तदीयकज्जलगर्हणेऽक्षया रजतशुक्तिरिव रौप्यशुक्तिरिव। कज्जलवटा इति भाषायाम्। निहिता व्यापिता। यश्च हिमकरलेखा चन्द्ररेखा चकास्ति स शिवा जयति। विशेषणद्वारा विशेष्यप्रतिपत्तिरिति हरो लभ्यते। अत्र सुभगमिता गुणः। यत्र विशेषणद्वारा विशेष्यलाभः सा सुभगम्मन्यत्वलङ्कारेश्वरः। उत्सुकशब्दोऽत्र भावप्रधानः। यद्वा। अस्यति बध्नातीत्यन्। उत्सुकस्यानुत्सुकान् उत्कण्ठितबन्धनकर्त्री। अयुक्तण्ठ्यादिकेति यावत्। अति अदि बन्धने। क्विप्। हिमकरलेखाविशेषणम्। यद्व उपादाने। सन्। अः प्रत्ययादित्यकारप्रश्लेषः। च शाम्भवित्र इति तु गणडस्य प्रमाद एव। औत्सुक्यनव्य इङ्गाररसस्य व्यभिचारिभावः। उत्सुका निहितेति क्वचित् पाठः। परोपकरणे सर्वथा यतनीयमिति खलान् प्रत्याह। भवतीति। विस्तारिता अनेकेषां श्रुतिपथं नीता परेषां स्वातिरिक्तानां गुणाः सरस्वतीलक्ष्मीक्षमादिगणिता येन तस्य सुजनस्य सुभगत्वं सौभाग्यमधिकं भवति। अनुपकारकस्यापि वर्णेश्वर्यं। विकाशितानि कुमुदानि येन सादृश्यः। अरत्नाधिक इत्यर्थः। हिमकरोद्योतस्य चन्द्रातपो द्विगुणरुचं च वर्धमानक्षीणापेक्षयाधिकां कान्तिं वहति। यथान्तरं शोऽलङ्कारः। उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः। प्रकाशो द्योत आतप इत्यमरः। विषधरत इति। विषधरतोऽपि सर्पादपि खलो दुर्जनोऽतिविषमोऽतिक्रूर इति विद्वांसः पण्डिता सर्वा

यदयं न कुलद्वेषो सकुलद्वेषो पुनः विशुनः ॥
अतिमलिने कर्त्तव्ये भवति खलानामतीव निपुणा धीः ।
तिमिरे हि कौशिकानां रूपं प्रतिपद्यते चक्षुः ॥
विध्वस्तपरगुणानां भवति खलानामतीव मलिनत्वम् ।
अन्तरितशशिरुचामपि सलिलमुचां मलिनिमाभ्यधिकः ॥
दुस्त इव भूतिमलिनो यथा यथा लङ्घयति खलः सुजनम् ।
दर्पणमिव तं कुरुते तथा तथा निर्मलच्छायम् ॥

---

मिथ्या न वदति अपि तु तथ्यमेव । यद्यसौऽर्थः सर्वैः न कृतं द्वेष्टुं शीलमस्य तादृक् । यथाऽपराधी तमेव दशति न तु तत्कुलद्वेष्टेत्यर्थः । विशुनो दुर्जनः पुनः सकुलद्वेषी । योऽस्य द्वेषविषयस्य सकुलस्यायं द्वेष्टेत्यर्थः । पक्षे न कृतो द्वेषो द्वेष्टा शत्रुर्येन सोऽयमिदः विशुनः कुलद्वेषी सकुलद्वेष्टा । विशुनो दुर्जनः खलः । धाशीविषो विषधर इति हलायुधः । समङ्गयोरर्थान्तरन्यासयोः सङ्करः । सामान्यं वा विशेषो वा तदन्येन समर्थ्यते । यत्र सोऽर्थान्तरन्यासः । अविशालिजुशामात्मन्यङ्गाङ्गित्वे तु सङ्करः ॥ अतिमलिन इति । खलानां विशुनानां धीर्बुद्धिरतिमलिने मतामनुपादेये कर्त्तव्ये कार्येऽतीवात्यन्तं निपुणा स्वविषयग्रहणपटुर्भवति । हि यतस्तिमिरेऽन्धकारे कौशिकानामुलूकानां चक्षू रूपं स्वविषयं प्रतिपद्यते गृह्णाति । यद्वा । रूपं विषयग्राहकत्वरूपं स्वभावं प्रतिपद्यते प्राप्नोति । रूपं स्वभावे सौन्दर्ये गुणादिपदभेदयोः । इति विश्वः । अतोवेत्यव्ययमुदाहरणेऽतिशये । महेन्द्रगुप्तालङ्कारव्याख्यायाहि कौशिक इत्यमरः । काव्यलिङ्गमलङ्कारः । समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम् । विध्वस्तेति । विध्वस्तपरगुणानां खलानामतीव मलिनत्वं भवति । अव्ययानामनेकार्थत्वादपि हेतौ । अपि यतोऽन्तरितशशिरुचां छादितचन्द्रकान्तीनां सलिलमुचाम् । हेतुगर्भम् । वर्षाकालिकमेघानां मलिनिमा । दृष्टान्तः । मालिन्यमधिकं भवति । परिकरालङ्कारः । अलङ्कारः परिकरः साभिप्राये विशेषणे । दुर्जनोऽन्यान् स्वोत्कर्षार्थं निन्दति तत्राभिनिवेशो व्यर्थ एवेति प्रदर्शयन्नाह । दुस्त इवेति । खलो भूतिमलिनो दुस्त इव यथा यथा सुजनं खट्टयत्यङ्कयति । पक्षे । घर्षयति । तं सुजनं दर्पणमिव तथा तथा निर्मलच्छायं सुच्छकान्तिं कुरुते । भूतिर्भस्मनि सम्पदि । दर्पणे मुकुरादर्शौ । छाया मूर्त्तिप्रिया कान्तिरिति विश्वमरः । पूर्णोपमा । साधर्म्यमुपमाभेदे । वर्त्तमानकालिकान् नृपतीन्

सा रसवत्ता विदुता नवका विलसन्ति चरति नो कं कः।
सरसीव कौर्त्तिशेषं गतवति भुवि विक्रमादित्ये॥
अविदितगुणाऽपि सत्कविभणितिः कर्णेषु वमति मधुधाराम्।
अनधिगतपरिमलाऽपि हि हरति दृशं मालतीमाला॥
गुणिनामपि निजरूपप्रतिपत्तिः परत एव सम्भवति।
स्वमहिमदर्शनमक्षोर्मुकुरतले जायते यस्मात्॥

---

स्वस्तवनायोग्यान् ध्वनयन् विक्रमादित्यं स्तौति। सा रसेति। विक्रमादित्ये राजनि सरसीव सरोवर इव कौर्त्तिशेषं गतवति विरामं प्राप्ते सति भुवि पृथिव्यां सा पुरुषान्तरेऽनुपलभ्यमाना रसवत्ता वीर्यवत्ता विदुता नष्टा। नवकाः कुत्सित इति कन्। कुत्सितनवराजा विलसन्ति विलासं कुर्वन्ति। अतः कः सकलः कं निर्लज्जं नो चरति न भक्षति। अत्यर्थं पीडयतीति यावत्। अराजन्वत्त्वादिति भावः। यद्वा। नवका अज्ञात इति कन्। अज्ञातनामगोत्रगुणा राजानो विलसन्ति। अतः को जनः कं व्यवहारं नो चरति न करोति। हेतुलुप्त एव। यद्वा। सा रसवत्ता शृङ्गारादिरसवत्ता गुणवत्ता वा ध्वनौ साभिलाषता वा विदुता। अतो नवका अनुकम्पायां कन्। अनुकम्पितनवीनक्षत्रयो विलसन्ति। गुणग्रहीतृभावेनाक्षदादीनां प्रधाररादित्येनेति भावः। अतः कलाहृक् पण्डितमन्यः कं मूर्खानं नो चरति न गच्छति नारोहति। अपि त्वारोहत्येव। पक्षे। सा रसवत्ता लवणवत्ता विदुता। अत एव वक्राः कङ्का भाषायां वकुला इति ख्याता न विलसन्ति। कङ्को लोहपृष्ठः कङ्कट इति ख्यातो नो चरति। यद्वा। सारसः पक्षिविशेषस्तद्वत्ता। रसवत्ता वा। शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः। अथ वक्र कङ्कः पुष्कराह्वस्तु सारसः। लोहपृष्ठस्तु कङ्कः स्यात्। कासारः सरसो सरः। कं शिरोऽम्बुनोः। सारसं सरसीरुहम्। इति षट्स्वामरः। चर गतिभक्षणयोः। सभङ्गाभङ्गश्लेषयोः संसृष्टिः। सेष्टा संसृष्टिरेतेषां भेदेन यदिह स्थितिः। अविदितेति। अविज्ञाता गुणा शील:प्रसादमाधुर्यरूपा यस्यास्तादृश्यपि सत्कविभणितिः कर्णेषु मधुधारां क्षौद्रधारां वमत्युद्गिरति। यद्वा क्षौद्रधारासङ्काटसनासुखमेवं सत्कविभणितिश्रवणात् कर्णयोः सुखनित्यर्थः। हि यतोऽनधिगतपरिमलाऽपि मालतीमाला दृशमनुवासयित्वा हृष्टं हरति। गुणिनामिति। गुणिनामपि निजरूपप्रतिपत्तिः स्वरूपज्ञानं परत एव परमादेव सम्भवति। तेन निर्गुणानां स्वरूपज्ञानं परमादेव किमाश्चर्यम्। यस्मा-

सरस्वतीदत्तवरप्रसादश्चक्रे सुबन्धुः सुजनैकबन्धुः।
प्रत्यक्षरश्लेषमयप्रबन्धविन्यासवैदग्ध्यनिधिर्निबन्धम्॥

अभूदभूतपूर्वः सर्वावनिपतिचक्रचारुचूडामणिश्रेणीशाण-कोणकषणनिर्मलीकृतचरणनखमणिर्नृसिंह इव दर्शितहिरण्य-

---

यतोऽस्मो: स्वमहिमदर्शनं स्वविकारदर्शनं मुकुरतले जायते। सर्वदर्शनक्षमयोर्नेत्रयोः स्वमदत्त्वदर्शनं दर्पणाधीनमेवेत्यर्थः। सरस्वतीदत्तेति। प्रगतः सादोऽस्यति प्रसादः। सरस्वतीदत्तेन वरेणाभीष्टेन प्रसादो विगतकार्श्यं: स्वीयाङ्गोक्तिविभावनानन्दनन्दित-त्वादित्यर्थः। यद्वा। सरस्वतीदत्तवरेण प्रसादः प्रसन्नता यस्य सः। सर्वोत्कटा सत-कृतिरिति प्रसन्नतायाविशिष्टत्वम्। अनुमेवाशनमभिलाषाय वाणमाघ्रमाणि। कवीनामगल-दृशौ नूनं वासवदत्तया। अक्षीव पाण्डुपत्राणां गतया कर्णिकारताम्॥ इति। प्रसादेषु प्रसन्नतेश्वरः। वरोऽभीष्टो देवतादेवरो जामातृविड्वयोः॥ विश्वः। प्रसन्नतेश्वरः। प्रसादोऽनुग्रहे काव्य-पाण्डुस्वाच्यप्रसादयोः। इति हेमचन्द्रः। सुजनैकबन्धुः सज्जनानामद्वितीयो भ्राता। प्रत्यक्षरश्लेषमयो यः प्रबन्धस्तस्य विन्यासे रचनायां वैदग्ध्यं नैपुण्यं तस्य निधिः सुबन्धुनामकः कविर्निबन्धं चक्रे। व्यादारान्तरविष्टमनसो ममाख्य निर्माणे प्रवृत्तिर्न त्वयवन्मनःपणिधानपूर्वकमेवेति मुकुरतो ध्वनयितुं लिटः प्रयोगः। उपजातिवृत्तम्। अनन्तरोदीरितलक्षभाजौ पादौ यदीयावुपजातयस्ताः। इति लक्षणात्। अनुप्रासेनाह। अभूदित्यादि। चिन्तामणिनाम राजाऽभूदित्यन्वयः। पूर्वं भूतो भूतपूर्वः सुप्सुपेति समासः। भूतपूर्वे चरडाति निर्देशाद्भूतशब्दस्य पूर्वनिपातः। षष्ठ्यन्तसमासः। अभूतपूर्वः। तादृक् पूर्वं कोऽपि नाभूदित्यर्थः। सर्वेषामुर्वीपतीनां चक्रं समूहस्तस्य चारुचूडामणिश्रेणी पङ्क्तिः सैव शाणो निकषस्तस्य कोणोऽग्र तस्मिन् कषणेन निर्मलीकृतचरणनखो मणिरिवेत्युपमितं व्याघ्रादिभिः सामान्यप्रयोग इति समासो व्याघ्रादेराकृतिगणत्वात्। स यस्य सः। जनावने समूहे च दम्भे भेदरथाङ्गयोः। अस्त्रभेदे च सेनायां चक्रं चापि विदुर्बुधाः। इति रन्तिदेवः। चूडामणिः शिरोरत्नम्। वीथ्यालिरावलिः पङ्क्तिः श्रेणी। निकषः कष इति विश्वमेदः। श्रेणिरिति ह्रस्वपाठे तु चरमभागे च पङ्क्तौ च श्रेणिरुक्ता मनीषिभिः। इति विश्वः। छेकानुप्रासः। स्यात् पादपदवर्णानामावृत्तिः सदृशायुता। अनेयदः स्याच्छेकानाम्। इति। ओजो गुणः। ओजः समासभूयस्त्वमिति। वैदर्भी रीतिः। एका भूयःसमासा स्यादेतां निगु

**कश्यिपुच्छेत्रदानविस्मयः कृष्ण इव कृतवसुदेवतर्पणो नारायण इव सौकर्यसमासादितधरणिमण्डलः कंसारातिरिव जनितयशोदानन्दसमृद्धिरानकदुन्दुभिरिव कृतकाव्यादरः सागरशायीवानन्तः**

---

वाग्भटालङ्कारः। काव्यप्रकाशरीत्या उक्त्यनुप्रासः। एवमाद्यमवगन्तव्यं परं इति। काव्यादर्शरीत्या वक्ष्यमाणाः समासोपमाः। सदृशशब्दवाच्यत्वात् तत्समासोपमा मता। वालिवोद्यानमालेयं बालकाननशोभिनी। इति। अलङ्कारशेखररीत्या श्लेषोपमेयम्। पदश्लेषनिबन्धनं साम्यं श्लेषोपमा। उक्तमेवोदाहरणं मतान्तरे। श्लेषोपमासङ्करेणाह। नृसिंह इव दर्शितो हिरण्यकश्यिपोर्दैत्यस्य क्षेत्रदानेन शरीरखण्डनेन विस्मयो येन सः। दोऽवखण्डने। पक्षे हिरण्यं सुवर्णं कश्यिपुर्भोजनाच्छादने क्षेत्रं केदारक्षेत्रं दानेन वितरणेन श्रेयं प्राप्तवत्। एवमन्योऽपि। कश्यिपुरुच्छ्रयमाच्छादनं क्षयनिलयमरः। अन्नवस्त्रदविषाप्रद इति भावः। क्षेत्रं शरीरे केदारे सिद्धस्थानक्षत्रयोः। इति विश्वप्रकाशः। वाच्यभेदेन भिन्ना यद्युगपद्भावसूत्रः। श्लिष्यन्ति शब्दाः श्लेषोऽनेकार्थवादिभिरिष्टधा। कृष्ण इव कृतं वसुदेवस्य तर्पणं हवो रक्षणं वा येन वसुत्वात् वा कंसाद् वा धातूनामनेकार्थत्वात् रक्षणार्थस्यापि:। तर्पणं प्रीणनावनतिलयमरः। पक्षे कृतं वसुनिर्द्रव्यैर्देवानां तर्पणं प्रीणनं येन। यद्वा कृतं वसूनां ध्रुवादीनां देवानां च तर्पणं येन। ध्रुवो धरश्च सोमश्च आपश्चैवानिलोऽनलः। प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ स्मृताः। नारायण इव सौकर्येण सूकरभावेन समासादितमुद्धृतं धरणिमण्डलं येन। ब्राह्मणादित्वाद्भावे ष्यञ्। तालव्या अपि दन्त्याः स्युः सान्वसूकरपांसवः। इति प्रकारभेदः। पक्षे सौकर्येणानायासेन समासादितमाक्रान्तम्। सौकर्यं स्यादनायासे क्रियायां सूकरस्य चेति विश्वप्रकाशः। कंसारातिरिव जनिता यशोदानन्दयोः समृद्धिर्हर्षेराधिक्यं येन। यशोदायाश्चानन्दसमृद्धिर्यया। पक्षे आनन्दकारिणी समृद्धिः प्राकपार्थिवादिः। जनिता यशोदा कौत्सिप्रदानन्दसमृद्धिर्येन। यशोदातिरिक्ते नित्यौत्सि इति ध्वनिः। आनकदुन्दुभिरिव कृतः काव्यायां पृतनायाः दरत्राणो येन। यद्वा। कृतकाव्यो तत्पतौ तयोरादरो यस्येति गुरुचरणाः। वसुदेवोऽस्य जनकः स एवानकदुन्दुभिः। इति विष्णुप्रकरणेऽमरः। दरत्राणो भीतिर्भीरिति च। काव्यं यत्ये पुमान् युक्ते काव्याख्या पृतना मता इति विश्वः। पक्षे कृतः काव्ये लोकोत्तरवर्णनरूपे कर्मण्यादरो येन। यद्वा कृतकाव्यानां कवीनामादरो यस्मात्। यथाऽसौ समभिव्यक्तया कवीन् मानयति तथा नान्य

भोगिचूड़ामणिमरीचिरञ्जितपादपद्मो वरुण इवाग्रान्तरक्षणो-
ऽगस्त्य इव दक्षिणाग्रप्रसाधको जलनिधिरिव वाहिनीग्रतनायकः
समकरप्रचारश्च हर इव महासेनानुगतो निवर्तितमारश्च मेरु-
रिव विबुधालयो विश्वकर्माश्रयश्च रविरिव च्छायादानप्रियश्छाया-
सन्तापहरश्च कुसुमकेतुरिव जनितानिरुद्धसम्पदतिसुखप्रदश्च

इति भावः। सागरश्चायम्। नारायण इव। अनन्तभोगी शेषस्तस्य चूड़ामणिमरी-
चिभी रञ्जितपादपद्मः। ग्रंथोऽनन्तः इत्यमरः। पक्षेऽनन्ता अनेके भोगिनो विलासिनः।
न केवलं स्वभृत्यैः सेव्योऽपि तु मणडैः पौरैरपीति भावः। वरुण इव। आग्रा पश्चिम-
दिक् तदन्ते रक्षणं यस्य। दिशस्तु वक्त्रम् काष्ठा आशाश्चेत्यमरः। पक्षेऽग्रान्तमविरतं
रक्षणं प्रजापालनं यस्य। अगस्त्य इव दक्षिणाग्रा दक्षिणादिक् तस्याः प्रसाधकोऽलङ्कर्ता।
पक्षे दक्षिणाया आग्रा तृष्णा। आग्रा तृष्णादिशोः प्रोक्तेति विश्वप्रकाशः। इहा दक्षि-
णानां कुमुखानां परच्छन्दानुवर्त्तिना वाग्राप्रसाधकः। दक्षिणः सरलस्वामे परच्छन्दानु-
वर्त्तिनि। वाच्यवद्दक्षिणावाचौ यज्ञदानप्रतिग्रहयोः। इति विश्वप्रकाशः। जलनिधि-
रिव। वाहिनीग्रतस्य नदीग्रतस्य नायकः। मकराणां जलजन्तुविशेषाणां प्रचारेण
सहितस्ताहक्। अथ यादांसि जलजन्तवः। तद्भेदाः शिशुमारोष्ट्रगड्वौ मकरादयः।
इत्यमरः। पक्षे वाहिनीग्रतस्य सेनाग्रतस्य नायकः प्रभुः। समो हिताहितसाधारणः
करस्य राजग्राह्यभागस्य प्रचारो यस्य। यद्वा समः समश्लोकः करस्य हस्तस्य प्रचारो
यस्य। तरङ्गिण्यां च सेनायां वाहिनी परिकीर्त्तिता। इति विश्वः। बाहुदण्डाग्रयोः
करा इत्यमरः। हर इव महासेनेन कार्त्तिकेयेनानुगतः। निवर्त्तितो मारः कामो येन।
कार्त्तिकेयो महासेनः। मदनो मन्मथो मार इत्युभयत्रामरः। पक्षे महत्या सेनयाऽनु-
गतः। निवर्त्तितो मारयतीति मारो विघ्नो येन। मृङ् प्राणत्यागे णिजन्तादच्। मेरुरिव
विबुधानां देवानामालयः। विश्वकर्मा सूर्यो देवशिल्पी वा तदाश्रयः। विश्वकर्मा देव-
शिल्पी विश्वकर्मा दिवाकरः। इति विश्वः। पक्षे विबुधानां पण्डितानामालयः। विशेषां
जनानां कर्म शिल्पादि तदाश्रयः। रविरिव छायदा रात्रिर्न प्रियेष्टा यस्य। छायाया
निशाख्यायाः सन्तापहरश्च। न प्रियेत्यत्र नञ्कथेत्यादिवन्निषेधार्थको न शब्दः। पक्षे क्षणेषूत्स-
वेषु दानं प्रियं यस्य। छायया स्वकान्त्या सन्तापहरः। एतल्लावण्यस्याह्लादजनकत्वादिति
भावः। अथ वप उप्तौ मद हर्षे वत्सुः। छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमना-

विद्याधरोऽपि सुमना धृतराष्ट्रोऽपि गुणप्रियः क्षमानुगतोऽपि सुधर्मास्थितो बृहन्नलानुभावोऽप्यन्तःसरलो महिषीसम्भवोऽपि सुखोत्पाद्यतरलोऽपि महानायको राजा चिन्तामणिर्नाम। यत्र

---

तपः। इति हलायुधः। कुसुमकेतुरिव काम इव जनितानिरुद्धक्षोभापतेः सम्पत्तेन। रतेः प्रियायाः सुखप्रदस्य। कन्दर्पः पुष्पकेतनः। अस्येव प्रकरणे रतिः प्रिया सुतोऽनिरुद्ध इत्यत्र उषेत्र इति विष्णुहेतः। पक्षे जनितानिरुद्धानिवारिता सम्पत्तिर्येन। रतौ सुरतेऽनेककामसत्त्वकलाभिज्ञतया सुखप्रदः। विरोधाभासेनाह। विद्याधरोऽपि दैवयोनिविशेषोऽपि सुमना देव इति विरोधः। विद्याधरोऽप्सरोयक्षरक्षोगन्धर्वकिन्नराः। पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः॥ सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः। इति हलायुधः। विद्याधरोऽष्टादशविद्यानिधिः। सुमनास्त्रिविधमानसपापरहित इति परिहारः। तानि चोक्तानि मनुना। परद्रव्येष्वभध्यानं मनसानिष्टचिन्तनम्। वितथाभिनिवेशश्च त्रिविधं मानसं स्मृतम्॥ इति। आभासत्वे विरोधस्य विरोधाभास इष्यते। काव्यप्रकाशे त्वयमेव विरोध इति व्यवहृतः। विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः। इति। एवमन्येऽपि। अपिरापातती विरोधस्य द्योतकः। पक्षान्तरेऽनेकार्थत्वात समुच्चयस्य। धृतराष्ट्रोऽपि पाण्डोरयमोऽपि गुणप्रियः। शोभनप्रिय इति विरोधः। गुणोऽप्रधाने शुक्लादौ गुणः सूत्रे शकोटरे। इति विश्वः। धृतराष्ट्रो धृतराज्यः। गुणप्रियः सन्धिविग्रहादिषड्गुणप्रिय इत्यविरोधः। सन्धिना विग्रहो यानमासनं द्वैधमाश्रयः। षड्गुणा इत्यमरः। क्षमानुगतोऽपि पृथिव्यनुगतोऽपि सुधर्मास्थितो देवसभास्थित इति विरोधः। क्षमा शान्तिः क्षमा धरेति विश्वः। स्यात सुधर्मा देवसभेत्यमरः। क्षमानुगतः शान्तियुक्तः सुधर्मास्थितः शोभनधर्मास्थित इत्यविरोधः। बृहन्महान् यो नलस्तत्सदृशो बलानुभावो यस्य। यथा यवानपेक्षः सोऽभिवर्धते तथायमर्थः। तादृशोऽप्यन्तर्मध्ये सरलो वक्रतारहित इति विरोधः। बृहन्नलानुभावोऽर्जुनानुभावोऽन्तःसरल इति परिहारः। बृहन्नलो गुडाकेशे नले कौशिकनन्दने। इति विश्वः। महिष्याः सम्भवो यस्य तादृशो महिषी हर्षोत्पादी हर्षजनक इति महोत्पात इति विरोधः। महिष्याः कृताभिषेकायाः सम्भवो यस्य हर्षोत्पादी धर्मजनक इति परिहारः। कृताभिषेका महिषी भोगिन्योऽस्या नृपास्त्रियः। पुण्यश्रेयसी सुकृतं वृष इत्युभयत्रामरः। अतरलोऽपि दारमध्यमणिभिन्नोऽपि महानायको दारमध्यमणिरिति विरोधः। तरलो

च भासति धरणिमण्डलं कुलनियहप्रयोगो वादेषु नास्तिकता चार्वाकेषु कण्टकयोगो नियोगेषु परीवादो वीणासु खलसंयोगः शालिषु द्विजिह्वसङ्कीर्तिराहितुण्डिकेषु करच्छेदः कृषकरग्रहणेषु नेत्रोत्पाटनं मुनीनां द्विजराजविरुद्धता पङ्कजानां सार्वभौमयोगो दिग्गजस्याग्नितुलाशुण्डिः सुवर्णानां सूचीभेदो मणीनां शूलभङ्गो

---

हारमध्यग इत्यमरः। नायको नेतरि श्रेष्ठे हारमध्यमणावपि। इति विश्वः। अतस्तौ वीरौ महान् नायको नेता महानायक इति परिहारः। परिसङ्ख्यायाह। काव्यादर्शनियमयेषोऽयम। यत्र चिन्तामणौ। कुलं वाक्कुलं निग्रहः प्रतिज्ञाहान्यादिरेषां प्रयोगो वादेषु। पक्षे कुलं कपटः। निग्रहो बन्धनम। साङ्गन्यग्रोधाय परिसङ्ख्या तु सा स्मृता। नास्तिकता परलोकाभावज्ञानवत्त्वं चार्वाकेषु बौद्धविशेषेषु। भावे तल्। अस्तिनास्ति दिष्टं मतिरिति ठक्। तावानेव हि लोकोऽयं यावानिन्द्रियगोचरः। इति तन्निसङ्गाः। मिथ्यादृष्टिर्नास्तिकतेत्यमरः। पक्षे नास्तिकता दरिद्रता। कण्टकः अनेनेदं भुक्तमिति तत्स्वामिनि कण्टकस्य योगो नियोगेषु। मोहात्सिवा इति भाषायाम। पक्षे। कण्टकः क्षुद्रशत्रुः। कण्टकः क्षुद्रशत्रौ च कर्मण्यानिकदूषणे। इति विश्वः। परीवादो वीणावादनवस्तु। पक्षे परीवादोऽपवादः। परीवादोऽपवादे स्यादीणावादनवस्तुनि। इति मेदिनी। खलं धान्यमर्दनभूमिः। खलं भक्ष्यानकल्केषु क्रूरे नीचेऽधमे खलः। इति विश्वप्रकाशः। पक्षे खलः पिशुनः। पिशुनो दुर्जनः खल इत्यमरः। आहितुण्डिकेषु व्यालग्राहिषु द्विजिह्वसङ्कीर्तिः सर्पसङ्कटः। व्यालग्राह्याहितुण्डिक इत्यमरः। पक्षे द्विजिह्वः खलः। द्विजिह्वः पन्नगे पुंसि खले स्यादन्यलिङ्गकः। इति रभसः। अहितुण्डेन दीव्यति। तेन दीव्यतीति ठक्। कृषकरग्रहणेषु राजग्राह्यभागेषु करच्छेदस्येव न्यूनीकरणम। पूर्वनिश्चितादपि प्रार्थनादिना न्यूनग्रहणमित्यर्थः। पक्षे करच्छेदो हस्तच्छेदः। बलिर्हस्तांशवः करा इत्यमरः। विरोधाभासपरिसङ्ख्यासङ्करेणाह। मुनीनां यतीनां नेत्रमिति। पक्षे मुनीनां हस्तविशेषाणां नेत्रोत्पाटनं मूलोत्पाटनम्। तरुमूलाधिवस्त्रेषु नेत्रमर्थिगणे रथे। मुनिर्यतौऽङ्कोचवृक्ष-प्रियालागस्त्यकिंशुके॥ इति हलायुधः। पङ्कजानां कमलानां द्विजराजश्चन्द्रस्तद्विरुद्धता। द्विजराजः शशधर इत्यमरः। पक्षे द्विजा ब्राह्मणाः पक्षिणो वा ते च राजानश्च। दन्त्यविप्रौष्ठजा द्विजा इत्यमरः। सार्वभौमो रूढः सार्वभौमशब्दस्तयोगो दिग्गजस्य। सर्वभूमिपृथिवीभ्यामिति व्युत्पन्नश्च नेतद्राजभिन्ने नास्ति प्रयोग इत्यर्थः।

युवतिप्रसवे दुःशासनदर्शनं भारते करपत्रदारणं जलजानाम्। महावराहो गोत्रोद्धरणप्रवृत्तोऽपि गोत्रोद्धननमकरोत्। राघवः परिहरन्नपि जनकभुवं जनकभुवा सह वनं विवेश। भरतो रामे दर्शितभक्तिरपि राज्ये विराममकरोत्। नलस्य दमयन्त्या मिलितस्यापि पुनर्भूपरिग्रहो जातः। पृथुरपि गोत्रसमुत्सारण-

---

सूक्तं च। न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमाद्ऋते। अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥ इति बहुवचनान्तपाठे तु पत्नेऽर्थवत्त्वं राजपक्षे पूर्ववच्छब्दपरत्वम्। सार्वभौमस्तु दिङ्नागे सर्वपृथ्वीपतावपि। इति विश्वमेदिनौ। पृथ्वादयः सार्वभौमः सुपतीकस्य दिग्गजाः। इत्यमरः। अग्निना तुलया च परिवर्णोन्मानयोर्ग्रहणम। सुवर्णानाम। व्यक्त्यभिप्रायेण बहुवचनम। तादृशगुडियोग्यानामन्येषामभावादिति भावः। सूची स्त्रीत्वं शोभनसाधनं तेन भेदो मनोज्ञता। न तु सूची करादभिनयस्तस्य भेदः। सर्वेषां नर्तकशोर्तकानां परिनिष्ठितत्वादिति भावः। यद्वा सूची नारीणां करणान्तरं गोत्राद्धारसंवेशक्रिया। तस्या भेद इति भावः। एतेनास्य राज्ये सपत्नीर्ज्येष्ठा-कनिष्ठास्यवहारामावो ध्वनितः। करणं साधने क्षेत्रे कायवाङ्मनस्कर्मसु। गोत्राद्धार-संवेश-क्रियाभेदेन्द्रियेषु च॥ इति विश्वप्रकाशः। सूची करादभिनये नारीणां करणान्तरे। सूची शोभनदृश्य इति च। शूलेनोदरपीडया भङ्ग आमर्दः। भञ्जो आमर्दने। न तु शूलेन दुष्टपाचिवधोपायेन भङ्गः। तादृशापराधिनोऽभावादिति भावः। यद्वा शूलः केतनं तस्य भङ्गः। सूची प्रहरणे शूलः केतने शोगरोगयोः। इति विश्वप्रकाशः। दुःशासनस्य पार्तराष्ट्रस्य दर्शनं ज्ञानम्। न तु दुष्टशासनस्य निरोधनम्। करैः सूर्य-किरणैः पत्रदारणं दलानां विकासनं पङ्कजानाम्। न तु करपत्रेण क्रकचेन दारणम्। क्रकचोऽस्त्री करपत्रमित्यमरः। करपत्र इति भाषायाम्। विरोधाभासेनाह। महा-वराहो गोत्रोद्धरणाय पृथिव्युद्धरणाय प्रवृत्तोऽपि गोत्रोद्धननमकरोत्। यद्वराहाय प्रवृत्तस्यैवोद्धननमनुचितम्। गोत्रः पर्वत इत्यमरोक्तेरेव परिहारः। एवमग्रेऽपि। जनकभूः विदेहभूमिः। पक्षे जनकभुवा सीतया। विरामो रामाभावो वैराग्यं च। दमयन्त्या मिलितस्यापि नलस्य पुनर्भूपरिग्रहः पुनरूढापरिग्रहः। पुनरर्थतोमिलनादुक्तेर्या यथाविधि। स पुनर्भूः। पक्षे पुनर्हतोयद्वारं भूपरिग्रहः पृथ्वीपरिग्रहः। गोत्राणां स्वगोत्रजानां स्वबन्धुजनविरोधिता विरोधः। गोत्राणां पर्वतानामिति परिहारः। इत्थं

विस्तारितभूमण्डलः। इत्थं नास्ति वागवसरः पूर्वेतरराजिषु। स पुनरन्य एव देवो न्यक्कृतसर्वोर्वीपतिचरितः। तथाहि स पर्वतः कटकसञ्चारिणो गन्धर्वान् दर्शितभ्रूभङ्गोन्नतिः सूचयन्न विरराम। स हि मानयो नावज्ञायोच्छलितो नो मायाजन्मने हितश्च। स हि मानी गिरि स्थितो हृषध्वजः। अमी सदागतिरवधूताखिन्नकान्तारः पावकाग्नेयरा नभोगो सुकृ. सुपनोहरश्च। स रत्नाकरोऽनहिमयः कथमगाधः समर्यादो नोद्रोकी-

---

वर्णितविशेषाभावात् पूर्वेषु महावराहादिषु वागवसरः स्तुतियोग्यं नास्ति विलासमण्डितो राजा। यदेव वक्ष्यति तत दशकुमारचरिते दृश्यम। वाक्यस्योऽन्यगुणविशिष्ट एव। अत एव न्यक्कृतसर्वोर्वीपतिचरित। दृष्टान्तिमयोक्तिरलङ्कारः। मेदकान्तिमयोक्तिस्तु तस्यैवान्यत्ववर्णनम्। इति लक्षणात्। पुनः प्रथमे। पक्षे हरी सवर्णवान्। कटकं सैन्यम्। गन्धर्वा अश्वाः। मुख्यं प्राधान्यम्। पक्षे कटकं नितम्बः। गन्धर्वा इव ऊरुभृतयः। मुख्यं शिखरम्। तद् पर्वतमेव शोभते नान्यत्रेति। वाजिवाहावगन्धर्वं इति। कटकोऽस्त्री नितम्बऽटेरिति। मुख्यं प्राधान्यमात्रोचितं विश्वनरः। सञ्जातरेकं तमाह। स हि मानयो लक्ष्मीगृहम्। अवज्ञायो गर्वः। माया कपटम्। जन्मने हितः। हितयोगे चेति चतुर्थी। पक्षे स हिमालयः। अवज्ञाया हिमः। उमायाः पार्वत्याः। अवज्ञ यो हिमे गर्व इति धनञ्जयः। गङ्गाश्रयमाह। स हिमानी हिमसंहतिरूपो गिरिः पर्वतस्तव स्थितो हृषध्वजः। पक्षे। स हि मानी चित्तोन्नतिमान्। गिरि वचने। हृषध्वजः धर्मध्वजः। पुण्यश्लोकमौ सुकृतं हृष इत्यमरः। सतां साधूनामा साकल्येन गतिर्निर्वाहो यस्मात्। यैषां कापि गतिर्नास्ति तेषां वाराणसी गतिः। दृष्टवत्। अवधूताः कम्पिता दूरीकृता वा कान्तारा दुर्गममार्गा दुर्भिक्षा वा येन। पावकानां पवित्रकर्तृणामग्नेयरः। तथा च मनुः। अग्निर्वित् कपिला सवी राजा भिक्षुर्मडोदधिः। दृष्टमात्राः पुनन्त्येते तस्मात पश्येत नित्यशः॥ इति। पावकोऽग्नौ सदाचार इति विश्वप्रकाशः। नभोगेषु देवभुवनसुकः। यद्वा। न भोगेषु स्त्र्यादिसुखेषुनसुकः। उक्तं च। मृगयाक्षमया पाप गार्हतानि मदोद्धतान्। हरन्ति दुःखयत्यविप्रियवचनान्यं क्षणीकरोति। पक्षे सदागतिर्वायुः। अवधूताखिन्न-

ऽप्यस्य विस्मयः सदा हिमकराश्रयोऽमृतमयः सपोतस्तस्याचलो नक्रोधो महानदीनः समुद्रः। स चन्द्र इव चण्डदानन्दकरः कुमुदवनबन्धुः सकलकलाकुलगृहं नतारातिबलः। मित्रो

---

कान्तारः कम्पिताखिलकानन:। पावकायेसरी वह्निसहाय:। नभोगेषु मेघेषूत्सुक उत्कण्ठितः। तथा च कालिदासः। मरुत्सखस्येव बलाहकस्येति। सुमनसः पुष्पाणि हरति तादृशः। तथा च कालिदासः। हस्तग्रथं हरति पुष्पमनोज्ञदानामिति। सुमनाः पुष्पमालस्योल्लिदग्रे कोविदेऽपि च। इति विश्वप्रकाशः। स्त्रियः सुमनसः पुष्पमित्यमरः। कान्तारः कानने पेचौ दुर्भिक्षे दुर्गवर्त्मनि इति विश्वः। रत्नानामुत्तमबन्धूनामाकरः। रत्नं स्वजातिश्रेष्ठेऽपीत्यमरः। अविद्विद्वादिः खलस्तन्मयो न भवतीत्यनद्विमयः। कथम्। अगाधः गभीराशयः। यद्वा। विस्तारहितः। गर्धा विस्तृत्यमरः। समर्याद उचितानतिक्रमणशीलः। उद्गत उल्बित: रोको दीप्तिर्यस्य सः। रुच दीप्तौ। घञ्। इत्यप्यस्य न विस्मयः। अलुब्धत्वादस्य दोषेर्न नाश इति भावः। तथा चोक्तम्। देहीति वचनद्वारा देहस्थाः पञ्च देवताः। तत्क्षणादेव नश्यन्ति धीश्रीह्रीकान्तिकीर्त्तयः। इति। किञ्च। स पार्थः पार्थिवान् सर्वान् भूमिष्ठोऽपि रथस्थितान्। एको निवारयामास लोभः सर्वगुणानिव॥ इति। यद्वा। अस्योद्र इति न कोऽपि विस्मयः। अलाखेटग्रीवस्याखोटसङ्काशकत्वादिति भावः। सदा हिमकरवच्चन्द्रतुल्य आश्रयो गृहं यस्य। अमृतमयः। आह्लादकरूपवस्त्वात्। सपोतः सबालकः। पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः। इत्यमरः। तस्य क्रोधोऽचलो न प्रतिघातात्मनपनेयो न भवतीति भावः। महान् श्रेष्ठः। अदीनः। समुद्रः। मुदा राजांचन्द्रं तत्सहितः। चन्द्रेऽगाधत्वलक्षणमर्यादरहितः। मर्यादा सीमा अस्योद्र इति न कोऽपि विस्मयः। उद्रो जलमार्जारः। सदा हि निश्चयेन मकराणां जलजन्तूनामाश्रयः। यद्वा हिमकरयन्द्रः। अमृतं सुधा जलं वा। पयः क्षीरजलमप्यमृतम्। पीयूषममृतं सुधा। इत्युभयत्रामरः। पोतो यानपात्रम्। यानपात्रं तु पोतोऽब्धि-भवे विषु समुद्रियम्। इत्यमरः। तस्याधोऽचलो मैनाकः। नक्रः कृम्भीरः। नक्रस्तु कृम्भीर इत्यमरः। स चन्द्रः। चदि आह्लादे। स्फायितञ्चिवञ्चीति रक्। चण्डदानां सुखप्रदानामानन्दकर्त्ता। खण्डिते रतान् सन्तोषयतीत्यर्थः। यद्वा। चण्ड उत्सवप्रदर्शनामानन्दकरश्च। मुदावनं मुदवनं को: पृथिव्या मुदवनं तेन बन्धुरिव बन्धुः। यथा च कालिदासः। तेनार्थवाञ्छोभपराङ्मुखेन तेन घ्रता विघ्नभयं क्रियावान्। तेनाव लोकः

तुः काञ्चनशोभां बिभ्रदचलाधिकलक्ष्मीः सुमेरुरिव। यस्य शिवपुवर्गः सदा पार्थोऽपि न महाभारतरणयोग्यः, भीमोऽप्यशालकोत्तनवेहितः, सानुचरोऽपि न गोवर्धनधृतः। अपि च त्रिशङ्कुरिव नक्षत्रपथस्खलितः, शङ्करोऽपि न विषादी, पावकोऽपि न कृष्णवर्त्मा, आग्नेयाश्मोऽपि न दहनः, नान्तक इवाकस्मादपहृत-

---

महमान् विनेता तेनैव शोकापनुदेन पुत्रो। गाम आगत इतिवत् कोल्लक्षणोपचारः। कलायतुःषष्टिकलाः। नतमरातिबलं यस्मात। पक्षे—चण्डा रात्रिः। कमलं केरवम्। कलाः षोडश कलाः। न तारा नक्षत्राण्यतिबला यस्मात। सिते सुहृत। किंच चकारो वाऽर्थे, का वा शोभा न विद्यते? अचला स्थिरा, अधिका लक्ष्मीर्यस्य। पक्षे—सितः सूर्यः। काञ्चनं सुवर्णम्। अचलेभ्यः पर्वतेभ्योऽधिका लक्ष्मीर्यस्य। ("अथ सितः सखा सुहृत्"। "द्युमणिसूरणिसूर्यः" इत्युभयत्राप्यमरः) पुनर्विरोधाभासेनाह—पार्थोऽर्जुनस्तस्य महाभारत रण-योग्यतानिषेधो विरोधः। एवमग्रेऽपि। पक्षे—यस्य पृथुवर्गो महतो भारस्य तरणे योग्योऽपि न, अत एव सदा सर्वकालेऽपार्थः अपगतोऽर्थः प्रयोजनं यस्य तादृशः। भीमोऽपि अशालनुपुत्रोऽपि, अशालनवे विनाशनाय हितः, विदे न हित इति विरोधः। भीमो राजगुणैर्भयानकः; तथाच कालिदासः,—"भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम्। अदृश्यताधिगम्यश्च यादोरत्नैरिवार्णवः॥" इति। ("दारुणं भीषणं भीमं घोरं भीमं भयानकम्" इत्यमरः) अशालनवसमितं नवं स्तुत्यमीहितं चेष्टितं यस्य; [षू स्तवने इत्यस्य क्तादौरप्] यद्वा—नवं नवीनमन्येभ्यो विलक्षणम्। अशालनुवाचकः शब्दो दीर्घादिः शालनुरित्यप्यस्ति; तथाच विविक्रमभटः शालनुतनयः इति, तव शालनोस्तनयः शालनुतनय इत्येकोऽर्थः। पक्षे—शालौ नृतौ नद्यौ यस्येति। सानुषु शिखरेषु चरति तादृशोऽपि न गोवर्धनं पर्वतमुत्पाटयितः स्थित इति विरोधः। अनुचरैः सेवकैः सहितः; न गोवर्धनजनैर्भूषित इति परिहारः, स्वयमेव तेषां भूषक इत्यर्थः। [नञर्थेऽव्ययशब्देन सुप्सुपेति समासः] त्रिशङ्कुरिव नक्षत्रपथस्खलितः। नक्षत्रपथे आकाशे। पक्षे—अवपथात् अवधर्मात्। शङ्करः शिवो विषादी विषभक्षणेति विरोधः। शङ्करः सुखकरः, न विषादी न दुःखीति परिहारः। पावकोऽग्निरपि [illegible] मार्ग इति विरोधः। पावकोऽन्येषां पवित्रकर्त्ता न कृष्णवर्त्मा न दुराचारः। ("वह्निः शुक्रो कृष्णवर्त्मा कृशानुः पावकोऽनलः" इत्यमरः। "कृष्णवर्त्मा हुताशे स्याद्दुराचारे विधुन्तुदे" इति विश्वप्रकाशः) आग्नेयाश्मोऽपि वह्निरपि न दहनो न वह्निरिति

जीवन:, न राहुरिव मित्रमण्डलग्रहणविवर्द्धितरुचि:, न नल इव कलिविघटित:, न चक्रीव शृगालवधस्तुतिसमुल्लसित:, नन्द इव यशोदयाऽऽश्रित:, जरासन्ध इव घटितसन्धिविग्रह:, भार्गव इव सदा नभोग:, दशरथ इव सुमित्रोपेत: सुमन्त्राधिष्ठित[illegible] दिलीप इव सुदक्षिणानुरक्तो रक्षितगुरु, राम इव जनि[illegible] कुशलवयोरुपोक्षाग्र:।

तस्य च पारिजात इवाश्रितनन्दन:, हिमालय इव जनित[illegible]

---

विरोध:। आश्रयाभासाश्रा हत्वा यस्मिन्नाश्रयाग्र:; न दहनो नेदानां सन्तापक[illegible] परिहार:। ("आश्रयाग्नौ हुतभुज: दहनो हव्यवाहन:" इत्यमर:) नान्दक इव [illegible] इवाक्षजात् खड्गा वपुषं जीवनं जीवितं येन। पक्षे—जीवनं जीविका [illegible] ल्युट्] न राहुरिव मित्रमण्डलग्रहणेन सूर्यमण्डलग्रहणेन विवर्द्धिता रुचिर्दीप्ति[illegible] स:। पक्षे—सुहृद्राज्यग्रहणे विवर्द्धिता रुचिरिच्छा येन स:। न नल इव कलि[illegible] युगविशेषेण विघटितो व्याप्त:। पक्षे—कलि: कलह:। न चक्रीव कृष्ण इव शृगाल[illegible] राजविशेषस्य वधेन मारणेन तथा समुल्लसित:। पक्षे—शृगाल: कातर:। ("शृगाली लम्बके भीरु शूरे वे पार्थिवान्तरे" इति विश्व:। कोशे दानवान्तर इति पाठस्त्वशुद्ध एतन्मूलक एव नमङ्करभम:) नन्दगोप इव यशोदया तन्नामनिजस्त्रियाऽन्वित:। पक्षे—यशसा दयया च। जरासन्ध इव घटितसन्धिविग्रह: शरीरं यस्य। पक्षे—घटितौ सन्धिविग्रहौ येन स:। भार्गव इव शुक्र इव, सदा सर्वदा नभोग आकाशगामी। पक्षे—दानभोगाभ्यां सहित:। दशरथ इव सुमित्रया लक्ष्मणजननयोपेतो युक्त:, सुमन्त्रसञ्ज्ञकसारथिना अधिष्ठित आश्रितश्च। पक्षे—सुमित्रेवोत्तमगुहदा, सुमन्त्रेव शोभनगुप्तवादेन। दिलीप इव सुदक्षिणायां तन्नाम्न्यां पत्न्यामनुरक्त आसक्त:, रक्षिता पालिता गोवांश्चिष्टो येन तादृशश्च। पक्षे—सुदक्षायां पापे दानन्यये, रक्षिता गो: पृथ्वी वाचो वा येन स:। ("स्वर्गेऽपगुश.स्वज्र.दङ्नेत्रपृष्ठभूमिषु। लक्ष्यदृष्ट्या स्त्रियां पुंसि गौ:" इत्यमर:) राम इव जनित: कुशलवयो: रूपस्य सौन्दर्यस्योक्षाग्र औन्नत्यं यस्मिन्। पक्षे—रामे यथा [illegible] क्षाग्रस्तथा जनितकुशलवयो:। विभक्त्यन्तश्लेषोऽयं नीलोत्पलखण्डिनी नेत्रे तनुवां [illegible] रितवत्। तथा च कालिदास:,—"रूपं तदीक्षास्य तदेव वीर्यं तदेव नेतर्गमकमुन्नतत्वम्। न कारणात् स्वादविभेद कुमार: प्रवर्त्तते दीप इव प्रदीपात्॥" इति।

शिवः, मन्दर इव भोगिभोगाङ्कितः, कैलास इव महेश्वरोपभुक्त-कोटिः, मधुरिव नानारामानन्दकरः, क्षीरोदमथनोद्यतमन्दर इव मुखरितभुवनः, रागरज्जुरिवोल्लासितरतिः, ईशानभूतिमञ्जय इव सम्यॊच्छलितः, शरन्मेघ इवावदातहृदयः विष्णुपदावलम्बो

---

तस्य पुत्रः कन्दर्पकेतुनामेति सम्बन्धः। पारिजातो देवतरुः, ("पञ्चैते देवतरवो मन्दारः पारिजातकः" इत्यमरः) श्रान्तं नन्दनमिन्द्रवनं येन सः, ("नन्दनं वनम्" इतीन्द्रप्रकरणेऽमरः) पक्षे—श्रान्तान् नन्दयतीति तादृशः। हिमालयो हिमवान्। जनितोत्पादिता शिवा गौरी येन, ("शिवा भवानी रुद्राणी" इत्यमरः) पक्षे—शिवं सुखं, ("शं क्षेयसं शिवं भद्रम्" इत्यमरः) मन्दर इव कोलः। भोगी सर्पः। भोगः शरीरम्। पक्षे—भोगी सुखी। भोगः स्त्र्यादिसम्भोगः। ("उरगः पन्नगो भोगी"। "भोगः सुखे स्त्र्यादिभुजावहेश्च फणकाययोः"। इति उभयत्राप्यमरः) कैलासः पर्वतः। महेश्वरः शिवः। कोटिरयम। ("कोटिरस्त्रे प्रकर्षे च" इति धरणिः। "रजताद्रिस्तु कैलासोऽष्टापदः स्फटिकाचलः" इति हेमः। "शिवः शूली महेश्वरः" इत्यमरः) पक्षे—महेश्वरैर्मन्दाराद्यैरुपभुक्ताः कोटयस्तत्सङ्ख्याकानि वनानि यस्य सः। ("कोटिः स्त्री धनुषोऽग्रे स्यात् सङ्ख्याभेदप्रकर्षयोः" इति विश्वः) मधुर्वसन्तः। नाना आरामा अनेकोपवनानि तेष्वानन्दकरणात्। ("आरामः स्यादुपवनं कृत्रिमं वनमेव यत्" इत्यमरः। "अथ पुष्परसे मधु। दैत्ये चैत्रे वसन्ते च मधुः" इति विश्वः) पक्षे रामाः स्त्रियः। ("सुन्दरी रमणी रामा" इत्यमरः) क्षीरोदः क्षीरसमुद्रः। ["उदकस्योदः सञ्ज्ञायाम्" इत्युदकस्योदादेशः] ("रत्नाकरो जलनिधि-र्यादसां पतिरप्पतिः। तस्य प्रभेदाः क्षीरोदो लवणोदकधाऽपरे॥" इत्यमरः) मन्दरो मन्थाचलः। मुखरितं शब्दायमानं भुवनं जलं येन। ("पयः कीलाल-ममृतं जीवनं भुवनं वनम्" इत्यमरः। "इन्दीवरस्तु मन्दरः" इति हेमचन्द्रः) पक्षे—भुवनं जगत्। ("विष्टपं भुवनं जगत्" इत्यमरः) अस्मिन् पक्षे जयशब्दघोषणयेति शेषः। रागरज्जुः कामः। ("कन्दर्पो दर्पकः कामः प्रद्युम्नः पुष्पधन्वनः। सर्वधर्म-मनोद्भारी रागरज्जुः प्रकीर्तितः॥" इत्युत्पलिनी) रतिः कामस्त्री। पक्षे—रतिरनुरागः। ईशानः शिवः। ("अथ ईशानः शङ्करः" इत्यमरः) भूतिर्भस्म। ("भूतिर्भस्मनि सम्पदि" इत्यमरः) सम्यःसूच्छलितः। पक्षे—सम्यग्धायतीति सम्याः। ["आतश्चोपसर्गे" इति कः] सम्यः सम्यग्विचारकर्त्ता, अत एवाच्छलितः केनापि

च, पार्थ इव समरसाहसोचितः, कंस इव कुवलयापीड़भूषितः, तार्क्ष्य इव विनताऽऽनन्दकरः सुमुखनन्दनश्च, विष्णुरिव क्रोड़ीकृतसुतनुः, शान्तनव इव स्ववशस्थापितकालधर्मः, कौरवव्यूह इव सुशर्माधिष्ठितः, सुबाहुरपि रामानन्दः, समदृष्टिः

---

क्षलितुमशक्यः। ["तदस्य सञ्जातम्" इति क्षुल्लशब्दादितच्] शरत्कालिकमेघ इवावदातहृदयः सलसल्लक्ष्मप्रतिभासमाननैर्मल्यरहितान्तःप्रदेशः। विष्णुपदावलम्बी आकाशावलम्बी। ("त्रिदिविष्णुपदं वा तु पुंस्याकाशत्रिविष्टपौ" इत्यमरः) पक्षे—अवदातहृदयः शुद्धान्तःकरणः। ("हृदयं स्यान्मनश्चेतो मानसं मनः" इत्यमरः) [दैप् शोधने इत्यस्मात् क्तः, "आदेचः" इत्यात्वम्] विष्णुपदं हरिचरणम्। पार्थोऽर्जुनः। समरे सङ्ग्रामे साहसं तत्रोचितो योग्यः। पक्षद्वयेऽपि समोऽर्थः। यद्वा—रसोऽनुरागः, साहसः स्त्रियम्, [साङ्गोपदर्थे] समाभ्यां सर्वजनतुल्याभ्यां रसाहसाभ्यामुचितो योग्यः. धर्मराज इव समवर्त्तीत्यर्थः। ("धर्मो दमः। हासो हास्यं च" इत्यमरः) कंसस्तन्नामा दैत्यः। कुवलयापीडस्तद्धृतो। पक्षे—कोः पृथिव्याः वलय इवापीड इव कुवलयापीडः पृथ्वीमण्डलायमान इति यावत्, तादृशेन भूषितः। "यस्याश्चोरश्चिकुरनिकरः कर्णपूरो मयूरो भासो हासः कविकुलगुरुः कालिदासो विलासः। हर्षो हर्षो हृदयवसतिः पञ्चबाणस्तु बाणः केषां नैषा कथय कविताकामिनी कौतुकाय॥" इतिवत्। ("कटको वलयोऽस्त्रियाम्।" "मिश्रास्त्रापीड़शेखरौ" इत्युभयत्राप्यमरः) तार्क्ष्यो गरुड़ः। विनता तन्माता तदानन्दकरः। ("गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयः" इत्यमरः) पक्षे—विनतानां नम्राणामानन्दकरः। सुमुखाः पण्डितास्तेषां हर्षकर्त्ता। पक्षे—सुमुखो गरुड़पुत्रः स नन्दनः प्रभो यस्य सः। विष्णुरिव क्रोडीकृता शुकरीकृता शोभना तनूः शरीरं येन सः। (क्रोडः शूकरमानयोः" इति विश्वप्रकाशः। "स्त्रियां मूर्त्तौ तनूस्तनूः" इत्यमरः) पक्षे—क्रोडीकृतोत्सङ्गीकृता सुतनूर्येन सः। [आग्रीधवत तारकात् तारकच्चाम] ("उत्सङ्गशूकरौ क्रोडः" इति पादपूरणाधिकारेऽनेकार्थध्वनिमञ्जरी) यद्वा—क्रोडीकृता आलिङ्गिता सुतनूर्येन सः। ("आलिङ्गनं परिष्वङ्गः संश्लेष उपगूहनम्। अङ्कपालिः परीरम्भः क्रोडीकृतिः" इति हेमः) शान्तनवो भीष्मस्तद्वत् स्ववशे स्थापितः कालधर्मो मृत्युर्येन सः। ("स्यात् पक्षता कालधर्मो दिष्टान्तः पक्षयोऽक्षयः" इत्यमरः) पक्षे—कालस्य धर्मः; तथाच व्यासः,—"कालो वा कारणं राज्ञो

रपि महेश्वरः, मुक्तामयाऽप्यतरलमध्यः, जलद इव विमल-तरवारिधारावासितराजहंसः, वंशप्रदीपोऽप्यक्षतदशस्तनयः कन्दर्पकेतुर्नाम।

येन च चन्द्रेणेव सकलकलाकुलगृहेण, शर्वरीतिहारिणा,

---

राजा वा कालकारणम्। इति ते संशयो मा भूद्राजा कालस्य कारणम्॥ राजा धर्मस्य कारणम्" इति श्रुतिः। कौरवव्यूहे सुशर्मा नाम याडा। पक्षे—सुशर्मणा अतिसुखिनाधिष्ठितः। ("शर्मशातसुखानि च" इत्यमरः) पुनर्विरोधाभासेनाह—सुबाहुरामको राक्षसः। रामो दाशरथिः। सुबाहुराक्षसस्य रामानन्दजनकत्वं विरोधः। अवाप्तिनाऽऽपातितो विरोधः, पश्चात्तरेण परिहारः। सुबाहुः शोभनभुजः। रामाः स्त्रिय आनन्दयतीति तच्छील इति परिहारः। ("भुजबाहू प्रविष्टौ दोः"। "सुन्दरी रमणी रामा" इत्युभयत्राप्यमरः) समदृष्टिः अविषमदृष्टिः। महेश्वरः शिवः। ("शिवः शूली महेश्वरः" इत्यमरः) शिवः समदृष्टिरिति विरोधः। पक्षे—समदृष्टिः सर्वजनेषु समानदर्शनः, महेश्वरो महाराजः। ("स्वामी त्वीश्वरः पतिरीशिता" इत्यमरः) मुक्तामयो मौक्तिकप्रचुरः। ["तत्प्रकृतवचने" इति मयट्] अतरलमध्यः तरलो हारमध्यमणिलक्षितो मध्यो यस्य सः; हारस्यातरलमध्यता विरोधः। ("तरलो हारमध्यगः" इत्यमरः) अत्र मध्यशब्दप्रयोगस्तु "वेध्यो निवापाञ्जलयः पितृणाम्" इत्यादिवदवोध्यः। वस्तुतस्तु मध्यशब्दरहितः पाठः। पक्षे—मुक्तामयो नीरोगः। अतरलो धीर इति परिहारः; पराङ्मनासु पराङ्मुख इत्यर्थः। ("रोगव्याधिगदामयाः"। "चञ्चलं तरलं चैव" इत्युभयत्राप्यमरः) जलदो मेघः। विमलतरया अतिस्वच्छया वारिधारया वासिता राजहंसा येन सः। ("राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः" इत्यमरः। उपलक्षणे वतीया) पक्षे—विमलतरवारिः खड्गजलदीधारया वासिता राजान एव हंसा येन सः। ("करवालनिस्त्रिंशमण्डलाग्रवारिकौक्षेयकमण्डलाग्राः" इति हैमः। "खड्गादीनां च निशित-मुखे धारा प्रकीर्तिता" इति विश्वः) वंशप्रदीपः वंशे वेणौ प्रदीपः आकाशदीपः। अक्षता अदग्धा दशा वर्तिर्यस्य तादृशः, दीपस्यादग्धवर्तिता विरोधः। पक्षे—वंशप्रदीपः कुलदीपः। अक्षता अनष्टा दशा अवस्था यस्य तादृशः। ("दशा वर्तिर्दशा वयः" इति हारावली। "दो वंशो कुलसन्तरो"। "दशाऽवस्थाऽनेकविधा" इत्युभयत्राप्यमरः।

Library Sri Pratap

दलितकैरवेण, कुमुदवनबन्धुना, प्रसाधिताशेन विलोकिताः, जलधय इवोल्लसितगोवाः, सुदूरविवर्द्धितजीवनाः, प्रसन्नसत्त्वाः सन्तः परां हृद्धिमवापुः।

यस्य च जनितानिरुद्धलीलस्य, रतिप्रियस्य, कुसुमशरासनस्य मकरकेतोरिव दर्शनेन वनिताजनस्य हृदयमुल्लास।

यस्मै चानुगतदक्षिणसदागतये, श्रुतिसुखदकोमलकोकिल-

---

श्रेयेणाद्र—येन कन्दर्पकेतुना चन्द्रेणेव सकलकलाकुलगृहेण। पुनरुक्तोऽसौ श्रेयः। अर्वरीतिहारिणा अर्वर्यां रात्रेरीतिरिवेतिर्दुःखदत्वात् तमस्तद्धारिणा तन्नाशकेन। दलितकैरवेण विकासितकुमुदेन। प्रसाधिता अलङ्कृता आशा दिशो येन ताद्दशेन। विलोकिता दृष्टाः। जलधय इव समुद्रा इवोल्लसितगोवा उल्लसित-पर्वताः, सुदूरविवर्द्धितजीवना दूरप्रवृद्धजलाः, प्रसन्नसत्त्वाः प्रसन्नजन्तवः सन्तः परामुत्कृष्टां हृद्धिमवापुः। ("सत्त्वोऽस्त्री जन्तुषु क्लीवे व्यवसाये पराक्रमे" इति वैजयन्ती। "अथ अर्वरी निशा निशीथिनी रात्रिः"। "प्रसाधितोऽलङ्कृतश्च"। "आशाश्च दिशस्च ताः"। "सिते कुमुदकैरवे"। "अद्रिगोवनिरिगावा"। "जीवनं भुवनं वनम्"। "कबन्धमुदकं पाथः" इति षट्स्वप्यमरः) अथान्तरे—अर्वर्या शिवस्य रीतिः सम्प्रदायक्रमेण हारी मनोहरः तेन। दलितानि नाशितानि कैरवाणि अवनौ येन। प्रकर्षेण साधिता आशा अर्थिनामभिलाषो येन। [साध संसिद्धौ] उल्लसित-गोवाः प्रसिद्धवंशाः, सुदूरमायतं विशेषेण वर्द्धितं जीवन्त्यनेनेति जीवनं जीविका येषां ताद्दशाः, प्रसन्नसत्त्वाः प्रसन्नस्वभावाः, सन्तः कोविदाः। ("कैरवो चन्द्रिका प्रोक्ता कैरवं कुमुदे हिमे"। "सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः॥" इत्युभयत्रापि विश्वः। "सन् सुधीः कोविदो बुधः" इत्यमरः)।

यस्य कन्दर्पकेतोर्जनितोत्पादिता अनिरुद्धलीलाव्यापतेर्लीला विलासो येन तस्य, दर्शनेन वनिताजनस्य हृदयमुल्लासोल्लासं प्राप्तम्। ("अनिरुद्ध उषापतिः"। "लीला विलासक्रिययोः" इत्युभयत्राप्यमरः) पदे—जनितानिरुद्धलीलस्योत्पादितानिवारित-विलासस्य। रतिप्रियस्य अनुरागवद्धमस्य। कुसुमशर कामसञ्ज्ञति क्षिपति अतिसुन्दर-त्वात् ताद्दशस्य। [असु क्षेपणे] ("स्त्रीणां विलासविब्बोक-विभ्रमा ललितं तथा। क्रिया लीलेत्यमी हावाः क्रियाः शृङ्गारभावजाः॥" इत्यमरः)।

द्वैपोपमाश्लेषेणाह—वसन्तायेव यस्मै तस्मै. स्पृहयाञ्चक्रुरिति सम्बन्धः।

कृताय, विकासितपल्लवाय, कृतकान्तारतरङ्गाय, सुरभिसुमनोऽभिरामाय, सर्वजनसुलभपद्माय, विस्तारितकनकभम्पदे, अतिक्रान्तदमनकाय वसन्तायैव, वनलता इवोत्कलिकाप्रहर्षसङ्कुलाः, भ्रमरसङ्गताः, प्रवालहारिण्यः, विलसद्वयस्तरुण्यः स्पृहयाञ्चक्रुः।

---

["स्पृहेरीप्सितः" इति सम्प्रदानसंज्ञा] अनुगतो दक्षिणसदागतिर्दक्षिणमारुतो यं तस्मै। श्रुतिसुखः कोमलः कोकिलवत् कृतः शब्दो यस्य तस्मै। कृतः कान्तारस्य काननस्य तरङ्गः कम्पनं येन तादृशाय। विकासिताः पल्लवा किसलयानि येन तादृशाय। सर्वजनानां सुलभं पद्मं यस्य तादृशाय। विस्तारिता कनकस्य धुस्तूरस्य चम्पकस्य वा सम्पत् येन तादृशाय, अत एव सुरभयः सुगन्धयः सुमनसः पुष्पाणि ताभिरभिरामाय सुन्दराय। अतिक्रान्तो दमनकः पुष्पविशेषो येन तथाभूताय; शिशिरत्वात् तस्यातिक्रम इति भावः। वनलता इवोत्कलिकाप्रहर्षोद्गतकोरकसङ्गेन सङ्कुला व्याप्ताः। भ्रमरैर्मधुपैः सङ्गताः। प्रवालेन नवपल्लवेन हारिण्यो मनोहराः। विलसद्वयसो विलसत्क्षितयः। ("वायुर्मातरिश्वा सदागतिः"। "श्रुतिः स्त्री श्रवणं श्रव."। "कोकिलः पिक इत्यपि"। "तरयां वासितं कृतम्"। "पल्लवोऽस्त्री किसलयम्"। "वा पुंसि पद्मं नलिनम्"। "धुस्तूरः कनकाह्वयः"। "सुरभिर्गोणतपेषः"। "दृष्टगन्धः सुगन्धिः स्यात्"। "स्त्रियः सुमनसः पुष्पम्"। "कलिका कोरकः पुमान्"। "षट्पदस्त्वालिरलिर्भृङ्गः"। "प्रवालमङ्कुरेऽप्यस्त्री"। "खगवल्ल्यादिनीवेयः" इति चतुर्दशस्वयमरः। "कान्तारः काननं क्लेशो"। "कनकं चम्पके हेम्नि धुस्तूरेऽपि निगद्यते"। इत्युभयत्रापि विश्वः। "दमनो वीरपुष्पयोः" इति धरणिः। पक्षे—अनुगतानां दक्षिणानामुदाराणां सदा सर्वदा गतिरागमनं तस्मै। [तादर्थ्ये चतुर्थी] यद्वा—अनुगता सेवका दक्षिणा व्यवहारकुशलाः सन्त्य तेषामागतिरा साकल्येन गतिर्निर्वाहो यस्मात्, विदुषस्यापि जनस्य पालनकर्तृत्वात्। श्रुतिसुखं कोमलं कोकिलवत् कृतं शब्दो यस्य तस्मै। [क शब्दे क.] कृतः कान्तानां स्त्रीणां रतरङ्गः सुरतरङ्गो येन तस्मै, अत एव विकासितः पल्लवः प्रहारो येन तादृशाय, अत एव सुरभिसुमनोभिः सुगन्धिपुष्पैरभिरामाय। यद्वा—सुरभयः ख्याताः सुमनसः पण्डितास्तैः। सर्वजनानां सुलभा पद्मा लक्ष्मीर्यस्य तादृशाय। विस्तारिता कनकस्य सुवर्णस्य सम्पत् येन तादृशाय। अतिक्रान्तो दमनको वीरो येन तस्मै. यद्वा—दमयतीति दमनः शत्रुः। उत्कलिका उत्कण्ठाप्राप्तां

यस्य च समरभुवि भुजदण्डेन कोदण्डं, कोदण्डेन शराः, शरैररिशिरः, तेनापि भूमण्डलं, तेन चाननुभूतपूर्वो नायकः, नायकेन कीर्त्तिः, कीर्त्या च सप्त सागराः, सागरैः कृतयुगादि-राजचरितस्मरणम्, अनेन च स्थैर्य्यम्, अमुना च प्रतिक्षण-माश्चर्य्यमासादितम्।

यस्य च प्रतापानलदग्धानां रिपुसुन्दरीणां करतलताड़न-भीतैरिव मुक्ताहारैः पयोधरपरिसरो मुक्तः।

यस्य च निशितनाराचजर्ज्जरितमत्तमातङ्गकुम्भस्थल-

---

सहस्रेण सङ्कुलाः। भ्रमरैः कामुकैर्ललाटालकैर्वा सङ्गताः। प्रवाली विद्रुमः, हारी मुक्तावली, तौ को यासां ताः। यद्वा—प्रकृष्टा वाला: केशास्तैरिव श्यो मनोहराः। विगतवयो यौवनं यासां ताः। ("दक्षिणे सरलोदारौ"। "नैधनं निधनं रतम्"। "लक्ष्मीः पद्मालया पद्मा"। "स्वर्णं सुवर्णं कनकम्"। "उत्कण्ठोत्कलिके समे"। "पद्म विद्रुमः पुंसि प्रवालः पुंनपुंसकम्"। "शिखरः कुन्तलो बालः"। "हारी मुक्तावली" इत्यष्टाध्यमरः। "पल्लवः स्यात् किसलये शिखरप्रकारयोरपि"। "सुरभिः सौरभे ख्याते वसन्ते पण्डितेऽपि च"। "स्मरः कामुके भृङ्ग-ललाटालकयोरपि" इति विश्वप्रकाशः। "वयो बाल्यादि पक्षी च यौवनं च क्वचित्रयः" इति शाश्वतः)।

मालादीपकेनाह—यस्य कन्दर्पकेतोः समरभुवि रणाङ्गणे भुजदण्डेन कोदण्डं धनुः समासादितम्। अत्र यथायथं लिङ्गभेदभेदयोः वचनभेदभेदयश्च। ("शरासनकोदण्डकार्मुकम्" इत्यमरः) पूर्वं नानुभूतोऽननुभूतपूर्वस्तादृशो नायकः कन्दर्पकेतुः। कृतयुगादि-राजानां प्रियव्रतसगरादीनां चरितं स्वेनैव तेजसा लोकप्रकाशनादि तत्स्मरणम्, अनेन स्मरणेन स्थैर्यम्, अमुना स्थैर्येणाश्चर्यं, स्मरणस्यानुविनाशित्वात्। "मालादीपकमार्थं चेत् यथोत्तरगुणावहम्"।

यस्य कन्दर्पकेतोः प्रतापानलदग्धानां रिपुसुन्दरीणां करतलेन ताडनं पत्युर्मरणो-त्तरमुरस्ताडनं तेन भीतैरिव मुक्ताहारैः पयोधरपरिसरो मुक्तः। उत्प्रेक्षालङ्कारः। "सम्भावना स्यादुत्प्रेक्षा" इति लक्षणात्। ("पयोधरभृः परिसरः" इत्यमरः)।

यस्य कन्दर्पकेतोः समर एव सागरस्तस्मिन् खड्गो रराजेत्यन्वयः। निशित-नाराचैस्तीक्ष्णबाणैर्जर्जरितानि शिथिलावयवानि यानि मत्तमातङ्गकुम्भस्थलानि

विगलित-मुक्ताफलनिकरदन्तुरितपरिसरे, पतत्पवरथे, रक्तवारि-सञ्चरदनेकक्काय-पलपुण्डरीकवाहिनीश्वतसमाकुले, नृत्यत्-कबन्धे, सुरसुन्दरीसमागमोत्सुकचारुभटाहङ्कारसम्भारभीषणे समरसागरे भिन्नपदातिकरितुरगरुधिराद्रेजयलक्ष्मीपादालक्तक-रागरञ्जित इव खड्गो रराज।

अथ कदाचिदवसन्नायां यामन्यां दधिधवले कालत्तपणक-ग्रासपिण्ड इव, निशायमुनाफेनपुञ्ज इव, मेनकानखमार्जन-

---

तेभ्यो विगलितैः सत्मुक्ताफलानां करैर्दन्तुरितो दन्तुरवदाचरितः परिसरो यस्य तस्मिन्। [ दन्त उन्नत उरच्। उन्नता दन्ता अस्य दन्तुरः, अस्मादाचारे क्विप्, क्तः टट् ] यद्वा—दन्तुरं विषमान्तरं तद्वदाचरितम्। ( "दन्तुरं वाच्यवद्विद्वद्दन्तुरे विषमान्तरे" इति विश्वप्रकाशः ) पतत्पवरथे पतद्वाणे। रक्तमेव वारि जलं तत्र सञ्चरदनेकक्काय-मनेककाल्लि उन्नतं पलं मांसं यस्मात् तत्पलं मांसयुक्तं तच्च पुण्डरीकं सितच्छत्रं च यत्र तादृशं यद्वाहिनीश्वतं सैन्यगणं तेन समाकुले। नृत्यत्कबन्धे नृत्यच्छिन्नमस्तकबोरे। सुरसुन्दरीणामप्सरसां समागमोत्सुकानां चारुभटानां योधा-नामहङ्कारोऽहमहमित्यस्य सम्भारेण भीषणे। वषट्कार इति निर्देशात् समुदायादपि कारः। यद्वा—अहङ्कारस्य गर्वस्य सम्भारेण भीषणे। ("भटा योधाश्च शौण्डीराः" ७ "कबन्धोऽस्त्री क्रियायुक्तमपमूर्द्धकलेवरम्" इति द्वयोरप्यमरः। "तरङ्गिणी च सेनायां वाहिनी परिकीर्त्तिता" इति विश्वः। "उत्पलं कुवलयरुहे। इन्दीवरे मांसयुक्ते" इति हैमः। "पुण्डरीकं सिताम्भोजे सितच्छत्रे च मेदुरे" इति विश्वप्रकाशः। "पवरथो वाणपक्षे" इति धरणिः ) पक्षे—पवरथः पक्षी। उत्पलमिन्दीवरम। पुण्डरीकं सिताम्भोजम्। कबन्धं जलम। वाहिनी नदी। ( "कबन्धमुदकं पाथः" इत्यमरः ) सुरसुन्दरी सख्यमेदयाकभटोऽपि। छेकानुप्रासाद्युपमाश्लेषरूपकोत्प्रेक्षालङ्काराणां यथासम्भवं सङ्करसंसृष्टी। ओजो गुणः। वैदर्भी रीतिः।

अथानन्तरं, स इति शेषः। कन्दर्पकेतु कदाचिदवसन्नायां समाप्तायां रजन्या-मष्टादशवर्षदेशीयाम् [ "ईषदसमाप्तौ कल्पब्देश्यदेशीयर्" इति देशीयः ] ईषद-समाप्ताष्टादशवर्षां कन्यां स्वप्नऽपश्यदित्यन्वयः। अवसन्नायामित्यनेन स्वप्नस्य मोघ-फलदत्वं ध्वनितम्; तदुक्तं गुरुणा—"अरुणोदयवेलायां दृष्टानि फलं भवेत्" इति।

शिनाशकले इव, मधुच्छत्रच्छायमण्डलोदरे, पश्चिमाचलोपधान-सुखनिलीनशिरसो राजतताटङ्के इव, शेषमधुभाजि चषके इव विभावरीवध्वाः, अपरजलधिपयसि शङ्खकान्तिकामुके मज्जति कुमुदिनीनाथके, शिशिरकर्दमितकुमुदधूलिमध्यबद्धचरणेषु षट्-चरणेषु, कलप्रलापबोधितचकिताभिसारिकासु सारिकासु, प्रबुद्धाध्ययनकर्मठेषु मठेषु, विभासरागसुखरकार्पटिकजनोप-गीयमानकाव्यकथासु रथ्यासु, सकलनिपीतनिशातिमिरमति-

---

एतादृशे कुमुदिनीनाथके चन्द्रेऽपरजलधिपयसि पश्चिमसमुद्रजले मज्जति सतीत्य-न्वयः। काल एव चषकस्तस्य दधिधवले पानपिण्डे इव; चषकस्य भक्षणार्थं दधिधवलः पिण्डो दीयते इति प्रसिद्धम्। निशा रात्रिः सैव यमुना तस्याः फेनपुञ्ज इव। मैनशलाकखण्डनार्थं शिलाशकले "झांवां" इति भाषायाम्। मधुच्छत्रस्य छत्राकस्य छायेव मधुच्छत्रच्छायं ["विभाषासेना—" इति क्लीबत्वम्] तद्वन्मण्डलीदरं मण्डलमध्यो यस्य तस्मिन्। पश्चिमाचलोऽस्तादिः, स एवोपधानं शिरोऽवलम्बनं, तत्र सुखेन निलीनं स्थितं शिरो यस्यास्तया विभावरीवध्वा रात्रिस्त्रिया राजततादङ्के इव रौप्य-वर्णमृगचर्मविशेषे इव "टैंडो" इति भाषायाम्। तस्यामेव शेषमधुभाजि पीतशेषमद्य-सहिते चषके पानपात्रे इव। शङ्खकान्तेः कामुकेऽभिलाषुके तुल्ये इव। ("चषकोऽस्त्री पानपात्रम्"। "दधानं तूपवङ्कटः"। "कामुके कमितानुकः" इत्यमरश्लिष्टेयं) उत्प्रेक्षालङ्कारः। शिशिरेण तुषारेण कर्दमितः कर्दमवदाचरितः कुमुद-धूलिषु मध्ये बद्धाचरणा यैस्तादृशेषु षट्चरणेषु भ्रमरेषु। ("शिशिरः स्यादृतौ भेदे तुषारे शीतलेऽपवत्" इति विश्वप्रकाशः। "षट्पदभ्रमरालयः" इत्यमरः) कलप्रलापोऽव्यक्तमधुरध्वनिभेदेन बोधिता अत एव चकिता अभिसारिका याभिस्तासु सारिकासु। ("व्यक्तलिङ्गी तु या याति सङ्केतं साऽभिसारिका" इत्यमरः) सारिकायाश्चतालव्यादिदन्त्यादित्वं, तदुक्तमुग्धबोधे—"स्त्रीलिङ्गोऽयं शारिः शकुनि-विशेषे तु दन्त्यालव्यः" इति। प्रबुद्धा अध्ययनकर्मठा अध्ययनशीला येषु तादृशेषु मठेषु कुवादिनिलयेषु। ["कर्मणि घटोऽठच्" इत्यठच्प्रत्ययः] ("कर्मशीलस्तु कर्मठः"। "मठश्च वादिनिलये" इति द्वयोरमरः) विभासरागेण रागविशेषेण सुखर-कार्पटिकजनैर्वस्त्रयाचकभिक्षुभिः, "कपड़िया" इति भाषाप्रसिद्धैरुपगीयमाना

तनोयस्तया वोढुमसमर्थेष्विव, कज्जलश्यामादृढमत्स्विव, कामिमिथुननिधुवनलोलादर्शनार्थमिवोद्ग्राविकाशतदानखिन्नेषु, विविधवन्यरतक्रीड़ासाक्षिषु, शरणागतमिवान्धीलीनं तिमिरमवत्सु, दुर्जनेष्विव दग्धस्नेहतया मन्दिमानमुपगतेषु, अतिव्रडेष्विव दशाऽन्तमुपगतेषु, विपन्नमदोत्खरेष्विव पात्रमात्रावशेषेषु, दानवेष्विव निशाऽन्तमध्वारिषु, अस्तांगारिशिखरेष्विव पत-

---

काव्यकथा यासु ताडयीषु रथ्यासु प्रतोलीषु। गानेऽनंतिपाटवं ध्वनयितुं मुखरशब्दप्रयोगः। ("रथ्या प्रतोली विथिरिखा" इत्यमरः) यमकालङ्कारः। प्रदीपेष्वंगविषेषु सत्स्वित्यन्वयः। अतितनोयस्तया अतिशयत्वेन सकलं निशीथं निशातिमिरं तद्वोढुमसमर्थेष्विव। निधुवनलीला सुरतक्रीडा। ("मैथुनं निधुवनं रतम्" इत्यमरः) तद्वोढ्रीवका पौवाश्रमनक्रिया, तस्याः श्रमे, तद्दानं विधानम्। विविधवन्यो मयूरादिवन्यो यत्र ताडयतक्रीडानां साक्षिषु साक्षाद्दृष्टृषु। शरणागतमिवान्धीलीनम् अधस्ताल्लीनं तिमिरमन्धकारमवत्सु रक्षत्सु। तथाच वराहः,—"नास्तां न भीता न दृष्टानताय विमुक्तमस्त्रा विपलायमानाः। क्षीणायुधा वाजिगतावतीर्णां स्तेते न वध्या न च पौडनीयाः॥ कुलैकतन्तुः शरणागता वा कृताञ्जलिर्यश्च पदेन तस्मिन्॥" इति। उत्तरत्र वध्या इत्यादौ वचनविपरिणामः। ("शरणं गृहरक्षिवोः"। "तमिस्रं तिमिरं तमः" इतिहलायुधोऽमरः) उत्प्रेक्षालङ्कारः। दुर्जनेष्विव दग्धस्नेहतया नष्टप्रेमत्वेन, मन्दिमानं मुहुरुत्कर्षेऽपि शिथिलताम्। ("स्नेहोऽनुरागयोरुक्ष्ये तैलेऽपि च निगद्यते" इति धरणिः) पक्षे—स्नेहस्तैलम्। मन्दिमानमल्पतेजस्त्वम्। अतिव्रडेष्विव दशाऽन्तमुपगतेषु। पक्षे—दशाऽन्तं वर्त्तिकाऽन्तम्। ("दशा वर्त्तिदंशा वयः" इति हारावली) विपन्नमदोत्खरेष्विव सर्वस्वदानादिना प्राप्तदारिद्र्येष्विव; एतच्च सत्पदेन ध्वनितम्; पात्रमात्रावशेषेषु हैमभाजनावशेषेषु। तथा च कालिदासः,—"शरीरमात्रेण नरेन्द्र! दृष्टस्त्वमाददे तोयमितिप्रवादितार्द्रः। आरण्यकाचार्यकलशप्रसूतैः स्तब्धेन तोयार इवावशिष्टः॥" इति। ("पात्रं तु भाजने योग्ये देहे तोरत्रयान्तरे" इति मेदिनीकरः) यथा—पात्रमात्रः। ("पात्रं स्त्रुवादौ पर्णे च राजमात्रांशे चेष्यते" इति विश्वप्रकाशः) पक्षे—पात्रं भाजनम्। दानवेष्विव निशाशब्दात् दृष्टसन्ध्योपरक्तगौरेषु। पक्षे—निशाऽन्तं गर्भं तन्मध्यवारिषु। ("निशा"

त्यतङ्केषु प्रदीपेषु, अनवरतमकरन्दविन्दुसन्दोहलुब्धमधुकर-निकुरुम्बझङ्कारमुखरितेषु, म्लानिमानमुपगच्छत्सु वासागार-कुसुमोपहारेषु, विगलत्कन्दैरलकैः प्रियविरहशोकाद्वाष्पविन्दू-निवोत्सृजतीषु, प्रियतमगमननिषेधमिव कुर्वतीषु वाचाल-तुलाकोटिभिश्चरणपल्लवैः, रजनिशेषसुरतभरपरिश्रमविगलित-केशपाशदरदलितमालतीमालापरिमललुब्धमधुकरनिकरपक्षा-निलनिपीतनिदाघजलशीकरासु, उद्वेल्लद्वलिकङ्कणझणत्कार-मुखरासु, नवनखपदसंसक्तकेशनिर्मोकवेदनाकृतशीत्कारविनि-

---

ऽस्तवस्त्यमदनम्" इत्यमरः) अस्तमिरिरसावसक्तक्किखरेष्विव। पतङ्गः सूर्यः। पक्षे—पतङ्गाः शलभाः। ("पतङ्गः शलभादित्यौ" इति विश्वः। "अस्तन्तु चरमः आश्मन" इत्यमरः) एतादृशेषु वासागारकुसुमोपहारेष्वित्यन्वयः। अनवरतं मकरन्दविन्दु-सन्दोहः पुष्परसमूहस्तेन लुब्धमधुकराणामलिलाषुकभ्रमराणां निकुरुम्बं यूथं तस्य झङ्कारेण रवविशेषेण मुखरितेषु शब्दायमानेषु। ("सन्दोहविसरव्रजाः"। "लुब्धो-ऽभिलाषुकस्तृष्णक्"। "निकुरुम्बं कदम्बकम्" इति विश्वप्यमरः) एतादृशीषु प्रियतमा-इत्यन्वयः। विगलत्कन्दैः पतत्कुन्दकुसुमैरलकैः। [करणे तृतीया] प्रियविरहेण भाविप्रियविरहेण शोकस्तस्माद्वाष्पविन्दूनिवोत्सृजतीषु, अनेन ब्रह्मिर्भवितेति; अत एव प्रियगमननिषेधमिव कुर्वतीषु। तदाह नारदः,—"अकालजेषु नृपतिर्विद्युद्भिर्जृम्भितेषु। उत्पातेषु विविधेषु समरार्थं तु न व्रजेत॥" इति। प्रवत्स्यत्पतिका नायिका। ("प्रवत्स्यति प्रियतमे प्रवत्स्यत्पतिकेष्यते" इति रसरत्नहारः) अनयोरुपेक्षयोः सङ्करः। वाचालास्तुलाकोटयो येषु तादृशेश्चरणपल्लवैरुपलक्षितासु। [उपलक्षणे तृतीया] सूचितमनेन ध्वनितम। ("व्याजल्पाकस्तु वाचालः"। "पादाङ्गदं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियाम्" इति हेमरत्नेऽमरः) रजनिशेषः पद्मविकास-कालस्तत्र सुरतभरस्तेन परिश्रमेण विगलितः केशपाशः केशकलापस्तस्य दरदलिता-नामोषदिकसितानां मालतीनां मालाम्लानां परिमलो जनमनोहरो गन्धस्तल्लुब्ध-मधुकरनिकरपक्षानिलेन निपीताः शोषिता निदाघजलशीकरा अम्बुकणा यासां तासु; पथिक-स्त्रियः रमाः। यत्—"रमते मैथुनं निद्रा सभ्यः प्राणदरापि षट्" इति, तत्रिवृत्त्यादिविषयम्। ("पाशः पक्षश्च हस्तश्च कलापार्थाः कचात परे"। "ईषदर्धे दरोऽस्त्रियम्"। "विगदीत्थे परिमलो गन्धे जनमनोहरे"। "स्त्रीनीवनिकरव्रातः"

र्गतदुग्धमुग्धदशनकिरणच्छटाधवलितभोगावासासु. पुनर्दैशंन-
पृच्छाविधुरसखीजनानुत्तरणवीक्ष्यमाणप्रियतमासु. क्षणदागत-
वैयात्यवचनश्रवणस्मारकग्रहणकचाटुव्याहृतिक्षणजनितमन्दाक्षासु,
शरद्दासरलक्ष्मीष्विव न-खालङ्कृतपयोधरासु. आसन्नमरणास्विव
जीवितेशपराभिमुखीषु. वसन्तवनराजिष्विवोत्कलिकाबहुलासु,
प्रियैरालिङ्ग्यमानासु कामिनीषु : आन्दोलितकुसुमकेसरे. केशरेणु-
मुचि रचितमधुरमणीनां रमणीनां, विकचकुमुदाकरे मुदाकरे
सङ्गभाजि, प्रियविरहितासु रहितासु सुखेन सुमेरामिव वर्षति,

---

इति चतुर्थंचमरः ) उद्देशद्दुनर्व्यञ्जिकड्डयस्य झणत्कारः शिञ्जितं तेन मुखरासु. अनेनापि शब्दितं ध्वनितम्। नवनखपदं राविशातं नखक्षतं तस्य संजातं कं॥स्त्रि-यौको निर्मोचनं तेन वेदना तया कृतः श्रोत्कारश्चाऽदिनिर्गताभिर्दुग्धमुग्धदशनकिरण-च्छटाभिर्धवलितो धवलीकृतो भोगावासो वासगृहं याभिस्तासु, दशनाकिरणच्छटा-मिश्रद्विहसिता। ( "मुग्धो वर्बरमुन्दरो" इति विश्वः। "भोगावासो वासगृहम्" इति हारावली ) प्रियतमाः प्रेयांसः। क्षणं कामोत्सवं ददातीति क्षणदा रात्रिस्तद्गतं वैयात्यवचनश्रवं धृष्टतावचनानि तत्स्मारकग्रहणकस्य चाटुव्याहृतिभिः क्षणं क्षणमात्रं जनितं मन्दाक्षं लज्जा यासां ताहशीषु। तथा च माघ.—"क्षणदा भूषणं पुंसः क्षमा लज्जेव योषितः। पराक्रमः परिभवे वैयात्यं सुरतेष्विव॥" इति। ( "चट् चाट् प्रिये वाक्ये"। "वैयात्यं धृष्टता मता" इति हारावली। "क्षणादिशेषोत्सवयोः क्षणः"। "मन्दाक्षं व्रीडया व्रीडा"। "व्याहार उक्ति-र्जल्पितम्" इति विश्वप्रकाशः ) शरच्छरदृतुः। न खेनाकाशेनालङ्कृताः पयोधरा मेघा यासु; "मेघनं मेघनानाम्" इतिवदाकाशभूषणानामाकाशस्येव भूषणत्ववर्णनम्। यद्वा—न खेऽलङ्कृता भूषिताः सञ्जाताः, अतिनीता इति यावत्, ताहशाः पयोधरा मेघा यासु; शरत्काले निर्जलत्वादनलङ्कृतत्वमित्यर्थः। पक्षे—नखेन तरक्षतं लक्ष्यते, तेनालङ्कृताः पयोधराः स्तना यासां ताहशीषु। ( "स्तोकनाम्नो पयोधरो" इत्यमरः ) जीवितेशो यमस्यापि पुरं संयमनी। पक्षे—जीवितेशः पतिः, तत्पुरं शरीरम्। ("वज्रमे अमरावलि च जीवितेशो धनागमे"। "पुरं पुरि शरीरे च गुग्गुलौ कवितः पुरः" इत्यमरश्यापि विश्वः ) वनराजिर्वनपरम्परा। उत्कलिकोद्गतशोरवः। ( "कलिका शोरवः पुमान्" इत्यमरः ) पक्षे—उत्कलिकोत्कण्ठा। ( "उत्कण्ठोत्कलिके समे"

समन्तादर्पके दर्पकेषुदहनस्य, दूरप्रसारितकोकप्रियतमाहते, माहते वहति; जघनमदनपुरतोरणेन, मदननगरमहानिधिकनकप्राकारेण, रोमावलीलतालवालेन, जघनचन्द्रमण्डलपरिवेषेण, त्रिभुवनविजयप्रशस्तिरोमावलीकनकपत्रेण, सकलहृदयवन्दिनिवासपरिखावलयेन, जगल्लोचनविहङ्गममालालासकशलाकागुणेनेव मेखलादाम्ना परिहृतजघनस्थलीम्;

---

दृत्यमरः) यमकेनाह—एतादृशे माहते वहतीत्यन्वयः। चान्दोखिनकुसुमकेसरे खन्धितपुष्पविशेषे। रचितेन मधुरा मधवो यासां ताहशीनां रमणीनां केशरेणमुखि केशरेण तत्प्रधानि पुष्पाणि खल्यन्ते तटीकारके। विकचानि विकसितानि च तानि कुमुदानि च कैरवाणि तेषामाकरे, एतादृशे सरसि सङ्गमाप्ति, अत एव मुदाकरे हर्षकारके। [मुदेरच्च मागुरिमते ठाप्] एतेन विशेषणद्वयेन श्रोतमन्दसुखस्पित्वं ध्वनितम्। विषयविरहितासु, अत एव सुखेन रहितासु. समन्तात् परितो दर्पकेषुदहनस्य कामबाणाग्निदर्पके समर्पके. अत एव सुर्मुरमिव तुषाग्निमिव वर्षति। ("सुर्मुरस्तु तुषानखौ" इति वैजयन्ती) कोकप्रियतमा चक्रवाकी। केसरे केशरे इत्यत्र खमेटयमकं, सोजराजेनोदाहृतं च—"शालं वहन्ती सुरतापनोदं शालं तल्लिहासुरतापनोदम। रथोभरथोभरसन्निकृष्टा खट्टाकखट्टाकखिलाटिकूटे॥" इत्यत्र शालं शालमिति खमेटयमकमिति वर्णितम्। इदं स्थूलमन्यपेतयमकम। केसर इति तात्पर्यमध्यपाठे त्विटमेव यमकप्रभाक्षम्—"अर्थे सत्यर्थभिन्नानां पदानां सा पुनः श्रुतिः। यमकम्। ("केसरो बकुले सिंह-सटायां पुष्पमञ्जरी" इति विश्वः। "किञ्जल्कः केसरोऽस्त्रियाम्"। "रेणुर्द्वयोः स्त्रियां धूलिः"। "मुस्ताोतिः प्रमटो हर्षः"। "व्याकोशविकचस्फुटाः"। "फुल्लश्वेते विकसिते"। "क्लीबे कुमुदकैरवे"। "खन्दर्पो दर्पजोऽनङ्गः"। "वधो रोप रधुर्द्वयोः"। "श्रोत्रसुखश्रवणवाक्" इत्यन्तस्यामरः) मेखलादाम्ना काञ्चीदाम्ना परिहृतजघनस्थलीमित्यन्वयः। [जानपदेति ङीप्] तोरणेन बहिर्द्वारेण। प्राकारेण वरणेन। आलवालेनाऽऽवालेन। "आला" इति भाषायाम्। परिवेषेण परिधिना। प्रशस्तिः प्रशस्तिवर्णः, सैव रोमावली. तस्याः कनकपत्रेण कनकखण्डेन पत्रेण. [प्राक्पदादिवादिः] यथा—ताम्रपत्रवत् कनकपत्रम्। सकलानां हृदयान्येव वन्द्यः प्रशंसकेषां निवासः कारा तत्परिखावलयेन, "खाई" इति भाषायाम्; सर्वेषां हृदयानि तत्रैव निवसन्तीति भावः। जगल्लोचनेति

इव विचित्रवनमालः, सहस्रकिरण इव सप्तपत्रस्यन्दनोपेतः, विरूपाक्ष इव सन्निहितगुहः शिवानुगतश्च, कामीव कान्तारोषरसानुगतः समदनश्च, श्रीपर्वत इव सन्निहितमल्लिकार्जुनः, नरवाहनदत्त इव प्रियङ्गुश्यामासनाथः, शिशुरिव क्षतधात्रीधृतिः, वासरारम्भ इव गैरिकारुणप्रभापाटलितवनराजिः, कृष्णपक्ष इव

---

क्षोऽपि कुमुदो दिगन्तः" इति शाश्वतः) पशुपतिरिव शिव इव नागनिःश्वासेन सर्पनिःश्वासेन समुत्थिता भूतिर्भस्म यस्य सः। पक्षे—नागनिःश्वासेन गजनिःश्वासेन समुत्थिता भूतिः सम्पत्तिर्यस्य सः। यद्वा—नागानां निधिस्थानस्थितसर्पाणां निःश्वासेनेत्यादि। जनार्दन इव विष्णुरिव विचित्रा वनमाला यस्य सः। ("श्रापादपद्मं या लम्बा वनमालेति सा स्मृता" इति) पक्षे—विचित्रा वनमाला वनपरम्परा यस्य सः। सहस्रकिरण इव सूर्य इव सप्त पत्राणि वाहनानि यस्मिन् तादृशः स्यन्दनः रथः तेन उपेतः। ("पत्रं वाहनपक्षयोः" इत्यमरः) पक्षे—सप्तपर्णो विषमच्छदः। स्यन्दनास्तनिम्बः। ("सप्तपर्णो विशालत्वक् शारदो विषमच्छदः"। "तिनिशे स्यन्दनो नेमिः" इत्युभयत्राप्यमरः) विरूपाक्ष इव शिव इव सन्निहितो गुहः कार्त्तिकेयो यस्य सः, शिवया पार्वत्या अनुगतश्च। पक्षे—सन्निहिता गुहा गह्वरं यस्य सः, शिवाभिर्धात्रीभिः क्रोष्ट्रीभिर्वा अनुगतश्च। ("शिवा गौरी शिवा क्रोष्ट्री भवेद्दासनखी शिवा" इति शाश्वतः। "देवखातबिले गुहा गह्वरम्"। "शिवा गौरीफेरवयोः" इत्युभयत्राप्यमरः) श्रीपर्वत इव सन्निहितो मल्लिकार्जुनो यस्य सः, मल्लिकार्जुनो नाम हरः। पक्षे—सन्निहितो मल्लिकार्जुनो यस्य सः। ("हपुषी मल्लिकायां विषु स्यात् केतकीफले" इति विश्वमेदिन्यौ। "मदीवर्णौ वीरतरुरिन्द्रदुः सकुभार्जुनः" इत्यमरः) कामीव कामुक इव कान्तानां रोषरसाभ्यामनुगतः, समदनश्च। पक्षे—कान्तारमूषरमा ऊषरभूमिस्ताभ्यामनुगतः, समदनः सधुस्तूरः। ("कान्तारं वर्त्म दुर्गमम्"। "ऊषवानूषरो दावप्यस्त्रियौ"। "धुस्तूरः कनकाह्वयः। मातृजो मदनश्च" इति विश्वप्यमरः) नरवाहनदत्तस्तन्नामको राजा तद्वत् प्रियङ्गुश्यामया तन्नामकस्त्रिया सनाथः। पक्षे—प्रियङ्गुः फलिनी, श्यामा रोचनी। ("प्रियङ्गुः फलिनी फली"। विश्वशौ रोचनी श्यामा" इति द्वयोरप्यमरः) "गोतविधारा" इति ख्यातम्। शिशुरिव बालक इव क्षता धात्री आमलकी धृतिरवष्टम्भो येन सः। पक्षे—धात्र्यपनीता। ("धात्री स्यादुपमातापि" इत्यमरः) वासरारम्भ इव गैरिकारुणप्रभया पाटलिता वनराजिर्वनपरम्परा यत्र सः।

बहुलतागहनः, कर्ण इवानुभूतशतकोटिदानः, भीष्म इव शिखण्डिमुक्तैरर्द्धचन्द्रैरार्चितः, कामसूत्रविद्याम इव मल्लनाग-घटितः कान्तारसामोदश्च, चिरण्यक्रञ्जिपुरिव शम्बरकुलाश्रयः, गैरिकव्याजाद्गविरथमार्गमार्गणार्थमिवारुणेनोपास्यमानः, शिखर-गतसूर्याचन्द्रमस्तया विस्तारितलोचनोऽगस्त्यमार्गमिवोदीक्ष-माणः, स्रस्तान्त्रजाल इव जरदजगरभोगैः, कुम्भकर्ण इव

---

("अव्यक्तरागस्तरुणः"। "श्वेतरक्तस्तु पाटलः" इति हैमोरभ्यमरः) गैरिकवदरुणस्य सूर्यसूतस्य प्रभा तया ("सूरसूनोऽरुणोऽरुणः" इत्यमरः) कृष्णपक्ष इव बहुलता कृष्णता तया गहनः। [भावे ल्युट्] ("बहुलः कृष्णचेऽन्यो त्रिषु च बहुला गवि" इति विश्वप्रकाशः। कोषे त्रिषु कर्णे। पक्षे—बहुलताभिर्गहनः सान्द्रः। ("वल्ली तु व्रततिर्लता" इत्यमरः) कर्ण इवानुभूतं शतकोटीना तत्कङ्काकथनाना दानं वितरणं येन सः। पक्षे—अनुभूतं शतकोटिना वज्रेण दानं खण्डनं क्षेदन येन स तादृशः। [दो अवखण्डने] ("शतकोटिः स्वधे शस्त्रः" इत्यमरः) भीष्म इव शान्तनव इव शिखण्डिमुक्तैरर्द्धचन्द्रैशदाख्यैर्बाणैरार्चितो व्याप्तः। पक्षे—शिखण्डी बर्हं तदस्ति यस्यां ते शिखण्डिनो मयूरास्तमुक्तैरर्द्धचन्द्रैरर्द्धमेचकाङ्कैः पक्षैः आचितः। अर्द्धचन्द्रेण तदा-कारयुक्ता लक्ष्यन्ते। ("शिखण्डस्तु पिच्छबर्हं नपुंसके"। "समौ चन्द्रकमेचकौ" इति हैमोरभ्यमरः) कामसूत्रविद्याम इव मल्लनागेन मुनिविशेषेण, पक्षे—गजविशेषेण घटितो रचितो युक्तश्च। ("मल्लनागोऽश्वमातङ्गौ वात्स्यायनमुनावपि" इति विश्वप्रकाशः) कान्तानां रसामोदो यद्वा रतिर्यत्र स तादृशः। पक्षे—कान्तारे दुर्गमस्मिन् कानने वा सामोदोऽतिसुगन्धः। चिरण्यक्राजपुर इव शम्बरो दैत्यविशेषस्तत्कुलाश्रयः। पक्षे—शम्बरो हरिणविशेषो जलं वा दक्षं वा। ("रङ्कुशम्बररोहिषाः"। "नीरदोशीरशु-शम्बरम्" इत्युभयत्राप्यमरः। "शम्बरं सलिले वित्ते बोडव्रतविशेषयोः। शम्बरो दैत्यहरिण-सस्यशैलाभिनामसु" इति विश्वप्रकाशः) गैरिकव्याजाद्गविरथमार्गस्य मार्गणार्थमन्वेषणार्थमिवारुणेनानूरुणोपास्यमानः। [मृग अन्वेषणे] शिखरगत-सूर्याचन्द्रमसतया ["देवताद्वन्द्व च" इत्यानङ्] विस्तारितलोचनो विकसितनेत्रो-ऽगस्त्यमार्गमुदीक्षमाण इव; यावदयमागच्छामि तावत् त्वमुपविशेत्युक्त्वा गतो मुनि-रायाति न वेति मार्गावलोकनमिति पुराणप्रसिद्धम्। जरदजगरभोगैर्जीर्णभुजगशरीरैः; स्रस्तान्त्रजालो विगलितान्त्रसमूह इव। ("अन्त्रं पुरीतत्"। "भुजगशरीरे भुजवांऽस

दन्तान्तरालगतवानरव्यूहः, पिण्डालक्तकरागाङ्कितपादपङ्क्ति-सूचित-सञ्चरित--अचीपतिवारविलासिनीसङ्केत--केतकीमण्डपः, अकुलीनोऽपि सदंशभूषितः, दर्शिताभयोऽपि मृत्युफलदायी, सप्रस्थोऽप्यपरिमाणः, सनदोऽपि निःशब्दः, भौमोऽपि कौचक-सुहृत्, पिहिताम्बरोऽप्युल्लसदंशुको विन्ध्यो नाम महागिरि-रदृश्यत।

---

दृश्यभो" इति द्वयोरप्यमरः) कुम्भकर्णं इव दन्तान्तराले दशनान्तराले गतो वानरव्यूहो यस्य स तादृशः। पक्षे—दन्तः कटकः सानुतिर्य्यग्विनिर्गतः शिलाविशेषो वा, तदन्तरालगतवानरयूथः। ("दन्तो गिरिनितम्बे च दशने सानुनि श्रुतः" इति विश्वः। "दन्तकास्तु बहिस्तिर्यक्पर्वताद्रिःसृता गिरेः" इति हेमः) पिण्डी-भूतमलक्तकं पिण्डालक्तकं तद्रागेणाङ्कितानां पादानां चरणानां पङ्क्तिभिः परम्पराभिः सूचितं सञ्चरितं सञ्चरणं येषु [भावे क्तः] तादृशाः अचीपति-वारविलासिनीनामुर्वश्यादीनां सङ्केतकेतकीमण्डपा यस्मिन् सः। विरोधाभासे-नाह—अकुलीनोऽपि निन्द्यगोत्रोऽपि सदंशैर्नीत्तमकुलैर्न भूषितो मण्डित इति विरोधः; न को पृथिव्यां लोकोऽकुलीनोऽल्पत्वात्, शोभनैर्वंशैर्वेणुभिरलङ्कृत इति परिहारः। दर्शितमभयं येन सः, मृत्युजनकं फलं दातुं शीलमस्य तादृश इति विरोधः; दर्शिता अभया हरीतकी येन सः, मृत्युफलं महाकालफलं कदलीफलं वा दातुं शीलमस्य तादृगिति परिहारः। ("अभया त्वभया पथ्या" इत्यमरः। मृत्युफलं महाकाले कदल्यां मृत्युफल्यपि" इति विश्वः) सप्रस्थः परिमाणविशेष-विशिष्टः, अपरिमाणः परिमाणरहित इति विरोधः। ("कुडवः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक्" इत्यमरः) सप्रस्थः ससानुरित्यविरोधः। ("सानुः प्रस्थः सानुरस्त्रियाम्" इत्यमरः)। सदेन शब्देन सहितः सनदो निःशब्द इति विरोधः। [णद अव्यक्ते शब्दे] नदेन शीघ्राख्यनदेन सहितो निःशब्द इत्यविरोधः। भौमोऽपि युधिष्ठिरानुजोऽपि कौचकसुहृत् तन्नामविराटराजश्यालकसुहृत्, विराटगृहावस्थितः कौचकः पाञ्चाल्यां साभिलाष इति भौमेन हत इति भारते प्रसिद्धमिति भौमस्य कौचकसुहृत्त्वं विरोधः; भौमो भयानकः, कौचका वंशविशेषास्तेषां सुहृत्। ("वेणवः कौचकाश्चैते शुषिलोऽतनिलोऽतनाः" इत्यमरः) पिहिताम्बरश्छादितवस्त्रः, उल्लसत् स्फुरन्मांसलं वस्त्रं यस्य स इति विरोधः। ("चेलं वसनमंशुकम्" इत्यमरः) पिहितमाच्छादितमम्बरमाकाशो येन सः; उल्लसन्तः स्फुरन्मांसा अंशवः एवांशुकाः

यस्य प्रव्रूढगुल्मतयेव दृश्यमानबहुधातुविकारः, साधुरिव सानुग्रहप्रचारप्रकटितमहिमा, मीमांसान्याय इव पिहित-दिगम्बरदर्शनः।

यस्य हरिवंशैरिव पुष्करप्रादुर्भावरमणीयैः, राशिभिरिव मीनमिथुनकुलीरसङ्गतैः, करणैरिव शकुनि-नाग-भद्र-बालव-कुलोपेतैर्देवखातैरुपशोभितोपान्तः।

---

किरणा यस्य सः इति परिहारः। [स्वार्थे कः] ("अम्बरं व्योम्नि वाससि।" "किरणोऽस्त्रियुखांशुः" इत्युभयत्राप्यमरः)।

श्लेषेणाह—यो विन्ध्यः प्रव्रूढगुल्मतया प्रव्रूढस्तम्बतयेव दृश्यमानो बहुधातूनामनेक-गैरिकादीनां विकारो यस्य तादृक्। ("अपकाण्डे स्तम्बगुल्मौ"। "धातुर्मनःशिलाद्यटेः" इत्युभयत्राप्यमरः) पक्षे—प्रव्रूढगुल्मतया प्रव्रूढप्ररोहतया दृश्यमानो बहुधातूनां रसादीनां विकारो यस्य सः। ("गुल्मस्तु प्ररोहा पुंसि" इत्यमरः। "रसा-स्रक्मांसमेदोऽस्थि-मज्जशुक्राणि धातवः। सप्तैव दश चैकेषां रोमत्वक्स्नायुभिः सह॥" इति हैमः। मता इति श्लेषोऽत्र) साधुरिव सानुग्रहः सकृपः प्रचारस्तरणं तेन प्रकटित उद्योतितो महिमा स्वोत्कर्षो येन सः। पक्षे—सानुषु शिखरेषु यहाणां सूर्यादीनां प्रचारेण भ्रमणेन प्रकटितो महिमौन्नत्यं येन सः। मीमांसान्याय इव तच्छास्त्रमिव पिहितं तिरोहितं दिगम्बरदर्शनं दिगम्बरमतं येन सः। पक्षे—पिहितं छादितं दिगम्बरयोर्दिशाकाशयोर्दर्शनं येन सः।

यो विन्ध्यो देवखातैरुपशोभितोपान्त इत्यन्वयः। हरिवंशैरिव पुष्करप्रादुर्भाव आख्यानविशेषतेन, पक्षे—पुष्कराणां कमलानां जलानां वा प्रादुर्भावेण रमणीयैः। ("सहस्रपत्रं कमलं पुष्करान्योरुहाणि च"। "सलिलं कमलं जलं पुष्करं सर्वतोमुखम्" इत्युभयत्राप्यमरः) राशिभिरिव ज्योतिःशास्त्रप्रसिद्धैर्मेषादिराशिभिरिव मीनो मिथुनं कुलीरः कर्कटस्तैः सङ्गतैः। पक्षे—मीनमिथुनं कुलीराश्च तैः सङ्गतैः। करणै-रिव ज्योतिषागमविशेषैर्बवादिकरणैरिव शकुनि-नाग-भद्र-बालवानां तत्संज्ञकानां कुलैः समुदायैरुपेतैः। पक्षे—शकुनिः पक्षी नागो गजः सर्पो वा भद्रो मुस्ता बाल-वकुलो बकुलकेसरः, अथवा—बालं क्षौमं वकुलः केसरस्तैरुपेतैः। ("शकुनि-पक्षिशकुनि-शकुनशकुनाहिजाः"। "मुस्ता मुस्तकमस्त्रियाम्। स्याद्भद्रमुस्तकः"। "बालं क्षौमेरवांछोदीच्यम्"। "अथ केसरे वकुलः" इति चतुर्ष्वप्यमरः)।

यस्य कुसुमविचित्राभिः, वंशपत्रपतिताभिः, सुकुमार-ललिताभिः,पुष्पिताग्राभिः, शिखरिणीभिः, प्रहर्षिणीभिर्लताभि-र्दर्शितानेकवृत्तविन्यासः ।

यस्य मदकलकलहंससारसरमितोद्भ्रान्तभाःकूटविकटपुच्छ-च्छटाव्याधूतविकच--कमलखण्डविगलित-मकरन्दबिन्दुसन्दोह-सुरभितसलिलया, सायन्तनमज्जन-पुलिन्दराजसुन्दरी-नाभि-मण्डलनिर्पीतसलिलया, मदमुखरराजहंसकुलकोलाहलमुख-रितकूलपुलिनया, तटनिकटमत्तमातङ्गगण्डपिण्डविनिर्गतमद-धारास्तवकितसलिलया तीरप्ररूढ़-केतकीकाननविपतित-

---

यो विन्ध्यो लताभिर्दर्शितानेकवृत्तविन्यास इति सम्बन्धः । कुसुमैर्विचित्राभि-र्वंशपत्रेषु पतिताभिः सुकुमाराश्च ललिताश्च ताभिः पुष्पितानि सञ्जातपुष्पाण्यग्राणि यासां ताभिः शिखरिणीभिः शिखरमयं तट्टीभिः सारीभिरित्यर्थः, प्रहर्षिणीभिः प्रकर्षेण हर्षकारिणीभिः [ चलभाविनयार्थोऽत्र क्तिः ]। पक्षे—तत्तदभिधानै-श्छन्दोभिः। "स्त्री स्त्री गविदशयतिः प्रहर्षिणीयम"। "रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी"। "नयमाहितो स्त्री कुसुमविचित्रा"। "कुमारललिता जसौ ग्"। "दिक्षनि वंशपत्रपतितं भरनभनलगे"।

पुनरनुप्रासेनाह—यो विन्ध्यो रेवयोपगूढ इत्यन्वयः। मदेन कलमव्यक्तमधुरं कलहंसानां कादम्बानां सारसानां पुष्कराख्यानां रुतितं शब्दस्तेनोद्भासा भाःकूटा मध्यविशेषास्तेषां विकटपुच्छच्छटाभिर्व्याधूतविकचकमलखण्डादिगलितमकरन्दबिन्दु-सन्दोहेन सुरभितसलिलया। ("कादम्बः कलहंसः स्यात्"। "पुष्कराह्वस्तु सारसः" इत्यमरव्याख्यायाम रः। "भाःकूटः कथ्यते मौल-भेदे शैलान्तरेऽपि च" इति विश्वप्रकाशः। "भट्की" इति भाषायाम ) सायन्तने सायङ्कालिके [ "सायं चिरम्" इत्यादिना ष्ट्युट्तुट्यामसञ ] मज्जने पुलिन्दराजसुन्दरीणां शबराङ्गनानां नाभिमण्डलैर्निर्पीतसलिलया। मदमुखरराजहंसकुलस्य कोलाहलः कलकलशब्देन मुखरितं कूजनशीलं यस्यास्तया। ("राजहंसास्तु ते चञ्चु-चरणैर्लोहितैः सिताः"। "कोलाहलः कलकलः"। "कूलं रोधश्च तीरं च"। "तोयोत्थितं तत् पुलिनम" इति चतुर्वर्गसमरः। कोषे तटित्यनेन तटम ) तटनिकटमत्त-मातङ्गगण्डपिण्डविनिर्गतमदधाराभिः स्तवकितं सञ्जातस्तवकं सलिलं यस्यास्तया।

धूलिनिकुरम्बजातसैकतसुखोपविष्टतरुणसुरमिथुनानिधुवनलीला-परिमलसाच्चिक्यलोपवनया, तटाटवीनिकटनिपतितजम्बूखण्ड-मण्डपावस्थितजलदेवताऽवगाह्यमानतोयया, तीरप्ररूढवेतस-लताभ्यन्तरलीनदात्यूहव्यूहमदकलकुहकुहाऽऽरावकौतुकाकृष्ट-सुरमिथुनसंस्तूयमानाभोगया, उपकूलसञ्जातनलनिकुञ्जपुञ्जित-कुलायकुक्कुटघटाघूत्कारभैरवतारया, जलमानुषीमृदित-सुकुमारतीरया, उपवनवातान्दोलिततरलतरङ्गया, नल-

("गण्डः चटी मटी दानम्" इत्यमरः) तीरपरूढवेतसीकाननेनिपतितधूलिनिकुरम्बं समूहेन जातं यत् सैकतं तत्र या सुखोपविष्टतरुणसुरमिथुनानिधुवनलीला तस्यां परिमलो विमर्दजन्मा जनमनोहरो गन्धस्तत्साच्चिक्यं कृतोपवनं तीरप्रदेशविभवनं यस्यास्तया। उपवनस्य परिमलसाच्चिक्यवर्णनेन सर्वथा जनमनोहरादित्यं ध्वन्यते। यत्र सैकतशब्दप्रयोगस्तत्सदृशे औपचारिकः। ("मैथुनं मिथुनं रतम्"। "विमर्दोत्थे परिमलो गन्धे जनमनोहरे"। "आरामः स्यादुपवनं क्रीडं वनमेव यत्" इति विश्वप्यमरः) तटेऽटवी वनं तस्या निकटे निपतितानि जम्बूखण्डानि तेषां मण्डपेष्ववस्थितजलदेवताभिरवगाह्यमानतोयया। ("अटव्यरण्यं विपिनं गहनं कानने वनम्" इत्यमरः) तीरप्ररूढवेतसलताऽभ्यन्तरलीनदात्यूहव्यूहः कालकण्ठकसमूहस्य मदकलो यः कुहकुहाऽऽरावः कुहकुहशब्देन कौतुकं तदाकृष्टसुरमिथुनैः संस्तूयमान आभोगः परिपूर्णता यस्यास्तया। ("दात्यूहः कालकण्ठकः"। "आरवाराबसंराबविरावाः"। "आभोगः परिपूर्णता" इति विश्वप्यमरः)। उपवनोपभोग इत्यपि पाठः। उपकूल [सामीप्येऽव्ययीभावः] तत्र सञ्जातो नलनिकुञ्जो जलादिच्छादितो देशस्तत्र पुञ्जितः पुञ्जवदाचरितोऽनेक इत्यर्थः, कुलायो नीडं यस्याः सा चासौ कुक्कुटघटा कुक्कुटसमूहस्तस्या घूत्कारेण ताडशशब्देन भैरवं भयानकं तीरं यस्यास्तया। "शैलोपशल्यनिपतद्रथनेमिधारा" इत्यादौ उपशल्यशब्दस्थाने इवात घटाशब्दश्च समुदाये प्रयोगो भाक्तः। ("गण्डस्तु चमनः पोटगलः"। "निकुञ्जकुञ्जौ वा क्लीबे लतादिविहितादरे"। "कुलायो नीडमस्त्रियाम्"। "कुक्कुटश्चरणायुधः"। "अथ भैरवम्। दारुणं भीषणं भीमं घोरं भीमं भयानकम्" इति पञ्चखण्डमरः) जलमानुषीमृदितसुकुमारतीरया, वनमानुषवज्जलमानुषः प्राणिविशेषः। ["मानेरङ्गो विधयात्" इति ङीष्] उपवनवातान्दोलिततरलतरङ्गया। एतेनात्र

निकुञ्जपुञ्जनिविष्टावकोटककुटम्बिनीनिरीक्ष्यमाणार्द्धशफरया, पोताधानलुब्धकोयष्टिकस्कभनभीमवेतसवनया, तरलतरङ्गमालासञ्चरदुद्दण्डपालदर्शनधावदतिचपलराजिलराजिरञ्जितोपकूलसलिलया, कणाटोरमिथुनमैथुनदर्शनोपजातनिधिग्रहणकौतुक-किरातशतखन्यमानतोरया, क्रुङ्यैव दर्शितमुखविभङ्गया, मत्तयेव स्खलितगत्या, दिनारम्भलक्ष्म्येव वर्द्धमानवेलया, भारतसमरभूम्येव नृत्यत्कबन्धया, प्रावृषेव विजृम्भमाणशतपत्र-

---

वाते गुणत्रयं वर्णितम्; तेन कामिनां सर्वदा सुखकारिताऽस्य ध्वनितां। मलनिकुञ्जपुञ्जे निविष्टोऽवकोटको वकस्तत्कुटुम्बिनी स्त्री तया निरीक्ष्यमाणोऽर्द्धशफरो दण्डपाली यस्यां तथा। ("बकोऽवकोटकश्चाथ बलाका तु बकी स्मृता"। "दण्डपालोऽर्द्धशफरः" इति द्वयोरपि द्वारावली) पोताधानं क्षुद्राण्डमत्स्यग्रहणसत्र क्षुद्रकोयष्टिकस्य टिट्टिभकस्य स्कभनं शब्दलेन भीमं वेतसवनं यस्यास्तया। [स्कभः स्तौतो धातुरनेकार्थत्वाच्छब्दार्थः] ("क्षुद्राण्डमत्स्यमद्गातः पोताधानम्"। "कोयष्टिकष्टिट्टिभकः" इति द्वयोरप्यमरः) तरलतरङ्गमालायां सञ्चरद्दण्डपालो मत्स्यविशेषस्तद्दर्शनेन धावदतिचपला या राजिलराजिर्दुण्डुभसमूहस्तेन रञ्जितमुपकूलसलिलं यस्यास्तया। ("भवेद्दण्डपालस्तु सर्पमत्स्यप्रभेदयोः" इति विश्वप्रकाशः। "समौ दात्यूहदुण्डुभौ" इत्यमरः) कणाटोरः खञ्जनस्तस्य मैथुनदर्शनेनोपजातं निधिग्रहणकौतुकं येषां तादृक्किरातानां शतेन खन्यमानतोरया। ("कणाटोरः। खञ्जरीटस्तु खञ्जनः" इति द्वारावली। "कौतूहलं कौतुकं च"। "भेदाः किरातशबर-पुलिन्दा म्लेच्छजातयः" इति द्वयोरप्यमरः) तथा च वराहमिहिरः,—"तस्मिन् निधिर्भवति मैथुनमेति यस्मिन् यस्मिन् पुनर्वमति तत्र तलेऽस्ति काचः। अङ्गारमप्यपटिग्रन्ति पुरीषपिण्डस्य तत्कौतुकाय नयनस्य खनेऽविवेकः॥" इति। वसन्तराजोऽपि—"अङ्गारखण्डं किल भूमिभागे तस्मिन् भवेत् यत्र करोति विष्ठाम्। यत्राम्बुनो खञ्जनको विधत्ते रतं भवेत् तत्र महानिधानम्॥" इति। क्रुङ्यैव दर्शितो सुखस्य वदनस्य विभङ्गो ओष्ठभ्रुकुटीविकारादिर्यया। पक्षे—मुखविभङ्गो निःसरङ्गतरङ्गो यथा। ("सुखं निःसरणास्रयोः" इति धरणिः। "भङ्गस्तरङ्ग ऊर्मिर्वा" इत्यमरः) मत्तयेव स्खलिता गतिर्यस्यास्तया। पक्षे—स्खलिता तिर्यक् गतिः प्रवाहो यस्यास्तया। दिनारम्भलक्ष्म्येव वर्द्धमाना वेला कालो यस्यां तथा। पक्षे—

अपि च—

उत्कर्णोऽयमकाण्डचण्डिमपटुः स्फारस्फुरत्केसरः
क्रूराकारकरालवक्त्रविकटः स्तब्धोर्ध्वलाङ्गूलभृत्।
चित्रेणापि न शक्यतेऽभिलिखितुं सर्वाङ्गसङ्कोचनात्
चौत्कुर्वद्गिरिकुञ्जकुञ्जरशिरःकुम्भस्थलस्थो हरिः" ॥

अनन्तरं नीचदेशनद्येव न्यग्रोधोपचितया, उत्तरगोग्रहसमरभूम्येव विजृम्भमाणहरिबलया, मरुदेशटक्कायाल्येव घनसारसार्थवाहिन्या, विदग्धजनमधुपानगोष्ठ्येव नानाविटपीतासवया, नलकूबरचित्तहरित्येव सततधृतरम्भया, मत्तमातङ्गगत्येव घण्टारवावेदितमार्गया, सदीश्वरसेवयेवादूरोन्नतबहुफलया, विराटलक्ष्म्येवानन्दितकीचकशतया, विन्ध्याटव्या कतिचित् पदानि गत्वा कामिन इव मदनशलाकाङ्कितस्य जम्बूवृक्षस्य शीतलच्छायायां विश्रश्राम।

---

तादृक्, लाङ्गूलं पुच्छः, तं बिभर्त्ति इति तादृक्, दंष्ट्राकोटिभिर्विशङ्कटं बहत्, वाक्यकुहरं मुखगर्भो यस्य तादृक्, उत् बहो, कर्णौ यस्य सः तादृशः, सटामुत्कटां कुर्वन् क्रूराकृतिः केसरी सिंहः, वारिपतौ गजवरे, क्रमं पादविन्यासं, कुरुते पश्य; ["पश्य मृगो धावति" इत्यादाविवात्र क्रियायाः कर्मत्वम्] ("पुच्छोऽस्त्री लूमलाङ्गूलम्"। "विशङ्कटं पृथु बहत्" इति द्वयोरप्यमरः। "सटा जटाकेसरयोः" इति हैमः)। स्वभावोक्तिरलङ्कारः, "स्वभावोक्तिस्तु तस्यैव जात्यादिरूपस्य वर्णनम्" इति लक्षणात्। शार्दूलविक्रीडितं वृत्तम्; "सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्" इति लक्षणात्।

उत्क्रममाणं वर्णयित्वा स्नानगजं वर्णयति, उत्कर्ण इति।—उत्कर्णः, अकाण्डचण्डिमपटुः, स्फारं बहु, स्फुरन्तः केसरा यस्य तादृशः, क्रूराकारं करालं वक्त्रं मुखं, तेन विकटो भयानकः, ऊर्ध्वं निश्चलम्, ऊर्ध्वमुत्थितं, लाङ्गूलं बिभर्त्ति तादृक्, चौत्कुर्वन्, गिरिकुञ्जकुञ्जरशिरःकुम्भस्थलस्थोऽयं पुरावर्ती, हरिः सिंहः, सर्वाङ्गसङ्कोचनादिवेत्यभिलिखितुं न शक्यते। अत्र शिरःपदमधिकम्। ("तुरङ्गसिंहयोः स्कन्धकेशेषु वकुलद्रुमे। पुन्नागहरिते सिंहस्के केसरः स्यात्" इति हैमः)।

अत्रान्तरे भगवानपि मरीचिमाल्यातपक्लान्तमत्तमहिष-

अनन्तरं सिंहावलोकनानन्तरं, विन्ध्याटव्या विन्ध्यारण्येन, कतिचित् पदानि गत्वा स्वामिन इव मदनशलाकाऽङ्कितस्य जम्बूवृक्षस्य शीतलच्छायायां विश्रमामित्यन्वयः। ("मदनशलाका सारिवां पाठशालिनी" इति हारावली) पक्षे—मदनशलाका कामोद्दीपको वर्त्तिविशेषः, ("मदनशलाका कामो सिड्डीषधमप्यर्थं वदति" इति भर्गः। "स्यान्मदनशलाकाऽपि सार्व्या कामोद्दीपौषधौ" इति विश्वप्रकाशः) नख-क्षतमिति केचित्। सौषदैन्यनष्टेव मिलन्मानसेव, न्यग्रोधौघःप्रदेशावरोधनं, तेनोपचितया वृद्धया; पक्षे—न्यग्रोधैरेः, उपचिता तया, ("न्यग्रोधो बहुपादटः" इत्यमरः)। उत्तरगोग्रहसमरभूम्येव विजृम्भमाणो वृद्धत्वलोऽर्जुनः यस्यां तया; ("उत्तरस्तु विराटस्य तनये दिग्गि चोत्तरे" इति विश्वप्रकाशः) पक्षे—वृद्धत्वलो धवनश्च यस्यां तया। ढक्काया ढक्काध्वनेः, यात्रा गमनं ढक्कायात्रा, मरुदेशस्य ढक्कायात्रा तयैव, घनो मेघः, तत्सारः पानीयं, तदर्थं साथः समूहः, तदादिनी तत्प्राविका तया; यद्वा—ढक्केत्यनेन तद्वनिः, सा यात्रा यस्य सः तयैव; तदुक्तमुदकं क्रूपादित्यवरूपरूढत्या; यत्नत पूर्ववत्; ("गमनोत्सवयोर्यात्रा" इति विश्वः) मरुदेशे जलार्थिनो ढक्काध्वनिश्रवणाज्जलमुद्गतमस्मीरिति निश्चया प्रयान्तीति प्रसिद्धम्; पक्षे—घनसारः कर्पूरं, पुष्पफलहीनः अरलीवृक्षसमानाकारपत्रः क्षुपभेदो वा, ("घनसारस्तु कर्पूरे क्षुपभेदे जलेऽपि च" इति विश्वः) ढक्कायेति त्वपपाठः। ["असंज्ञात्वात् ङ्याप्योः संज्ञाच्छन्दसोः" इत्यस्याप्रवृत्तेः] विदग्धजनमधुपानगोष्ठीव नानाविटैरनेकधिङ्गैः, पीत आसवो मद्यं यस्यां तादृश्या; ("धिङ्गः पाल्लविको विटः"। "मैरेयमासवः शौण्डः" इति हयीरत्नमरः) पक्षे—नानाविटपिषु इतं जातम्, आसवं लाक्षादिकं यस्यां तया। नलकूवरः कुबेरसुतः, तस्मिन्नुत्सव इव ततं धृता रम्भा तत्प्रतिकाऽप्सरसी यया तादृश्या; ("अस्येत्यनुचरो" पुनस्तु नलकूवरः" इति कुबेरप्रकरणेऽमरः) पक्षे—ततं धृता रम्भा कदली यया, ("कदली वारणबुसा रम्भा मोचाऽंशुमत्फला" इत्यमरः)। मत्तमातङ्गमल्लेव घण्टाया रवः शब्दः, तेनाविदितमार्गेण; पक्षे—घण्टारवा वृक्षभेदः, ("घण्टारवा तु मधुपुत्रिका" इत्यमरः)। सदोन्मत्तसेवयेवाङ्गीकृतानि बहूनि बहुविधानि भूयांसि वा, फलानि यस्यां तया; पक्षे—कदूरं प्रोक्तम्, बहूनि बहूनि घनाद्यनिष्टनिवारकादीनि फलानि यस्यां तया। विराटच्छत्रायानन्दितं कीचकानां तच्छ्यालानां, भृतं यया; पक्षे—कीचका वंशविशेषाः, ("वेणवः कीचकाश्चैते स्वनन्त्यनिलपूरिताः" इत्यमरः)।

लोचनपाटलमण्डलश्चरमाचलशृङ्गमारुरोह। ततो मकरन्दः फलमूलान्यादाय कथं-कथमपि तमभिनन्दिताहारपरिचयमकार्षीत्, स्वयं च तद्भुक्तशेषमशनमकरोत्।

अथ तामेव प्रियतमां हृदयफलके सङ्कल्प्य तूलिकया लिखितामिवावलोकयन् निस्यन्दकरणग्रामः कन्दर्पकेतुर्मकरन्द-विरचितपल्लवशयने सुष्वाप।

अथार्द्धयाममात्रावखण्डितायां यामवत्यां तव जम्बूतरु-शिखरे शुकसारिकयोर्मिथः कलहायमानयोः कलकलं श्रुत्वा कन्दर्पकेतुर्मकरन्दमुवाच—"वयस्य! शृणुवस्तावदेतयो-रालापम्" इति।

ततः सारिका प्रकोपतरलाक्षरमुवाच—"कितव! सारि-

---

चवालरैऽखिलचक्षुरे, आतपक्लान्तमत्तमहिषलोचनवत् पाटलो मण्डलो यस्य तादृक्, मरीचिमाली सूर्यः, चरमाचलशृङ्गमस्तगिरिशिखरम्, आरुरोह। ("श्वेत-रक्तस्तु पाटलः"। "अस्तस्तु चरमः आश्रत्" इति द्वयोरप्यमरः)। ततोऽस्तगमनोत्तरं, मकरन्दः फलमूलान्यादाय तं कन्दर्पकेतुम्, अभिनन्दिताहारपरिचयमकार्षीत्, स्वयं च तद्भुक्तशेषमशनमकरोत्।

अथ फलाद्यशनोत्तरं, हृदयफलके हृदयपट्टे, सङ्कल्प्य तूलिकया कूर्चिकया, लिखितां तामिव स्वप्रहृष्टामेव, प्रियतमामवलोकयन् ध्याने पश्यन्, निस्यन्दकरणग्रामो निरुद्धसकलेन्द्रियः, कन्दर्पकेतुर्मकरन्दविरचितपल्लवशयने सुष्वाप। ("अथ तूलिका कूर्चिका"इति हैमः)। नक्तव्रतकन्दमूलाद्यशनपल्लवशयनशयनेन निशो तपश्चरणं ध्वनितम्।

निशेः सद्यः फलदातृत्वं दर्शयति, अथेत्यादिना।—अथ शयनोत्तरम्, अर्द्धयाममात्रावखण्डितायां विभावर्यां तव जम्बूतरुशिखरे तस्मिन् जम्बूवृक्षाग्रे, मिथः कलहायमानयोः शुकसारिकयोः कलकलं श्रुत्वा कन्दर्पकेतुर्मकरन्दमुवाच। ("मिथोऽन्योऽन्यं रहस्यपि"। "द्वौ यामप्रहरौ समौ" इत्युभयत्राप्यमरः)। किमित्याह, वयस्येति।—वयस्यैतयोरालापं तावच्छृणुव इति।

ततः कलहानन्तरं, सारिका प्रकोपतरलाक्षरं [क्रियाविशेषणम्] उवाच—कितव!

काऽन्तरमन्विष्य समागतोऽसि ? कथमन्यथा राविरियतो तव ?" इति । तच्छ्रुत्वा शुकस्तामवादीत्—"भट्टे ! अपूर्वाऽस्य कथा मया श्रुता प्रत्यक्षीकृता च, तेनायं कालातिपातः" । अथ समुपजातकुतूहलया सारिकयाऽनुरुध्यमानः कथयितुमारेभे ।

"अस्ति सुधाधवलैः, बृहत्कथारम्भैरिव शालभञ्जिकोपेतैः, वृत्तैरिव समाण्डवकक्रीडितैः, करियूथैरिव समत्तवारणैः, सुग्रीवसैन्यैरिव सगवाक्षैः, बलिभवनैरिव सुतलसन्निवेशैः, विश्रमभिरुपशोभितम् ; धनदेनापि प्रचेतसा, अजापालेनापि

---

भूर्त्तं !, सारिकाऽन्तरमन्विष्य, अन्वेषणेन तया सह सम्बन्धो लक्ष्यते ; समागतोऽसि ? अन्यथा सारिकाऽन्तरसम्बन्धाभावे, तवेत्यस्य तदाममने लक्षणा ; इयती रात्रिरिति । तच्छ्रुत्वा शुकस्तां सारिकाम्, अवादीत्—भट्टे ! अपूर्वां कथा श्रुता प्रत्यक्षीकृता च = कथायाः ग्रन्थबन्धस्य प्रत्यक्षासम्भवात् तदर्थभूतक्रियाया अपि प्रत्यक्षासम्भवात् तदाश्रया जना लक्ष्यन्ते ; तेनायं कालातिपातः मदागमनेऽतिकाल इत्यर्थः । अत्र शुकवाक्यश्रवणोत्तरं, समुपजातकुतूहलया सारिकयाऽनुरुध्यमानः अपथादिना भृशं भृशोऽर्थ्यमानः, शुकः इति शेषः, कथयितुमारेभे ।

कुसुमपुरं नाम नगरमस्तीत्यन्वयः । कीदृग्विधैरभिरुपशोभितम् ? सुधाधवलैः "कुडो" इति प्रसिद्धं लेपनद्रव्यं, ("सुधा लेपोऽमृतं मुडो" इत्यमरः) । बृहत्कथा गुणाढ्यकृतिः, तदारम्भैरिव शालभञ्जिकोपेतैः शालभञ्जिका नायिकाविशेषः ; पक्षे—शालभञ्जिका पुत्तलिका, ("शालभञ्जी पाञ्चालिका च पुत्तलिका" इति हैमः) । वृत्तैरिव छन्दोभिरिव, समाण्डवकक्रीडितैः माण्डवकक्रीडितं नाम छन्दोविशेषः, "माण्डवकं भाण्डलगाः" ; पक्षे—माण्डवकानां शिशूनां, क्रीडितानि तैः सहितानि तैः । करियूथैरिव समत्तवारणैः समत्तगजैः ; पक्षे—सनिर्यूहैः, ("मत्तवारणनिष्क्रान्ति दानक्लिन्नकरे द्विपे । महाप्रासादवीथीनां वरण्डे चाप्यपाश्रये ॥" इति विश्वप्रकाशः । "निर्यूहो मत्तवारणम्" इति वैजयन्ती । "मत्तालम्बोऽपाश्रयः स्यात् प्रघीवो मत्तवारणः" इति हैमः । "निर्यूहः शेखरे द्वारे निर्याणे नागदन्तके" इति विश्वप्रकाशः) । सुग्रीवसैन्यैरिव सगवाक्षैः गवाक्षो वानरविशेषस्तत्सहितैः ; पक्षे—सगवाक्षैः सवातायनैः । बलिभवनैरिव सुतले पातालविशेषे, सन्निवेशो येषां तैः ; पक्षे—

रामेण, प्रियंवदेनापि पुष्पकेतुना, भरतेनापि शत्रुघ्नेन, तिथिपरेणाप्यतिथिसत्कारपरेण, असङ्ख्येनापि सङ्ख्यावता, अमर्मभेदिनाऽपि वीरतरेण, अपतितेनापि नानासवासक्तेन, सुदर्शनेनाप्यचक्रेण, अजातमदेनापि सुप्रतीकेन, अपक्षपातिनाऽपि हंसेन, अविदितस्नेहक्षयेणापि कुलप्रदीपेन, अग्रन्थिनाऽपि वंशपोतेन, निदाघदिवसेनेव वृषविवर्द्धितरुचिना, माघविरामदिवसेनेव तपस्यारम्भेण, अग्रहेणापि काव्यजीवज्ञेन, पौरजनेनानुगतम्; घनागमदिवसेनेव दर्शितखण्डाभ्रेण, वेलातटेनेव

---

शोभनस्तनसन्निवेशो येषां ते:। पौरजनेनानुगतमित्यन्वय:। धनदेनापि कुबेरेणापि, अचेतना वरुणेनेति विरोध:; धनदो धनदाता, प्रकृष्टं चेतो यस्य स इत्यविरोध:। अजाक्षीणो जावाल:, राम: पशुविशेष इति विरोध:; कश्चित् त्वजाबाली रामपूर्वज:, रामो दाशरथिरिति विरोध:; ("जावाल: स्यादजाजीव:"। "राम: समरो गवय: प्रग:। इत्यादयो मृगेन्द्राद्या:" इत्युभयत्राप्यमर:) अकारो वासुदेव:, तस्माज्जातोऽज: काम:, तमापादयति ताडक्, अत एव रमयतीति राम: [ण्यन्तादच्, तत्रोऽण्] स्त्रीणां क्रीडाकारकत्वाद्रमेनेत्यविरोध:। प्रियंवदो गन्धर्वविशेष:, पुष्पकेतु: काम इति विरोध:; प्रियं वदतीति ताडक् तेन, ["प्रियवशी: वद: खच्" इति खच्। "अरुर्द्विषत" इति मुम] पुष्पकेतु: पुष्पाभरणत्वेनेत्यविरोध:। भरत: कैकेयीतनय:, शत्रुघ्न: सौमित्रिरिति विरोध:; भे नक्षत्रे रतत्वेन ज्यौतिषिकेण, शत्रुघातकेनेति परिहार:। तिथौ विहितत्वात्तिथिकर्मणि, परेण रतेन, न तिथिसत्कारपरोऽतिथिसत्कारपर इति विरोध:; अतिथीनामागन्तूनां सत्कारपरेणेति परिहार:, ("आगन्तवस्तिथिर्नो गृहागते" इत्यमर:)। असङ्ख्येन बहुत्वाद्गणनारहितेन, सङ्ख्यावत: सङ्ख्यासहितेनेति विरोध:; असङ्ख्येनापुत्रेण, सङ्ख्यावता पण्डितेनेत्यविरोध:, ("सङ्ख्यास्कन्दनं सङ्ख्या"। "सङ्ख्यावान् पण्डित: कवि:" इत्युभयत्राप्यमर:)। अमर्मभेदिनाऽपि वीरतरेण क्रान्तेन, क्रान्तस्य मर्मभेदित्वं प्रसिद्धं, ताडङ्कत्वेन वर्णनं विरोध:; ("अक्लिष्टगो वीरतरोऽस्त्रकण्टक:" इति हारावली) मर्म रहस्यं, तद्भेदकेन, वीरतरेणातिशूरेणेति परिहार:। अपतितेन भूमावपतितेन, नानासवासक्तेनानेकमद्यासक्तेनेति विरोध:; ("मैरेयमासव: शौण्ड:" इत्यमर:) अपतितेनाप्रायश्चित्ताहेंण, नाना सवा अनेकयज्ञा:, तेष्वासक्तेनेति परिहार:, ("यज्ञ: सवोऽध्वरो याग:"

प्रवालमणिमण्डितेन, टेवाङ्गनाजनेनेवेन्द्राणीपरिचयविदग्धेन, वनगजेनेव पल्लवपल्लवितरुचिना, कोकिलेनेव परपुष्टेन, भ्रमरेणेव कुसुमेषु लालितेन, जलौकसेव रक्ताक्रष्टिनिषूणेन, याजकेनेव सुरतार्थिना, महानटबाहुनेव वस्त्रग्रहणेन, मरुडेनेव विलासिहृदयतापकरेण, अन्धासुरेणेव शूलानामुपरिगतेन, वेश्याजनेनाधिष्ठितं कुसुमपुरं नाम नगरम्।

---

[ इत्यमरः )। अज्ञातसटेनासज्ञातोष्ठदारेण, सह प्रतीकेनेति विरोधः; अज्ञातसटेनासज्ञातोष्ठदारेण, सह प्रतीकेनेति परिहारः, ( अङ्गं प्रतीकोऽवयवः" इत्यमरः )। सुदर्शनेनाधक्रमेण, विष्णुपक्षस्य सुदर्शन इति संज्ञेति विरोधः; अधक्रमेणादर्शनेन, ( "अभावेऽनुत्तरे च दर्शे मदनाहोर्ध्वयोः" इति विश्वः। ) शोभनदर्शनं यस्येत्यविरोधः। न पक्षणं गरुत्मा, पक्षपातो नेत्र, हरिणा पक्षपातो न विरोधः; अकारे विष्णौ, पक्षपातो ताडङ्गेन, हरिणा विरहेण निर्लोमेन चेति परिहारः, ( "अकारो वासुदेवः स्यात्" इत्यमरः। "हरौ विरहे निर्लोमे पक्षे च विहगान्तरे" इति विश्वः )। न विदितः स्नेहस्य तैलस्य, क्षयो येन तेनापि कुलप्रदीपेनेति विरोधः; न विदितः स्नेहक्षयोऽनुरागक्षयो येन, कुलस्य वंशस्य, प्रदीपेन प्रकाशकेनेति परिहारः। अगन्धिना पर्वरहितेन, वंशपोतेन वंशादुरेणेति विरोधः; अगन्धिना गतहृदयेन, वंशपोतेन सत्कुलाभर्केणेत्यविरोधः। निदाघदिवसेनेव हृदयेन हृषीकनन्दनेन, विवर्धितरुचिना प्रवृद्धतापेनेत्यर्थः; पक्षे—हृषीकं धर्मः, विवर्धितरुचिना। माघविरामदिवसेनेव तपस्यस्य फाल्गुनस्य, आरम्भिणा; ( "स्यात् तपस्यः फाल्गुनिकः" इत्यमरः ) पक्षे—तपसा तपश्चरणेन, तदारम्भिणा। अगहनेनापि काव्यजीवनेन गुरुगुरुत्वेन; पक्षे—काव्यस्य जीवनेनाश्रयेण। वेश्याजनेनाधिष्ठितमित्यन्वयः। घनागमदिवसेनेव दर्शितखण्डाभ्रेण दर्शितखण्डमेघेन; पक्षे—खण्डाभ्रं दन्तक्षतविशेषः, तथा च वामनः,—"विधिवनीवत्परिमण्डलं च क्षतेः समन्तादिष्टटैरुपेतम्। खण्डाभ्रमेतद्दशनायलेखं विम्बाधरोत्सङ्गविभूषणाय॥" इति। वेलातटेनेव प्रवाला विद्रुमाः, मणयश्च तैर्मण्डितेन; पक्षे—प्रवालैरुत्तमकैर्विद्रुमैर्वा, मणिभिर्मण्डितेन; यद्वा—प्रवालमणिर्दन्तक्षतविशेषः, तथा च वामनः,—"गाढं दन्तौष्ठसंयोगात् स प्रवालमणिर्भवेत्" इति। टेवाङ्गनाजनेनेवेन्द्राणी शची, तस्याः परिचयादिदग्धेन; पक्षे—इन्द्राणी रतौ बन्धविशेषः, "निगडाख्यदयसङ्गतजानुभ्यां

यत्र च सुरासुरमौलिमालालालितचरणारविन्दा, शुम्भनिशुम्भमहावनदावज्वाला, महिषमहासुरगिरिवज्रसारधारा, प्रणयप्रणतगङ्गाधरजटाजूटस्खलितजाह्नवीजलधाराधौतपादपद्मा, भगवती कात्यायनी वेतालाभिधाना स्वयं प्रतिवसति।

---

भवति चाभ्यासात्। इन्द्राणीरचितत्वादिन्द्राणीत्याख्या यस्य:॥" इति। वनगजेनेव पल्लवे किसलये, पल्लविता विहृता, रुचिरिच्छा येन तेन; पक्षे—पल्लवे: पल्लवेषु वा विटैर्विटेषु वा, विवर्द्धितरुचिना, ("पल्लव: किसलये विट्भृत्ये विस्तारे विटपेऽपि च" इति विश्व:)। कोकिलेनेव परभाग्र पुष्टेन; पक्षे—परमस्यर्थं, पुष्टेन। भ्रमरेणेव कुसुमेषु पुष्पेषु, खादितेन; पक्षे—कुसुमेषुणा कामेन, खादितेन। अलोकसेव रक्ताक्षि; रुधिराक्षि:, तव निपुणेन; ("रक्तचतमग्रोधितम्" इत्यमर:) ["अलोकसेन" इति पाठे—पूर्वश्लोक:शब्दात् स्वार्थेऽण् पश्चात् समास:] पक्षे—रक्तानामनुरक्तानाम्, आक्षिणीव निपुणेन। (आब्धिकैस्तु 'अलोकाभि: कथितोऽयं अलोकस:" इति शब्दभेदप्रकाश:)। यामकेनेव सुरता सुरतं, तदर्थिना; [भावे तल्, "तलन्तं क्लियाम्" इति स्त्रीलम्] पक्षे—सुरतं निधुवनं, तदर्थिना। महानटवाडुनेव विषमुखेनेव, वल्लाङ्गनक्षेण; पक्षे—वल्लाङ्गनासक्तेन, ("भुजङ्गोऽहिविलासिनो:" इति विश्व:)। मरुडेनेव बिले वासितुमुपवेष्टुं शीलं येषां तेषां सर्पाणां, कृतयतापकरेण; पक्षे—विलासिनां स्वामङ्गतविलसनशीलानां, कृतयतापकरेण। यज्ञासुरेणेव गुल्मानामुपरिगतेन; [टारा इत्यादाविवार्थवाभिप्रायेण बहुवचनम्] यज्ञासुरो भैरवेण गुल्मायें रोपित इति कथा; पक्षे

पाण्डुपुत्रा इवाच्छहृदयाज्ञानहृतचक्षुषः, केचिद्बृहत्कथानुबन्धिनो गुणाढ्याः, केचित् तिर्यग्गतयः सुगन्धवाहाः, केचित् कौरवसैनिका इव द्रोणाशासूचकाः, केचित् कुमुदाकरा इवासोढशूरभासः स्थिता राजपुत्राः। तानेकैकशः समवलोक्य विरक्तहृदयाऽसौ कुमारिका तस्मात् कर्णेजंघादवततार।

---

क्षीणतामापादिता अपि, स्थिरा निश्चला इति परिहारः, स्फुटमेवातीवहंसवीजं निर्लज्जतारूपम। केचित् पाण्डुपुत्रा इवाच्छहृदयस्य पाण्डवतत्त्वस्य, अज्ञानाद्धृतचक्षुषः; पक्षे—पञ्चानां वासवदत्तासम्बन्धिनामिन्द्रियाणां, हृदयस्य तत्त्वस्य मनसो वा, अज्ञानेनानवबोधनेन, हृतचक्षुषो गतप्रायाः, इयमद्यैवं करिष्यति न वेति व्याकुलीभूता इति भावः, तरलतैव दोषः। केचित् बृहत्कथानुबन्धिनो बृहत्कथाग्रन्थस्य कर्तारः, गुणाढ्यास्तन्नामानः कवयः; बहुवचनं पूजार्थम्। पक्षे—बृहत्कथानुबन्धिनो बहुकथावक्तारः, गुणाढ्या गुणैः कलादिभिरन्वेषणीयाः, पक्षे—गुणैर्वागुरादिभिः, आढ्याः, सर्वदा मृगयासक्ततया अमानिता दोषः। केचित् तिर्यग्गतयः कुटिलमार्गगामिनः, सुगन्धवाहाः सुगन्धधारिणः; पक्षे—तिर्यग्गतयो वायवः, वायोस्तिर्यग्गमनं वैशेषिकभाष्ये, सुगन्धवाहाः शोभनवायवः। केचित् कौरवसैनिका इव द्रोणाचार्यादाया अयाशा, तत्सूचकाः द्रोणाचार्यैरुक्तेनापतितमिति नास्माकं पराजय इत्येव परस्परसूचकाः; पक्षे—द्रोणः काकः, तस्मादाशा वासवदत्ताप्राप्त्याशा, तत्सूचकाः, उक्तं च स्थानस्थितपक्षस्य बलवत्त्वे—"इहाहंदो इत्यादिकबाहुनष्यन्द्वादिसंपन्नहृदयाधिकारी। यच्चान्यं मन्यते वीरणस्तो हृद्यार्थदो हृदयहस्थितश्च॥" इत्यादि। ("द्रोण. कपीपतौ कृष्णकाके स्यादद्रौऽपि च" इति विश्वप्रकाशः)। केचित् कुमुदाकरा इवासोढशूरभासोऽसोढसूर्यैकाश्रयः; पक्षे—शूरो वीरः, दाम्भ्यादिः शूरशब्दः सूर्यवाचकोऽपि, ("शूरस्यादभटे सूर्ये" इति विश्वः। "सुभटे शूरः सूर्ये च दाम्भ्यकेऽपि" इत्यमरविवेकः)। तानेकैकशः समवलोक्य विरक्तहृदया, सार्थतदोषदर्शनात्, असौ कुमारिका कर्णेजंघान्नामधात्, अवततार, ["अद्रौकवचनाच्च वीप्सायाम्" इत्यव चकारो द्रोणाद्यादित्यस्यानन्तरं द्रष्टव्यः, अद्रौकवचनाद्द्रोणाद्या च, यात स्वार्थेऽपि, स नामिधानत्वभावादेकशब्दादेव, तेनैकशब्दाद्वीप्सायां प्रत्ययाभावे द्विर्वचनेऽत्यलमर्थाद्वैकशब्दादपि पदे जातैकैकश इत्येतसिद्धिः] ("कर्णेजंघो सवेन्मत्त." इति हारावली)।

अथ तस्यामेव रात्रौ स्वप्ने बालिनमिवाङ्गदोपशोभितं, कुहूकण्ठमिव हारिकण्ठं, कनकमृगमिव रामाकर्षणनिपुणं, जयन्तमिव वचनामृतानन्दितबृहद्भ्रवसं, कृष्णमिव कंसहर्षं न कुर्वन्तं, महामेघमिव विलसत्करकम्, आदिकन्दं रूपपादपस्य, आरोहणगिरिं शृङ्गाररत्नस्य, प्रभवगिरिं सुन्दरकथानदीनां, सुरभिमासं वैदग्ध्यसहकारस्य, आदर्शतलं सौजन्यमुखस्य, आदिबीजं विद्यालतानां, स्वयंवरपतिं कीर्त्तेः, सर्वाग्रहं लक्ष्मी-सरस्वत्योः, आदिगृहं शीलसम्पदां, कोशमिव महासौन्दर्य्यस्य, त्रिभुवनविलोभनीयाकृतिं युवानं ददर्श। स च चिन्तामणि-

---

अथागतेषु राजकुमारेषु विरागोत्तरं, तस्यामेव तद्दिवससम्बन्धिन्यामेव, रात्रौ स्वप्ने निद्रायां, सा युवानं ददर्शेत्यन्वयः। बालिनमिवाङ्गदेन तन्नामकवानरेण; बालिनमिवेत्यादिधर्मराजमाघकाङ्क्षदित्यते माधुर्य्यं गुणः; पक्षे—अङ्गदेन केयूरेण। कुहूकण्ठमिव कुहूः इति कण्ठो ध्वनिरस्य तमिव कोकिलमिव, हारिकण्ठं मनोहर-स्वरम्; पक्षे—हारी हारयुक्तो मनोहरो वा, कण्ठो गलो यस्य तम्। कनक-मृगमिव रामस्य दाशरथेः, आकर्षणनिपुणम्; मारीचनामा राक्षसः कनकमृगो भूत्वेति प्रसिद्धं रामायणे; पक्षे—रामाणां स्त्रीणाम्। जयन्तमिवेन्द्रपुत्रमिव, वचनामृतेनानन्दितो बृहद्भ्रवा इन्द्रो येन तम्; ("बृहद्भ्रवाः शुनासीरः पुरुहूतः पुरन्दरः"। "जयन्तः पाकशासनिः" इति द्व्योरप्यमरः) पक्षे—वचनामृतैरानन्दिते बृहतां श्रवसी श्रोत्रे येन तं, ("श्रुतिः स्त्री श्रवणं श्रवः" इत्यमरः)। कृष्णमिव कंसस्य हर्षं न कुर्वन्तं, तदन्तकत्वादित्यर्थः; पक्षे—कं जलं, न सहर्षं कुर्वन्तम्? अपि तु सर्वमेव। महामेघमिव विलसत्करकं स्फुरद्वर्षोपलम्; ("वर्षोपलस्तु करका" इत्यमरः) पक्षे—करो हस्त एव करकः [समासान्तः कप्-वा]। रूप-पादपस्य सौन्दर्यतरोः, आदिकन्दम्। शृङ्गाररत्नस्यारोहणगिरिं प्राट्प्रावादिम। [कह श्रोणप्राट्प्रावे]। सुन्दरकथानदीनां रम्यकथानदीनां, प्रभवगिरिमुत्पत्ति-गिरिम्। सुरभिर्वसन्तः, तस्मिन्नतमासमिव वैदग्ध्यसहकारस्य। सौजन्यमेव सुखं तस्यादर्शतलम्। विद्यालतानामादिबीजम्। कीर्त्तेः स्वयंवरपतिम्। लक्ष्मी-सरस्वत्योः अग्रगृहम्; तथा च कालिदासः,—"निसर्गभिन्नास्पदमेकसंस्थमियं द्वयं श्रीश्च सरस्वती च" इति। शीलसम्पदामादिगृहम्। महासौन्दर्य्यस्य कोशमिव।

नाम्नो राज्ञस्तनयः कन्दर्पकेतुर्नाम। सा च स्वप्ने एव नामादिकमश्रौषीत्।

अनन्तरमहो! प्रजापते रूपनिर्माणकौशलमिदं, मन्ये स्वस्यैव नैपुण्यस्य सौन्दर्यदर्शनोत्सुकमनसा कमलभुवा जगत्त्रयसमवायिरूपपरमाणूनादाय विरचितोऽयम्, अन्यथा कथमिवास्य कान्तिविशेष ईदृशो भवति? इत्येव दमयन्ती नलस्य कृते वनवासवैशसमवाप। मुधैवेन्दुमती महिष्यप्यजानुरागिणी बभूव। अफलमेव दुष्मन्तस्य कृते शकुन्तला दुर्वाससः शाप-

---

विभुवने विभुवनस्य वा विलोभनीया विलोभनकर्त्री, आकृतिर्यस्य तम्। [कर्तर्यनीयर्]। स इति स्पष्टम्।

अनन्तरं लाघवदशायाम्, इति बहुविधं भाषमाणा सखीजनेन समं समुच्चूर्णयन्त्यः। "प्रथमे त्वभिलाषः स्यादितीये चिन्तनं भवेत्। तृतीये तु स्मृतेः प्रोक्ता चतुर्थे गुणकीर्त्तनम्॥ उद्वेगः पञ्चमे प्रोक्तो विलापः षष्ठ उच्यते। उन्मादः सप्तमे प्रोक्तो भवेदत्याधिकस्तथाऽष्टमे॥ नवमे जडता प्रोक्ता दशमे मरणं भवेत्॥" इति भरतोदिता दशावस्था वर्णयंश्चतुर्थीं दशां वर्णयति। अहो। प्रजापते रूपनिर्माणकौशलमिदं मन्ये उत्प्रेक्षे। "मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः। उत्प्रेक्षा व्यज्यते शब्दैरिव-शब्दोऽपि तादृशः॥" स्वस्यैव नैपुण्यस्य प्रजाननिर्माणनैपुण्यस्य, सौन्दर्यदर्शनोत्सुकमनसा कमलभुवा ब्रह्मणा, जगत्त्रयसमवायिरूपपरमाणूनादाय निर्मितः। इत्येवेत्यादि। इन्दुमती भोजराजतनया, यज्जे तदभिधाने राजनि, अनुरागिणी इत्येव बभूव, अजस्येन्दुमत्यपेक्षया हीनरूपत्वादिति भावः, तथा च कालिदासः,—"कुलेन कान्त्या वयसा गुणेन गुणैश्च तैस्तैर्विनयप्रधानैः। त्वमात्मनस्तुल्यमुं इत्थीव रत्नं समागच्छतु काञ्चनेन॥" इत्यत्रात्मनस्तुल्यमित्यनेनोपमानकल्पनेनास्या अधिकगुणवत्त्वप्रतिपादनात्, अत एव रत्नं काञ्चनेन समागच्छतीति सङ्गच्छते। कन्दर्पकेतोरपेक्षयाऽजादीनां कुरूपत्वमिति तासां तेष्वनुरागो इत्येवेति तु स्पष्टमेव। माद्ध्याः सैरन्ध्र्याः, यज्जे कृष्णे, अनुरागो विरोधाभासः, एतन्मूलकोऽपि परिहासः, यद्यप्यजवरणसमये इन्दुमत्या न महिषीत्वं, तथाऽपि वासवदत्तापरिहासदशायां तत्त्वेन न कोऽप्यनुपपन्नः। अफलमेव

मनुबभूव। निरर्थकं मदनमञ्जरी नरवाहनदत्तं चकमे। निष्कारणमेवोरुयुगविनिर्जितरम्भा रम्भा नलकूबरमचीकमत। विफलमेव धूमोर्णा स्वयंवरार्थागतानेकदेवगणगन्धर्वसहस्रेषु धर्मराजमाचकाङ्क्षदिति बहुविधं चिन्तयन्ती विरहसुमुर्-मध्यमधिरूढेव, बाड़वाग्निशिखाकवलितेव, कालाग्निरुद्र-प्रावकग्यस्तेव, पातालगुहाप्रविष्टेव, शून्यकरणग्रामे हृदये

---

टुक्षत्तस्य राज्ञः, [ "न लोकाव्यय—" इति निषेधस्तु कारकषष्ठीविषयः ] कृते तादर्थ्ये, [ अव्ययम ] दुर्वाससः शापं यस्मिन्नाकस्मिकहृदया स जनस्त्वां न अरिष्यतीत्येवं रूपम्, अनुबभूव, ( "अर्थे कृतेऽव्ययं तावत् तादर्थ्ये वर्त्तते इयम्" इति क्षीरस्वामिः ) स्पष्टं चैतदभिज्ञानशाकुन्तले—"विचिन्तयन्ती यमनन्यमानसा तपोधनं वेत्सि न मामुपस्थितम्। अरिष्यति त्वां न स बोधितोऽपि सन् कथां प्रमत्तः प्रथमं कृतामिव॥" इति। मदनमञ्जरी तन्नामिका स्त्री, नरवाहनदत्तं राजविशेषं, निरर्थकमेव चकमे। ऊरुयुगविनिर्जितरम्भा रम्भा स्वर्वेश्या, निष्कारणमेव नलकूबरं कुबेरसूनुम, अचीकमत, अवाप्तवती; तथा च श्रीहर्षः,—"अकाण्डिकस्य श्रीरसुधां विधाय रम्भा चिरं भामतुलां नलस्य। तवानुरक्ता तनमाप्य भैक्षं तन्नामनस्थानलकूबरं सा॥" उत्तमोपभोगिनो लोके प्रवृत्तिनिन्दार्थः; तथा च भर्तृहरिः,—"नखेभेन्द्रविभिन्नकुम्भगलदग्रासैकबद्धस्पृहः किं जीर्णं तृणमत्ति मान-महतामग्रेसरः केसरी?" [ कमेर्लुकि "कमेर्णिङ्" इति स्वार्थे णिजि "णिश्री" इति चङि "णेरनिटि" इति लोपे "श्री चङि" इत्युपधाह्रस्वे "चङि" इति द्वित्वम। "सन्वल्लघुनि" इति सन्वद्भावे "सन्यतः" इतीत्वेऽभ्यासस्य "दीर्घो लघोः" इति दीर्घः। अट्] धूमोर्णा स्वयंवरागतानेकदेवगणगन्धर्वसहस्रेषु, [ "यस्मो चानादरे" इति चकारादनादरे सप्तमी ] तानगणय्य धर्मराजं विहपतिं, विफल-मेवाचकाङ्क्षत् [ काङ्क्षि काङ्क्षि माङ्क्षि काङ्क्षायाम्। लुङ् ] इति बहुविधं चिन्तयन्ती। विरहसुमुर्रित्यादिनाऽष्टभीसमस्यां वर्णयति। विरहतृषानलमधिरूढेव, ( "सुमुर्रस्तु तृषानलः" इति वैजयन्ती )। बाड़वाग्निर्वाडवानलः, तच्छिखा ज्वाला, तया कवलितेव, ( "बाड़वो वड़वानलः"। "वह्नेर्डयोर्ण्यलक्षीलौ" इत्युभयत्राप्यमरः )। कालाग्निर्यो रुद्रप्रावकः त्रिनाशिकनेत्रजन्मा, तेन यस्तेव। इति विरहदाहमधि-रूढत्वं वर्णयति। पातालगुहायां प्रविष्टेव। शून्यकरणग्रामे शून्येन्द्रियवर्गे,

लिखितमिव, उत्कीर्णमिव, प्रत्युप्तमिव, कीलितमिव, निर्गलित-मिव, वज्रलेपघटितमिव, अस्थिपञ्जरप्रविष्टमिव, मर्मा-भ्यन्तरस्थितमिव, मज्जासारशबलितमिव, प्राणपरीतमिव, अन्तरा-त्मानमधिष्ठितमिव, रुधिरास्रवद्रवीभूतमिव, पललसंविभक्त-मिव कन्दर्पकेतुं मन्यमाना उन्मत्तेव, बधिरेव, मूकेव, शून्येव, निरस्तकरणग्रामेव, मूर्च्छांग्रहीतेव, ग्रहग्रस्तेव, यौवनसागर-तरङ्गपरम्परापरिगतेव, रागरज्जुभिरपवारितेव, कन्दर्पकुसुम-बाणैः कीलितेव, शृङ्गारभावनाविषघूर्णितेव, रूपपरिभावना-शल्यखिन्नेव, मलयानिलापहृतजीवितेव, प्रियसखि ! अनङ्ग-लेखे ! वितर हृदये पाणिपद्मं दुःसहो विरहसन्तापः । मुग्धे ! मदनमञ्जरि ! सिञ्च चन्दनोदकेन । सरले ! वसन्तसेने ! संहर केशपाशम् । तरले ! तरङ्गवति ! विकिर केतकीधूलिम् । वामे ! मदनमालिनि ! वीजय शैवलदलेन । चपले ! चित्र-लेखे ! लिख चित्ते चित्तचौरं जनम् । भाविनि ! विलासवति ! निक्षिप मुक्ताचूर्णनिकरम् । रागिणि ! रागलेखे ! स्थगय

---

यद्हृदयं तव लिखितमिव । अन्तरात्मानमधिष्ठितमिवान्तरात्मनि स्थितम्, [ "अधि-ङीङ्स्थाशां कर्म" इति कर्मसंज्ञा ]। पललं मांसं, तव विभक्तमिव । सप्तमी-मवस्थां दर्शयति, उन्मत्तेव । अष्टमीमवस्थां व्याधिमाह, बधिरेव मूकेव । नवमी-मवस्थां जडतामाह, शून्येवेत्यादि । मदनव्याधिनिराकरणार्थं क्रियारोपचारं वर्णयन् पुनरष्टमीमवस्थां सूचयति । प्रियसखि ! अनङ्गलेखे ! अनङ्गस्य लेखा यस्यां सा दुःसहसन्तापे ! विरहवेदनाऽसंभिन्नतया स्निग्धं तदुपचारेषु, हृदये पाणिपद्मं वितर देहि, दुःसहो विरहसन्तापः । मुग्धे ! अनभिज्ञे ! मदनमञ्जरि ! चन्दनोदकेन सिञ्च । सरले ! मन्मथविकारानभिज्ञे ! वसन्तसेने ! केशपाशं केशकलापं, संहर, ( "पाशः पक्ष्य दलस्य कलापार्थाः कचात् परे" इत्यमरः )। तरले ! चञ्चलचित्ते ! तरङ्गवति ! केतकीधूलिं केतकीपरागं, विकिर । वामे ! विपरीतक्रियाकारिणि ! मदनमालिनि ! नलिनीदलेन वीजय । चपले ! चित्रलेखे ! चित्ते चित्तचौरं जनं लिख । भाविनि ! भावाभिज्ञे ! मुक्ताचूर्णनिकरं

शिशिरघनसाररसनिस्यन्दाकुलपुलिने, क्षणमतितुहिनमलयजरससरित्परिसरे, क्षणमरविन्दकाननपरिवारितसरस्तटविटपिच्छायासु, क्षणमनिलोल्लासितदलेषु कदलीकाननेषु, क्षणं कुसुमशय्यासु, क्षणं नलिनीदलसंस्तरेषु, प्रलयकालोदितद्वादशरविकिरणकलापतीव्रविरहाग्निदह्यमानामतिकृशां विप्राणामिव तनुं बिभ्रती, प्रचलदमन्दमन्दरान्दोलितदुग्धसिन्धुतरलतरङ्गच्छटाधवलहासच्छुरिताधरपल्लवं तन्मुखारविन्दं, द्विजकुलमिव श्रुतिप्रणयि तदीक्षणयुगलं, सहजसुरभिमुखपरिमलमाघ्रातुकामेव सुदूरविनिर्गता सा नासावंशलक्ष्मीः, कलङ्कमुक्तेन्दुकलाकोमला पीयूषफेनपटलपाण्डुरा सा द्विजपङ्क्तिः, तदृष्टचरमनङ्गमतिशयानं रूपं, धन्यानि तानि स्थानानि, ते च जनपदाः, पुण्यानि नामाक्षराणि च तानि सुकृतभाग्भिर्यान्यमुना परिष्कृतानीति मुहुर्मुहुः परिभावयन्ती, दिक्षु विदिक्षु लिखितमिव, नभस्युत्कीर्णमिव, विलोचने प्रतिबिम्बितमिव, चित्रफलके लिखित्वा पुरो दर्शितमिवेतस्ततो विलोकयन्ती व्यतिष्ठत।

---

अनन्तरं परिजनप्रयत्नेनोच्छ्वसितं जीवितं यस्यास्तादृशी सत्यतिशिशिरघनसाररसनिस्यन्दाकुलपुलिनेष्वतिशीतलकर्पूरजलमदीतीरे पुलिनेषु, क्षणमतितुहिनमलयजरससरित्परिसरेष्वतिशीतचन्दनजलनदीषु, क्षणमरविन्दकाननपरिवारितो यत् सरसश्च तटविटपिच्छायासु, क्षणमनिलोल्लासितानि दलानि येषां तादृशेषु कदलीकाननेषु, क्षणं कुसुमशय्यासु, क्षणं नलिनीदलसंस्तरेषु नलिनीदलास्तरेषु, प्रलयकालोदितद्वादशरवीणां किरणकलापवत् तीव्रो यो विरहानलस्तेन दह्यमानामत एवातिकृशां विप्राणां तनुमिव बिभ्रती यथात् तनुमिति, मुहुर्मुहुः परिभावयन्ती दिक्षु लिखितमिवेत्यादीतस्ततो विलोकयन्ती व्यतिष्ठतेत्यन्वयः। गुणकीर्त्तनरूपां चतुर्थीं दशां प्रचलदित्यादिना वर्णयति। प्रचलदमन्दो मन्दरश्चदान्दोलितः कम्पितः, दुग्धसिन्धुश्च तरलतरङ्गच्छटावद्धवलो हासो हासं, तेन छुरितमधरपल्लवं यस्य तादृशं तन्मुखारविन्दं मन्दपङ्कजमुखकमलम्। द्विजकुलमिव ब्राह्मणसमूहमिव

अथ तस्याः सारिका तमालिका नाम तत्सखीभिः सहालोच्य कन्दर्पकेतोर्भावमाकलयितुं प्रस्थिताऽऽगता च मयैव सार्द्धमत्रैव तरोरधस्तात् तिष्ठति" इत्युक्ता विरराम। अथ मकरन्दः सहर्षमुत्थाय तमालिकां विदितवृत्तान्तामकरोत्; सा च कृतप्रणामा मकरन्दाय पत्रिकामुपानयत्। अथ स तां स्वयमेवावाचयत्।

"प्रत्यक्षदृष्टभावाऽप्यस्थिरहृदया हि कामिनी भवति।
स्वप्नानुभूतभावा दृढयति न प्रत्ययं युवतिः॥"

---

वंशमिव वा, श्रुतिवेदः कर्षंश्च, तव प्रथमि प्रश्नमवत्, तदीक्षणयुक्तमम। सहजेति सखडमुक्तेति स्पष्टम्। अनङ्गमतिप्रयाणं तदनिर्वचनीयं, रूपमदृष्टचरम्। [ मृतपूर्वे चरट् ] धन्यानि तानि स्थानानि, ते च जनपदाः, यत्र स वसतीति शेषः। तानि नामाक्षराण्यभिधानवर्णानि, सुकृतभाञ्जि पुण्यानि, यान्यमुना परिष्कृतान्यलङ्कृतानि, इति परिभावयन्ती चिन्तयन्ती, दिक्षु विदिक्षु लिखितमिव, नभस्याकाशे, उत्कीर्णमिव विकीर्णमिव, विलोचने प्रतिबिम्बितमिव, चित्रफलके लिखित्वा पुरो दर्शितमिवेतस्ततो विलोकयन्ती, अननुभूतमपि सदृश्येनावलोक्यते; तदुक्तं—"कामक्रोधभयोन्मादाद्योर-गपीड़ुपद्रवात्। यस्मात्सर्वेऽपि पश्यन्ति पुरतोऽवस्थितानिव॥" इति, व्यतिषक्त, [ "समवप्रविभक्तः स्यः" इति तङ् ]।

पवनदारिणी दूतीयम्; "कामिन्याः कामिनश्चापि सन्देशार्थां तु पत्रिकाम्। प्रापयत्यचिरेणैतामाहुः पवन दारिकाम्॥" इति। अथ तस्याः सारिका तमालिका नामेति प्रसिद्धौ, तत्सखीभिः सहालोच्य कन्दर्पकेतोर्भावं वासवदत्तानुरागम्, आकलयितुं प्रस्थिता मयैव साकं सह, आगता चावैव तरोरधस्तात् तिष्ठतीत्युक्ता विरराम।

अथ शुकवाक्यश्रवणोत्तरं, मकरन्दः सहर्षमुत्थाय तमालिकां विदितो वृत्तान्तो यस्यास्ताममोमकरोत्, सा च तमालिकाऽपि, कृतप्रणामा सती मकरन्दाय पत्रिकामुपानयत्। अथ स मकरन्दः, तां पत्रिकां, मयि सत्येतावन्मात्रमपि प्रयासोऽस्य मा भूदित्यभिप्रायात् स्वयमेवावाचयत्।

आर्य्या छन्दः। प्रत्यक्षं दृष्टो भावः पुरुषाभिप्रायोऽनया तादृश्यपि कामिनी

तच्छ्रुत्वा कन्दर्पकेतुरमृतार्णवमग्न इव सर्वानन्दानामुपरि वर्त्तमानो मन्दमुत्थाय प्रसारितबाहुयुगलस्तमालिकामालिलिङ्ग। अथ तयैव सार्द्धं किं करोति? किं वदति? कथमास्ते? इत्यादि सकलं वासवदत्ताहृत्तान्तं पृच्छंस्तत्र तां निशां दिवसमप्यतिवाह्य कन्दर्पकेतुश्चचाल। अत्रान्तरे भगवानपि मरीचिमाली तं हृत्तान्तमिव कथयितुं मध्यमलोकमवततार।

अथ वासरताम्रचूड़चूड़ाचक्राकारः, चक्रवाकचक्रसङ्क्रामितसन्तापतयेव मन्दिमानमुद्वहन्, मन्दारस्तबकसुन्दरः, सिन्दूराहतसुरराजकुम्भिकुम्भविभ्रमं बिभ्राणः, ताण्डवचण्डवेगोच्छलितधूर्जटिजटाजूटकूटबन्धबन्धुरविकटवासुकिभोगमणितटङ्कसनाभिमण्डलः, सन्ध्यामन्धिनीमरसयावकपटचारुः, वारुणीवारविलासिन्यरुणमणिकुण्डलकान्तिः, कालकरवालक्षत्तवासरमहिषस्कन्धचक्राकारः, मधुपूर्णकपालपात्रमिव कालकपालिनः, अम्लानकुसुमस्तबक इव नभःश्रियः, गगनाशोकतरुस्तबक इव, कनकमयदर्पण इव प्रतीचीविलासिन्याः, भगवान् दिनमणिश्चरमार्णवपर्यास तरलतरङ्गवेगोच्छलितविद्रुमविटपाकृतिर्ममज्ज।

---

हि यतः, अस्थिरहृदया मय्यनुरक्त एवासाविति निश्चलाशङ्का, भवति, स्वप्नानुभूतभावा युवतिः प्रत्ययं स्वप्नदृष्टं स्वानुरक्तत्वनिश्चयं, न दृढयति न दृढीकरोतीत्यर्थः, प्रत्यक्षदृष्टे यत्रानिश्चयस्तत्र परोक्षे का वार्त्तेति भावः। काव्यार्थापत्तिरलङ्कारः, "केनुत्थेनार्थशक्तिः काव्यार्थापत्तिरिष्यते" इति। आर्या छन्दः, "लक्षणेतत् सप्त गणा गोपेता भवति नेह विषमे जः। षष्ठोऽयं न लघु वा प्रथमेऽर्द्धे नियतमार्योयाः॥ अष्टे द्वितीयखात् परके ने मुखलाघ खयति पदनियमः। चरमेऽर्द्धे पञ्चमके तस्मादिह भवति षष्ठो लः॥" इति लक्षणात्।

तच्छ्रुत्वेति स्पष्टम्। अथ तयैवेत्यपि स्पष्टम्। अत्रान्तरे भगवान् मरीचिमाल्यपि हृत्तान्तं वासवदत्ताहृत्तान्तं, कथयितुमिव मध्यमलोकं भूलोकम्, अवततार। अथ चरमार्णवपर्यास तमल्लेति समन्वयः। वासरमेव ताम्रचूड़स्तस्य चूड़ा-

क्रमेण च रजोविलुठितोत्थितकुलायार्थिपरस्परकलह-विकलकलविहङ्कुलकलकलवाचालशिखरेषु शिखरिषु, वसति-काङ्केषु ध्वाङ्क्षेषु, अनवरतदह्यमानकालागुरुधूपपरिमलोद्गारेषु वासागारेषु, दूर्वाऽञ्चिततटिनीतटनिविष्टविदग्धजनप्रस्तूयमान-

---

चक्राकारः। चक्रवाकाणां चक्रं समूहः, तत्र सङ्गतिः सम्भावो येन तद्भावः, तयैव मन्दिमानमस्यतेऽस्तम्, सदृशन्। मन्दारस्तबकसुन्दरः। सिन्दूरेणाङ्कितो-ऽभिमृतः, क्रान्तः, यः सुरतालकुम्भिकुम्भस्तद्विप्लवं तदाकारत्वादस्येकत्वान्मोत्रि विग्रिष्टप्लवं विलासं च, बिभ्राणः। [ पूर्वत्रार्धेऽन्तर्भावितण्यर्थोऽत्र भ्रञ् ] ( "दिवाधि-यूर्ध्वस्मृतिकुम्भिलीनजाः" इति हारावली )। ताम्रवर्णखण्डवेगीनोच्छ्वसितेन धूमंटि-लटाजूटकूटबन्धेन बन्धुर उन्नतानतः, अत एव विषमविन्यासो यो वासुकिसञ्ज्ञ भोगसन्धिः फणासन्धिः, स एव ताटङ्कः स्त्रीणां कर्णभूषणं, तत्सनाभिस्तुल्यरूपः, मण्डलो यस्य सः ; वर्तुलत्वार्थं ताटङ्करूपकं, ("बन्धुरं तुङ्गतानतम्" इत्यमरः )। सन्ध्येव सन्ध्यिकालदुग्धा श्वाक्रान्ता वा गौः, तस्याः सरसयावकपटवशाद्रः ; "पीनाया-स्त्यातिदुग्धायाः गौः श्वद्वाराय मानवाः। रञ्जयन्ति शिरोदेशमस्याश्च बहुधा विश ॥" क्वचिद्यावकपटलीति पाठः ; अस्मिन् पाठे—यावकपटलशब्देन यावकपटलमिव यावकपटलं लोकप्रसिद्ध-"मेहदी" इति पदविशेषं रञ्जनतिलकं विवक्षितम् ; ("सन्धिनी तु श्वाक्रान्ताकालदुग्धगवीः स्मृता" इति विश्वप्रकाशः ) सन्ध्यापुरन्ध्रीति पाठः सुगमः। बाहुरेव वारविलासिनी तस्या अङ्गणमणिकुण्डलवत् कान्तिरत्र सः। कालक्षर-वालेन क्षरत्क्लिन्नः, वासरमणिरश्मिसम्पर्कसङ्काशः ( "क्षरवालः क्षपाक्षवत्" इत्यमरः )। कालकपालिनो मधुपूर्णकपालपावनिव। नभःश्रियोऽस्नानकुसुमस्तबक इव, तत्क्रीडनायेति भावः। गगनमेवाशोकतरुस्तस्य स्तबक इव। प्रतोलीविलासिन्याः स्तनकलशदर्पण इव। दिनमणिभंगवांश्चरमार्णवपयसि मज्जन्।

क्रमेण भगवती सन्ध्या समदृश्यतेत्यन्वयः। पूर्वं रजोविलुठितानि पश्चादुत्थि-तानि कुलायार्थीनि एव परस्परकलहविकलानि कलविङ्कुलानि तेषां कलकलेन वाचालानि शिखराण्यपि येषां ताटङ्गेषु शिखरिषु श्वेषु सत्सु ; ( "कलविङ्क-श्चिरपृष्ठो गृहगोधो श्वपायकः" इति हारावली। "शिरोऽग्रं शिखरं वा ना" इति मुकुटकरवेलनः; )। वसतेर्निवासस्थानस्य, काङ्क्षा येषां ताटङ्गेषु, ध्वाङ्क्षेषु काकेषु।

काव्यकथाश्रवणोत्सुकशिशुजनकलकलनिवारणक्रुडेषु हुडेषु, आलोलिकातरलरसनाभिः कथितकथाभिर्जरतीभिरतिलघुकरतालजनितसुखे शिशुजने, विरचितकन्दर्पमुद्रासु क्षुद्रासु, कामुकजनानुबध्यमानदासीजनविविधाश्लीलवचनश्रुतिविरमोत्कृतसन्ध्यावन्दनोपविष्टेषु शिष्टेषु, रोमन्थमन्थरकुरङ्गकुटुम्बकाध्यास्यमानस्वादिष्ठगौष्ठीनपृष्ठास्तरण्यस्थलीषु, निद्रालुद्रोणकुलकलितकुलायेषु काननौकायेषु, कापेयविकलकपिकुलेष्वाश्रमतरुषु, निर्जिगमिषति जरत्तरुकोटरकुटीरकुटुम्बिनि कौशिककुले, तिमिरतर्जननिर्गतासु दहनप्रविष्टदिनकरकरशिखास्विव प्रस्फुरन्तीषु दीपलेखासु, मुखरितधनुःष

अनवरतेति स्पष्टम्। दूर्वाभिरचितं यत् तटिनीतटं तत्र निविष्टविदग्धजनैः प्रत्यूयमानानां काव्यकथानां श्रवणोत्सुकाः, अत एव शिशुजनकलकलनिवारणार्थं क्रुडालाटशीषु हुडेषु। आलोलिकायां बालानां निद्रार्थे क्रियमाणे "झरलोल" इति लोकप्रसिद्धे मुखध्वनिविशेषे, तरला रसना जिह्वा यासां ताभिः, कथितकथाभिर्जरतीभिरतिलघुकरतालजनितसुखे शिशुजने अधिकृतनिष्ठौ, शिशुजने, तदुक्तम्—"आलोलिका मुकुलिका उलूलिर्मुखघट्टिका" इति। विरचिता कन्दर्पमुद्रा प्रसाधनं यासिताासु, क्षुद्रासु वेश्यासु, ("क्षुद्रा वेश्यानटीकण्ट-कारिकासरघासु च" इति विश्वप्रकाशः)। कामुकेति स्पष्टम्। रोमन्थेन चर्वितस्याऽन्य पुनश्चर्वणेन, मन्थरैश्च कुरङ्गकुटुम्बकेनाध्यास्यमानं सदिष्टं सदुतरं, गौष्ठीनानां भूतपूर्वगोष्ठानानां, पृष्ठं पृष्ठवत् पृष्ठं यासु तादृग्वरण्यस्थलीषु सतीषु, ("गोष्ठं गोष्ठानकं तत्तु गौष्ठीनं भूतपूर्वकम" इत्यमरः)। निद्रालुद्रोणकुलं काककुलं, तेन कलितकुलायेषु व्याप्तनीडेषु, काननौकायेषु काननसमूहेषु, ("निकायस्तु पुमान् सङ्घे सार्थेऽप्यधिकरणके" इति विश्वप्रकाशः)। कापेयं कपिकर्म, तेन विकलानि कपिकुलानि येषु तेष्वाश्रमतरुषु, ["कपिज्ञात्योढक्"]। जरत्तरूणां चिरन्तनवृक्षाणां, कोटरा निष्कुहाः, ते एव कुटीरास्तेषु कुटुम्बिनि कुटुम्बवति, कौशिककुले निर्जिगमिषति निर्गन्तुमिच्छति, ("निष्कुहः कोटरं वा ना" इति "वासः कुटी" इति च हलायुधामरः)["कुटीशमीशुण्डाभ्यो रः" इत्यत्वले रः]। तिमिरतर्जनार्थे

वर्षति शरनिकरमनवरतमशेषसंसारशेमुषीमुषि मकरध्वजे, सुरतारम्भाकल्पगोभिनि शम्भलीभाषितभाजि भजति भूषां भुजिष्याजने, सैरिन्ध्रीवध्यमानरशनाकलापजल्पाकजघनस्थलीषु जनीषु, विश्रान्तकथाऽनुबन्धतया प्रवर्त्तमानानेकजनगृहगमन-त्वरेषु चत्वरेषु, समावासितकुक्कुटेषु निष्कुटेषु, कृतयष्टि-समारोहणेषु बर्हिणेषु, विहितसन्ध्यासमयव्यवस्थेषु गृहस्थेषु, सङ्कोचोदञ्चदवाञ्चत्केसरकोटि--सङ्कट-कुशेशय-कोशकोटर-कुटीर-शायिनि षट्चरणचक्रे, अथानेन वर्त्मना भगवता भानुमता समागन्तव्यमिति सर्वपद्मयैर्वसनैरिव मणिकुट्टिमालिरिव विरचिता वरुणेन, कालकृत्तस्य दिवसमहिषस्य रुधिरधारेव,

---

निर्गतास्त्रिव दहनप्रविष्टदिनकरकराणां शिखानां, शिखासु प्रस्फुरन्तीषु दीपवेलासु, "सौरं तेजः सायमग्निं प्रविशति" इत्यादिस्मृतिः। सुखरितधनुषि [ सनाद्यन्तधिरनित्यत्वान्नानङ् ] शरनिकरं वर्षति, अनवरत-मशेषसंसारशेमुषीमुषि सकलसंसारमतिहारके, मकरध्वजे, ("धीः प्रज्ञा शेमुषी मतिः" इत्यमरः)। सुरतारम्भाकल्पेन वेशेन, शोभिनि शम्भलीनां कुट्टनीनां, भाषितं वचनं, भजति तादृशि, भूषां भजति भुजिष्याजने प्रेष्याजने, ("दाक्षिण्यवेशौ नेपथ्यम्"। "शम्भली कुट्टनी समे"। "नियोज्यकिङ्करप्रेष्य-भुजिष्यपरिचारकाः" इति त्रिष्वमरः। "भुजिष्या प्रेष्यमात्रे स्यात् स्वतन्त्रायामपि स्त्रियाम्" इति धरणिः)। सैरिन्ध्रीभिर्वध्यमानरशनाकलापेन काञ्चीकलापेन, जल्पाकजघनस्थलीषु जनीषु वधूषु, ("सैरिन्ध्री परवेश्मस्था स्वयं शिल्पकारिका"। "स्याज्जल्पाकस्तु वाचालः" इति द्वयोरमरः। "जनी स्त्रीजन्तिनीवध्वोरुत्पत्तौ च जनिर्मता" इति विश्वः)। विश्रान्तकथाऽनुबन्धतया प्रवर्त्तमानानेकजनेषु गृहगमनत्वरा येषु तेषु चत्वरेष्वङ्गणेषु, ("अङ्गणं चत्वरादिरे" इत्यमरः)। निष्कुटेषु गृहारामेषु, समा-वासितकुक्कुटेषु, ("गृहारामास्तु निष्कुटाः" इत्यमरः)। बर्हिणेषु मयूरेषु, कृत-यष्टिसमारोहणेषु, ("मयूरो बर्हिणो बर्ही" इत्यमरः)। गृहस्थेषु विहितसन्ध्या-समयव्यवस्थेषु। सङ्कोचेति स्पष्टम्। अथानन्तरं, वक्ष्यमानेन वर्त्मना भानुमता समागन्तव्यमिति सर्वपद्मयैर्वसनैर्मणिकुट्टिमालिरिव रचिता, ("कुट्टिमोऽस्त्री

विद्रुमलतेवाम्बरमहार्णवस्य, रक्तकमलिनीव गगनतड़ागस्य, काञ्चनसेतुरिव कन्दर्पगमनस्य, मञ्जिष्ठारागाङ्कणपताकेव गगनहर्म्यतलस्य, लक्ष्मीरिव स्वयंवरपरिग्रहीतपीताम्बरा, भिक्षुकीव तारानुरक्ता रक्ताम्बरधारिणी, भगवती सन्ध्या समदृश्यत।

क्षणेन च क्षणदारागरचनाचतुरासु सन्ध्याग्निष्वाखिव वेश्यासु, तुलाधारशून्यायां पण्यवीथ्यामिव दिवि, घनघटमानदलपुटासु पुटकिनीषु, तिमिरप्रतिहस्तकेष्विव तत इतः परिभ्रमत्सु कमलसरस्सु मधुकरेषु, विकलकुररीरुतक्लेशेन रविविरहविधुरासु विलपन्तीष्विव सरोजिनीषु, गणके इव नक्षत्रसूचके प्रदीपे, हरकण्ठकाण्डकालिमसनाभि, दैत्यबल-

निबडा भूः" इत्यमरः)। आसक्तेत्यादि स्पष्टम्। लक्ष्मीरिव स्वयंवरपरिग्रहीतः पीताम्बरो विष्णुर्यथा; पक्षे—पीताम्बरं पीतनभः। भिक्षुकीव तारायां देवतायाम्, अनुरक्ता, रक्ताम्बरधारिणी रक्तवस्त्रधरा; पक्षे—तारा नक्षत्राण्यनुरक्ता यस्याम्, [आदितान्त्यादः] रक्तमम्बरमाशायां यस्याम्।

क्षणेन गणके इव नक्षत्रसूचके प्रदीपे तिमिरमदृश्यतेत्यन्वयः। क्षणदा रात्रिः, तस्या रागरचना तत्र चतुरासु सन्ध्याग्निष्वाखिव वेश्यासु; पक्षे—क्षणदा आ साकल्येन, रागा भैरवादयः, तेषां रचना यथायथं स्वरयाममूर्च्छनासहितं गानं, तत्र चतुरासु; यद्वा—क्षणदानां स्वसुखप्रदानाम्, आ साकल्येन, रागरचना प्रीतिरचना, तत्र चतुरासु। तुलाधारा वणिजः, तैः शून्यायां पण्यवीथ्यामिव दिवि; पक्षे—तुला राशिराधारो येषां ते चन्द्रादयः, तैः शून्यायाम्; तथा च माघः,—"अविभाव्यतारकमदृष्टहिमद्युतिविम्बनस्तमितभानु नभः। विगतोरुतापमतमिस्रमभादपदीषतेव विगुणस्य गुणः॥" इति, ("तुलाधारस्तुलाराशौ भवेद्वाणिजकेऽपि च" इति विश्वः)। घनं निबिडं, घटमानदलपुटासु पुटकिनीषु कमलिनीषु; राजादेर्योग्यस्यापदि विपत्तिनो विपक्षमपसारयति, सयोकाश्च स्वदारापिधानमाचरन्तीति लोकव्यवहारो ध्वनितः, "इरताल" इति भाषायां, ("नालीकिनी पुटकिनी विसनालिश्च पद्मिनी" इत्यमरः)। कमलसरस्सु तिमिरप्रतिहस्तकेष्विवेतस्ततो भ्रमरेषु परिभ्रमत्सु, ("प्रतिहस्तोऽपरहस्तकः") "गुमास्ता" इति भाषायाम्; [संज्ञायां कन्]

मिव प्रकृष्टतारकं, भारतसमरमिव वर्द्धमानोलूककलकलं, धृष्टद्युम्नवीर्य्यमिव कुण्ठितद्रोणप्रभावं, नन्दनवनमिव सप्तपरलौकिकं, कृष्णवर्त्मेवाखिलकाष्ठापहारकं, सगर्भमिव घनतरपाषाणकर्करासु गिरितटीषु, सचक्षुरिव सिंहनयनदीधितिच्छटाकपिलेषु सानुषु, सजीवमिव तमोमणिभिः, संवर्द्धित-

---

मालिन्येन साम्यात् प्रतिकृतीत्प्रेक्षणम्; प्रभौ परामृते षड्डः परकलत्रादीन् समया स्वभृत्यान् लक्ष्मीनिघृणया प्रेषयत्येवेति लोकप्रसिद्धौ श्लिष्टः। रविविरहविधुरास्वत एव विकलकुररीरुतच्छलेन पक्षिविशेषग्रहणमिषेण, विषण्णलोष्विव सरोजिनीषु। गणके इव दैवज्ञे इव, नक्षत्रसूचके ग्रसाद्यमक्षार्थोपयोग्यस्मित्यादिनक्षत्रसूचके; पक्षे—नक्षत्राणि तारा:, तत्सूचके द्योतके, प्रदीपे, ("दैवज्ञगणकावपि" इत्यमर:)। इरस्य कण्ठकाण्डं गलस्तम्भ:, तत्काशिमसदृशानि। दैत्यसदृशमिव प्रकृष्ट: श्रेष्ठ:, तारको दैत्यविशेषो यत्र; ("काण्डं वाचरे वार्षे नाले स्कन्धे च प्राखिनाम्। स्तम्बे रटसि च" इति धरणि:) पक्षे—प्रकृष्टास्तारका भौमादिनक्षत्राणि यत्र, तथा च माघ:,—"सवितुस्त्विषाऽपि दृष्टेऽपि न य: स तमो तमोभिरधिगम्य ततान्। द्युतिमयदीद्दगणो लघव: प्रकटीभवन्ति मलिनाश्रयत:॥" भारतसमरमिव वर्द्धमान उलूकश्च कृत्योधविशेषग्रकुनिपुत्रश्च, कलकलो यत्र; पक्षे—उलूका: पेचकाः, ("उलूक: कृकभेदेऽपि पेचके लक्ष्मभेदिनि" इति विश्व:) [सङ्ग्रामे प्रयोजनमर्थोद्यम इत्यण्]। धृष्टद्युम्नवीर्य्यमिव द्रुपदपुत्रवीर्य्यमिव, कुण्ठितो द्रोणस्याचार्य्यस्य, प्रभावो येन; पक्षे—कुण्ठितो द्रोणानां काष्ठानां, प्रभावो यत्र, (द्रोणो ना दग्धकाष्ठे स्यादम्बुवाहो गुरावपि" इति कद:)। नन्दनवनमिवेन्द्रवनमिव, सप्तपरण् लौकिक इन्द्रो यत्र; पक्षे—लौकिका उलूकाः, ("लौकिक: पेचके प्रज्ञे विज्ञानिके च लौकिक:" इति विश्व:)। कृष्णवर्त्मेवाखिलकाष्ठानामिन्धनानाम्, अपहारकम्; पक्षे—काष्ठा दिश:, तासामपहारकमाच्छादकम्; यद्वा—कृष्णवर्त्मानमिव दुराचारमिव, अखिलकाष्ठानामाखिलोल्कर्षाणाम्, अपहारकं नाशकं, ("कृष्णवर्त्मा पुनाग्नौ स्याद्दुराचारे विधुन्तुदे"। "काष्ठा दारुदारद्रायां कालमानप्रकर्षयो:। आदिग्नि ज्ञाननाशे च काष्ठमाख्यातमिन्धने॥" इति विश्वप्रकाश:)। सगर्भमिव सगर्वमिव, अधिकमिति यावत्, क्वचित् सगर्वमित्यपि पाठ:, घनतरा: पाषाणा: कर्करास यत्र तासु गिरितटीषु, "डाकुर" इति भाषायाम्। सचक्षुरिव सिंहनयनदीधितिच्छटाकपिलेषु सानुषु;

मिवाग्निहोत्रधूमलेखाभिः, मांसलितमिव कामिनीकेशपाश-संस्कारागुरुधूमपटलैः, उद्दीपितमिव घनतरलीनमधुकर-पटलमेचकितपेचकिकपोलतलदानधाराशीकरैः, पुञ्जीकृतमिव विततततमालमालाच्छायासु, लीयमानमिव कज्जलश्यामभोगि-भोगेषु, प्रावरणमिव रजनीपांशुलायाः, पलितौषधमिव हृद्ध-वारविलासिन्याः, अपत्यमिव रजन्याः, सुहृदिव कलिकालस्य, मित्रमिव दुर्जनहृदयस्य, बौद्धदर्शनमिव प्रत्यक्षद्रव्यमपह्नुवानं, तिमिरं व्यजृम्भत।

---

सुप्तसिंहेति पाठस्तु भ्रामकचाटुपेशितः। तमोमणिभिर्ज्योतिरिङ्गणैः, मशीवलिव, इतस्ततो भ्रमणादिति भावः, ("भ्रान्तोन्मेषखद्योतस्तमोमणिर्ज्योतिरिङ्गणः" इति व्याडिः)। अग्निहोत्रधूमलेखाभिः संवर्डितमिव। कामिनीकेशपाशसंस्कारार्थमगरु-धूमपटलानि तैर्मांसलो बलवान्, तद्दाचरितमिव, [ भिदादित्वाङ्गः ] ("बलवान् मांसलोऽस्थः" इत्यमरः)। घनतरं निबिडतरं, लीनानामुपविष्टानां, मधुकराणां पटलैर्मेचकितानां श्यामवदाचरितानां, पेचकिनां मयूराणां, कपोलतलदानधारा-शीकरैरुद्दीपितमिव, ("उल्लूके करिणः पुच्छ-मूलोपान्ते च पेचकः"। "काल-श्यामलमेचकाः" इति द्वयोरप्यमरः) प्रौढ़ीकृतः। विततानां या तमालमाला तच्छायासु पुञ्जीकृतमिव। कज्जलश्यामभोगिभोगेषु सर्पशरीरेषु, लीयमानमिव। रजनीपांशुलायाः रात्रौ कृष्णाभिसारिकायाः, प्रावरणमिव, ("स्त्रैरिणी पांशुला च स्यात्" इत्यमरः)। हृद्धवारविलासिन्याः पलितस्य जराकृतकेशशौक्ल्यस्य, औषधं तद्विवारकमिव, अस्यतमसे केशानां विशेषानुपलम्भादिति भावः, पलितं वेश्यानां जीविकाभङ्गहेतुरिति ता एव वर्णिताः, ("पलितं जरसा शौक्ल्यं केशादौ" इत्यमरः)। रजन्या रात्रेः, अपत्यमिव, तत उद्भूतत्वादिति भावः। कलिकालस्य सुहृदिव, सदाचारनाशकत्वान्मालिन्यस्य साम्यात् सुहृत्त्वम। दुर्जन-हृदयस्य मित्रमिव। बौद्धदर्शनमिव बौद्धशास्त्रमिव, प्रत्यक्षमपि चक्षुरिन्द्रियगोचरमपि, न तु परमाण्वादिवदतीन्द्रियं, द्रव्यमपह्नुवानं, सर्वं ज्ञानमयं जगदिति मन्य-मानाले—"सूर्याचन्द्रमसौ व्योम तारागणं वसुन्धरा। सरितः सागराः शैला-श्चित्तस्यैव विभूतयः॥" इति यत्तत्परिकल्पितमप्यर्थमन्वर्थयन्ति।

मुदितमिवातिमत्तमातङ्गमनोहरगण्डमण्डले, फलित-मिवातिमान्द्यबहलच्छटवितितमालतमालकानने, स्फुरित-मिवातिकान्तकान्ताजनघनतरकेशपाशसंहतौ, मिलितमिवेन्द्र-नीलमणिरश्मिभिः, अतिशयमांसलं तम इवावटतटाटवीषु, साटोपमिव स्फुटपाटवोत्कटप्रकटविशङ्कटकुटजविटपोत्कट-विनटितषट्पदालिषु, घनतरघोरघस्मरविषधरभोगभासुरं, मदभरमत्तदन्तिदन्तद्युतितर्जनजर्जरं तमः।

निशाकरारम्भसमये इव सङ्कुचत्कुवलयव्याजेन विरचिता-ञ्जलिपुटे नतिमति तमोतिमिरे क्षणेन च सन्ध्याताण्डवाडम्बरो-च्छलितमहानट-जटाजूट-कूटकुटिलविवर-विवर्त्तित-जह्नुकन्या-वारिधाराविन्द्व इव विकीर्णाः, दुर्द्धरधरणिभारभरभुग्नभोम-

---

अतिमत्तमातङ्गमनोहरगण्डमण्डले मुदितमिव हृष्टमिव। अतिमान्द्यबहल-प्रचुरितमालतमालकानने फलितमिव। अतिकान्तकान्ताजनघनतरकेशपाशसंहतौ स्फुरितमिव। इन्द्रनीलमणिरश्मिभिर्मिलितमिव। अतिशयमांसलं तमः घटा जाताः, तटा अटव्यश्च तदीयग्रामाश्च, ("घटः स्यात् खले गर्ते कूपे कुटकजोर्विनि" इति विश्वप्रकाशः)। स्फुटं पाटवं पटुत्वं, तेनोत्कटमुदग्रं, प्रकटा व्यक्ताः, विशङ्कटो महान्, यः कुटजविटपस्तेनोत्कटविनटितषट्पदालिषु साटोपमिव सावष्टम्भमिव; ("विकटः सुन्दरे भीमे विलासविकरालयोः" इति विश्वप्रकाशः। "विशङ्कटं पृथु बृहत्" इत्यमरः)। घनतरं घोरं भयानकं, घस्मरो भक्षकः, यो विषधरस्तस्य भोगः महासुरभि; ("घोरं भीमं भयानकम्"। "भक्षको घस्मरोऽस्रपः" इत्यभयव्याख्यानेऽमरः) ["सुरभिः कोविदे घृते"]। मदभरमत्तदन्तिदन्तद्युतितर्जनेन जर्जरं विच्छिन्नावयवं तमः; मदभरेण इति विशेषणं गजानां ताडनद्योतनाय, तच्च दन्तयोः सैक्ष्ण्याय।

निशाकरारम्भसमये चन्द्रोदयारम्भसमये, सङ्कुचत्कुवलयव्याजेन विरचिताञ्जलिपुटे इव, अत एव नतिमति नम्रे, तमोतिमिरे सति क्षणेन तारका व्याजलेक्ष्यन्ते। पूर्वं तमःप्रारम्भे ता एव वार्द्धिताः, इदानीं चन्द्रोदयप्रारम्भे इति न किञ्चिदसमञ्जसम्। जलाशयेषु साम्यं सुलभं, तत्राडम्बरः समारम्भः, तेनोच्छलिते महानटस्य जटाः, जटा-जूटस्य कूटकुटिलविवरे विवर्त्तिता या जह्नुकन्या गङ्गा, तस्या वारिधाराविन्द्वश्च

दिग्गजमातङ्गमण्डलकरपरिमुक्तशीकरच्छटा इव, अतिदवीयो-नभस्तलभ्रमणखिन्नदिनकरतुरगवान्तफेनस्तबका इव, गगन-महासरःकुमुदकाननसन्दहदायित्यः, विश्वं गणयता विधातुः शशिकठिनीखण्डेन तमोमसीश्यामेऽजिने इव नभसि संसार-स्यातिशून्यत्वाच्छून्यबिन्दव इव, विततो जगत्त्रयविजयविनिर्गतस्य मकरकेतो रतिकरतलविकीर्णलाजा इव, गुटिकास्त्रगुलिका इव पुष्पधन्वनः, वियदम्बराशिफेनस्तबका इव, रतिविरचिता गगनाङ्गणे आतर्पणपङ्काङ्कुलय इव, विकीर्णा व्योमलक्ष्मीहार-मुक्तानिकरा इव, चन्द्रचिताचक्राद्दात्यावेगव्यस्ताः कामकीकस-खण्डा इव, तिमिरोद्गमधूमधूमलसन्ध्याऽनलपरितप्तगगनमहा-

---

इव विकीर्णा विस्मृताः; ("ताण्डवं नटनं नाट्यम्" इत्यमरः। "ताण्डवं समारब्धे गजगर्जिततूर्य्ययोः" इति विश्वप्रकाशः)। दूरंधरणिभारभरसम्भ्रमोन्मादसं-मातङ्गमण्डलं समूहः, तत्करैः शुण्डाभिः, परिमुक्ताः शीकरच्छटाः बलवृथच्छटाः, ता इव, ("करो वर्षोपले पाणौ शुण्डाग्रथवरास्त्रयोः" इति विश्वप्रकाशः)। अतिदवीयो दूरं, नभस्तलं तव श्रमणेन खिन्ना दिनकरतुरगास्तेषां वान्तफेनस्तबका इव; ("दवीयश्च दविष्ठं च सुदूरे" इत्यमरः)। गगनमहासरसः कुमुदकाननसन्दहदायित्यः, तुल्यत्वा-दित्यर्थः। विश्वं गणयतो विधातुस्तमोमसीश्यामेऽजिने चर्मणीव, नभस्याकाशे, शशी चन्द्र एव, कठिनी खटिका, तस्याः खण्डेन शकलेन, रचिता इति शेषः, संसारस्यातिशून्यत्वात् नश्वरत्वेनेत्यर्थः, शून्यबिन्दव इव; ("कठिनी खटिकायां तु" इति विश्वप्रकाशः)। जगत्त्रयविजयार्थं विनिर्गतस्य मकरकेतोः कामस्य, रतेः प्रियायाः, करतलविकीर्णलाजा इव। पुष्पधन्वनो गुटिकास्त्रं "गुलेल" इति भाषायां, तस्य गुलिका इव, "गुरिया" "गोली" इति वा हयं भाषायाम। वियदम्बराशेः फेनस्तबका इव। गगनाङ्गणे रतिविनिर्मिता आतर्पणम् "आलिपन" इति भाषायां, तस्य पङ्काङ्कुलयः "चुट्की" इति भाषायां, ता इव, तत्सम्बन्धादा-तर्पणेनाङ्कौ रञ्जयित्वा कुड्यादि रञ्जयन्तीति सम्प्रदायः; ("आतर्पं च शौण्डिये विन्ध्यादालिप्यनेऽपि च" इति विश्वप्रकाशः)। विकीर्णा विक्षिप्ताः, व्योमलक्ष्मी-हारमुक्तानिकरा इव। चन्द्र एव चिताचक्रं तस्माद्दात्यावेगेन व्यस्ता इतस्तत उत्पतिताः, कामकीकसखण्डाः कामास्थिखण्डाः, ते इव, ("चिता चित्या चितिः स्त्रियाम्"।

स्यलोकटाहभृज्ज्यमानलाजानुकारिण्य इव तारका व्यराजन्त। ताभिः श्वित्रितमिव वियदशोभत। दीर्घोच्छ्रायरचनाकुलं सुश्लेषवक्त्रघटनापटु सत्कविवचनमिव चक्रवाकमिथुनमतीवाखिद्यत। कमलिनीवन-सञ्चरणलग्न-मकरन्दबिन्दुलुब्ध-मुग्ध-मधुकरमाला-शबलगात्रं, कालपाशेनेव मूर्त्तरामग्रापेनाक्रष्यमाणं, चक्रवाकमिथुनं विजघटे। रविविरहविधुरायाः कमलिन्या हृदयमिव द्विधा पपाट चक्रवाकमिथुनम्। आगमिष्यतो हिमकरदयितस्य पार्श्वं सञ्चरन्ती कुमुदिन्या भ्रमरमाला दूतीवालक्ष्यत। तारका-

---

"कोडं कुड्यमस्त्रि च" इति द्वयोरप्यमरः)। तिमिरमेव धूमसेन धूमलः क्षपलोहितः, सन्ध्येवानलो वह्निः, तेन परितप्तो गगनमहाकटाहस्येव कटाहस्तेव भृज्यमानलाजानुकारिण्यः, ("धूम्रधूमलौ क्षपलोहितः" इत्यमरः)। ताभिस्तारकाभिः, श्वित्रितं सञ्जातकुष्ठमिव, वियदराजत, ("कोढी सण्डलकं कुष्ठं श्वित्रः" इत्यमरः) श्वित्रितमिति पाठे—सञ्जातश्वित्रम। दीर्घोच्छ्रायो दीर्घपरिच्छेदः, तद्रचनया आकुलं व्याप्तम; यद्वा—दीर्घोच्छ्रायरचनानां कुलं गटं, श्लोभनः श्लेषोऽलङ्कारो गुणविशेषो वा, वक्त्रं कन्दोभेदः, तद्रचनापटु सत्कविसत्काव्यमिव; पक्षे—दीर्घोच्छ्रायस्य महोच्छ्रसनस्य, रचनया आकुलं व्याकुलम; सुश्लेषवक्त्रघटना श्लोभनः श्लेष आलिङ्गनं यत्र तादृशो, वक्त्रघटना मुखसंयोजनं, तत्र पटु चक्रवाकमिथुनमतीवाखिद्यत, ("आख्यायिका परिच्छेद आश्वासोच्छ्वासकावपि" इत्युत्तरतन्त्रम। "कुलं जनपदे गटे। सजातीयगणे गोत्रे देहेऽपि कथितं कुलम॥" इति विश्वप्रकाशः) "एकदेशैव वाक्येन द्वयोर्भञ्जनसंश्रयोः। सन्धेश्च यत्र शब्दस्य श्लेष इत्यभिधीयते॥" इति भोजराजः। "श्लिष्टसंसृष्टसंकीर्णम्" इति गुणप्रकरणे दण्डी। "वक्त्रं नाट्यास्त्रयो भ्रातासन्धेर्योऽनुष्टुभि ख्यातम्" इति केदारः। ("पटुस्तीक्ष्णेऽस्पष्टे दक्षे निष्ठुरे निर्दयेऽपि च" इति रुद्रः)। कमलिनीवनसञ्चरणेलग्नमकरन्दबिन्दुलुब्धा सक्ता, मुग्धा रम्या, मधुकरमाला यया शबलं चित्रं, गात्रं यस्य तत्। कालपाशेनेव मूर्त्तरामग्रापेण वा सम्यक्, यद्वा रात्रौ न मिलतस्तया क्रष्यमाणं चक्रवाकमिथुनं विजघटे विघटितम। रविविरहविधुरायाः कमलिन्या हृदयमिव चक्रवाकमिथुनं द्विधा पपाट, [घट पट गतौ]। कुमुदिन्याः पार्श्वं सञ्चरन्ती भ्रमरमाला यामिन्यस्तो हिमकरदयितस्य चन्द्रमसश्च, दूतीवालक्ष्यत, [सञ्चरन्ती-

व्याजादस्तङ्गतस्य दिवाकरस्य शोकादिव स्थूलास्रुबिन्दुभिः ककुभो व्यरुदन्। भास्वतो निजदयितस्य विरहादभिनवकिञ्जल्करात्रिव्याजेन मुमुर्छ इव नलिनी कोषहृदये जज्वाल। रविरश्मिभस्मितनभोवनमसोराशिरिव, स्मृतिवचनमिव परिहृतदिगम्बरदर्शनं, सद्यो द्राक्षितराजपट्ट इव, समुद्रप्रवाह इव, प्रावरमन्धकारं व्यजृम्भत।

क्षणेन च क्षणदाराजकन्यकाकन्दुकः, कन्दर्पकनकदर्पणः, उदयगिरिबालमन्दारपुष्पस्तबकाकृतिः, प्राचीललाटतटकुङ्कुमबिन्दुचक्राकारः, कनककुण्डलमिव नभःश्रियः, दिव्यवधूप्रसाधिकाहस्तस्रस्तालक्तकपटलमिव, गगनसौधकनककुम्भ इव, प्रस्थानकनककलश इव त्रिभुवनविजयविनिर्गतस्य मकरकेतोः,

---

त्यत्र तृतीयान्तेन योगाभावात "समस्ततीयायुक्तात्" इति नाम्नेपदम्]। अस्तङ्गतस्य दिवाकरस्य शोकात् ककुभस्तारात्र्याजेन व्यरुदन्। कमलिनी कोषहृदये भास्वतो निजदयितस्य विरहादभिनवकिञ्जल्करात्रिव्याजेन मुमुर्छ इव तृषानल इव, अज्वाल, ("मुमुर्छस्तु तृषानले" इति वैजयन्ती)। रविरश्मिभस्मितनभोवनस्य समीराशिरिव। स्मृतिवचनमिव वेदवाक्यमिव, परिहृतं दिगम्बरस्य बौद्धस्य, दर्शनं शास्त्रं येन तत्; पक्षे—दिगम्बरयोः दिगाकाशयोः, दर्शनं येन तत्, शार्वं शर्वसौघसम्बन्धि, [शैवकेन विवक्षायामण्। भवे तु इञ् स्यात्] एवं शार्वरस्य तमसो विशेषस्य इत्यादयो व्याख्याताः। तमो व्यजृम्भत।

क्षणेन रजनीपतिरुदयमाममाहित्यत्यः। क्षणदा रात्रिकन्या कन्दुको गेन्दुकः, ("गेन्दुकः कन्दुकः" इत्यमरः) "गेन्दा" इति "गालममुरिया" इति भाषायाम्। कन्दर्पस्य कनकदर्पणो मकरः, ("दर्पणे मुकुरादर्शौ" इत्यमरः) कनकपटं रक्तत्वेन साम्यार्थम्। उदयगिरेर्बालमन्दारपुष्पस्तबको रक्तमन्दारगुच्छकः, तदाकृतिः, ("स्याद्गुच्छकस्तु स्तबकः" इत्यमरः) बालपदमारुह्यातिशयार्थः। प्राचीललाटतटे कुङ्कुमबिन्दुचक्रवदाकारो यस्य, ("अथ कुङ्कुमम। कालेयजन्मरागिणिशुभम्" इत्यमरः)। नभःश्रियः कनककुण्डलमिव कर्णवेष्टनमिव, ("कुण्डलं कर्णवेष्टनम्" इत्यमरः)। दिव्यवधूनां प्रसाधिका तद्धस्तात् स्रस्तमधालक्तकपटलमिव

कन्दर्पकार्त्तस्वरतूणमुखकान्तितस्करः, प्राच्यशैलशिखराग्यप्ररूढ़-जपाकुसुमच्छविः, स्वच्छकुङ्कुमपिण्डपूर्णपात्रमिव निशा-विलासिन्याः, कुङ्कुमारुणैकस्तनकलश इवाखण्डलाशाङ्गनायाः, क्षीरसिन्धुरिव हरिणाधिष्ठितः, राम इव लक्ष्मणान्वितः, सुग्रीव इव तारापतिः, सुराजेव रक्तमण्डलः, उदयारुणमण्डलः, रजनी-पतिरुदयमासासाद। ततः कामिनीहृदयसङ्क्रामित इव, चकोराङ्गनानेत्रपुटपीत इव, रक्तकुमुदकोषलीढ़ इव, क्षीणतां क्षणदाकृतो जगाम रागः।

अनन्तरं शर्वरीव्रजाङ्गनाऽऽविष्कृतनवनीतस्वस्तिक इव, कुसुमकेतोः मुखच्छायामुद्रितमुकुर इव, श्वेतातपत्रमिव मकर-केतोः, दन्तपालिचक्रमिव वियन्महाऽसेः, श्वेतचामरमिव मदन-

---

गनेति स्पष्टम्। प्रस्थानकलकेति च। कन्दर्पस्य कार्त्तस्वरतूणमुखकान्तेः सुवर्ण-निषङ्गमुखशोभायाः, तस्करोऽपहारकः, तच्छेष्ठत्वादिति भावः, ("तूणीपासङ्ग-तूणीरनिषङ्गाः" इत्यमरः)। प्राच्यां भवः प्राच्यः शैलस्तच्छिखराग्ये प्ररूढ़ जपा-कुसुम तच्छविः, ["यूप्रागपा" इति यत्] ("ओड्रपुष्पं जपापुष्पम्" इत्यमरः)। स्वच्छकुङ्कुमेन पिण्डं सान्द्र, पूर्णपात्रमिव निशाविलासिन्याः, ("पिण्डं सान्द्रे बले काले तूलीऽपि परिकीर्त्तितम्"। "पूर्णपात्रं वस्तुपूर्ण-पात्रे वर्डायकेऽपि च" इति हैमोऽपि विश्वः) कुङ्कुमारुणैकस्तनकलश इवाखण्डलाशाङ्गनायाः इन्द्रदिगङ्ग-नायाः, ("आखण्डलः सहस्राक्षः" इत्यमरः)। क्षीरसिन्धुरिव हरिणा विष्णुना, अधिष्ठितः; पक्षे—हरिणेन। राम इव लक्ष्मणेनानुगतः; पक्षे—लक्ष्मणा चिह्नेन। सुग्रीव इव तारा तन्नामिका स्त्री; पक्षे—तारा नक्षत्राणि। सुराजेव रक्तं मण्डलमसमाद्यादिसमूहो यस्य; पक्षे—मण्डलं बिम्बम्। उदयेनारुणं मण्डलं बिम्बं यस्य सः। ततः कामिनीहृदये सङ्क्रामित इव। चकोराङ्गनाभिर्नेत्रपुटैः पीत इव। रक्तकुमुदकोषैर्लीढ़ इवास्वादित इव। क्षीणतां जगाम क्षणदाकृतो रागश्चन्द्र-मण्डलस्य क्षीणित्वम्।

अनन्तरं यदुपतिश्चन्द्रः, उज्जगाम। शर्वरी व्रजाङ्गना गोपी, तस्या आविष्कृतः नवनीतस्य स्वस्तिकश्चतुष्कमिव, "चौक" इति भाषायां, ("नवनीतं नवोद्धृतम्" इत्यमरः। "स्वस्तिको मङ्गलद्रव्ये चतुष्कपद्मभेदयोः" इति विश्वप्रकाशः)।

महाराजस्य, बालुकापुलिनमिव निशायमुनायाः, स्फाटिकलिङ्गमिव गगनमहातापसस्य, अण्डमिव कालारगस्य, कस्तूरिव नभोमहार्णवस्य, चैत्यमिव मदनारिदग्धस्य मकरकेतोः, चिताचक्रमिव कलङ्काङ्गारशबलं सङ्कल्पजन्मनः, गगनगामिगङ्गापुण्डरीकमिव, अम्बरमहार्णवफेनपुञ्ज इव, पारदपिण्ड इव कालधातुवादिनः, राजतकलश इव दूर्वाप्रवालशबलः, कन्दर्परथचक्रचारुः, अम्बरप्रासादस्य पारावत इव, उदयाचलशिखरचूडामणिरिव, ऐरावतलुप्तसिन्दूरकुम्भस्थलमिव, भग्नशृङ्गपुराणगोमुण्डखण्ड इव तारकाखेतगोधूमशालिनो नभःक्षेत्रस्य,

---

कुसुमकेतोर्मुखच्छायादर्शनो मुकुर इव। मकरकेतोः शुक्लातपत्रमिव। विधुमहाऽसिरत्नकोशखड्गस्य, [पालयतीति पालः, पाल रक्षणे, घञ्, अच इः] दन्तस्य गजदन्तस्य, पालीगजदन्तमयः कस्तूरिति यावत्। मदनमहाराजस्य शतपत्रामरमिव, ("चामरं तु प्रकीर्णकम्" इत्यमरः)। निशायमुनाया बालुकापुलिनमिव। गगनमहातापसस्य स्फाटिकलिङ्गमिव पूजार्थे स्फाटिकमयशिवलिङ्गमिव। काल एवोरगः कालोरगः, तथाण्डमिव। नभोमहार्णवस्य कस्तूरिव शङ्ख इव मदनारिणा शिवेन, दग्धस्य मकरकेतोश्चैत्यमिव, ("चैत्यमायतने बुद्धगृहे चाट्टयक्षादपि" इति विश्वः)। कलङ्काङ्गारः, यद्यपि "अङ्गारोऽलातमुल्मुकम्" इत्यमरः, साग्निकाष्ठमङ्गारः, "अङ्गारचुम्बितमिव व्यथमानमास्ये" इति प्रयुक्तं भवभूतिना, तथाऽपि निरग्न्यङ्गारस्य स्यामं काष्ठमिहाङ्गारपदेन विवक्षितं योग्यत्वात्, "कोइला" इति भाषायां, तेन शबलं चिताचक्रमिव सङ्कल्पजन्मनः; एतादृशार्थे गौडेषु च टीकायां "इङ्गाल"शब्दः प्रयुक्तः, "चितेन्धनेङ्गालमिवाग्रयः परः" इति)। गगनगामिगङ्गाया मन्दाकिन्याः, पुण्डरीकमिव सिताम्भोजमिव, यदेव धवलं तदेव वर्ण्यते। अम्बरं व्योमैव, महार्णवस्तत्फेनपुञ्ज इव। कालधातुवादिनः पारदपिण्ड इव। दूर्वाप्रवालशबलो राजतकलश इव, दूर्वाप्रवालेति कलङ्कशाब्दाय। कन्दर्परथचक्रचारुः। अम्बरमेव प्रासादो राजगृहं, तस्य पारावत इव, (गृहप्रकरणे "प्रासादो देवभूभुजाम्"। "पारावतः कलरवः कपोतः" इति द्वयोरप्यमरः)। उदयाचलशिखरचूडामणिः। ऐरावतस्य लुप्तसिन्दूरं रक्तसिन्दूरं, कुम्भस्थलमिव। श्वेतगोधूमैः, श्वेतत्वं तारकाशब्दाय, "काबिशी गोहूं" इति भाषायां, शालिनः शोभमानस्य, नभःक्षेत्रस्य भग्नशृङ्गः, भग्न-

मलयजपिण्डपाण्डुरराजतपात्रमिव सिद्धाङ्गनाहस्तस्थं, ग्रहपतिरुज्जगाम। यस्य पुण्डरीकं लोचनमधुकराणां, शयनीयसेकतमिव चित्तहंसानां, स्फाटिकव्यजनं विरहवङ्कीनां, श्वेतप्राणचक्रं मन्मथसायकानाम्।

अत्रान्तरेऽभिसारिकासार्थप्रहितानां प्रियतमान् प्रति दूतीनां ह्यर्थाः सेर्ष्याः सप्रपञ्चा विकारभङ्गुराः प्रवादा बभूवुः। तथा हि, अवस्त्रोक्तमात्मानं नाकलयसि तत्त्वतः? कान्त!

---

विषाणत्वं वर्तुलत्वार्थं, पुराणत्वमरहितः, गोमुण्डखण्ड इव, सीमानिर्माणार्थं रक्षार्थं वा चैवं गोमुण्डः समारोप्यते। सिद्धाङ्गनाहस्तात् स्वयं भट, मलयजेन वृक्षचन्दनेन, पिण्डं चूर्णम्, अत एवातिपाण्डुरं राजतपात्रं रौप्यपात्रमिव; यद्वा—मलयजपिण्डैर्घृष्टचन्दनगुटिकाभिः, पाण्डुरमित्यादि; उभयत्र मंग्रहणवर्णनं चन्दनपङ्कबिन्दवो गुटिका वा तारा विकीर्णा इति ध्वनयितुम्। लोचनमधुकराणां पुण्डरीकमिव; वर्तुलसंसितसाम्यार्थं विकासपर्यन्तमायतेव कुमुदम्, एवं पूर्वत्रापि। चित्तहंसानां शयनीयसेकतमिव शयनाङ्गसिकतामयदेव इव। विरहवङ्कीनां स्फाटिकव्यजनं, तत्स्पृष्टत्वादिति भावः, अत्र व्यजनं वर्तुलमग्रिमस्पृष्टकं विवक्षितं, "छित्तनी" इति भाषायाम्।

अत्रान्तरे मानिनीमानपाटनपटुकुमुदिनीकान्तोदयावसरे, अभिसारिकासार्थप्रहितानां ज्योत्स्नाभिसारिकाकदम्बप्रेषितानां, दूतीनामन्योऽन्यसङ्कलनविरचनिवेदनादिकर्मकुशलानां, प्रियतमान् प्रति वल्लभान् प्रति, ह्यर्था उपालम्भाऽऽक्रन्दनरूपार्थद्वयोपेताः, सेर्ष्याः उपालम्भे, विकारैर्मदनविकारजन्यावस्थाविशेषैः, भङ्गुरा मानावस्थायामिव न केवलं परुषा एवापि तु किञ्चित्स्वापराधस्मृत्या इत्यर्थः, आवर्जने इदम्; सप्रपञ्चा वक्रोक्त्यादिसंहिताः, प्रवादाः प्रकटवैदग्ध्याविग्निष्टा वादा, बभूवुः, ("रतार्थिनी तु सङ्केतं याति या साऽभिसारिका" इति रसरत्नहारः)। उपालम्भे प्रथमश्लोकेनमयेत्यादि स्वगुणं प्रकटयन्नाह, अवस्त्रोक्तं कोपीनावग्रहीतम्, [अनुदरा कन्येतिवदल्पतायाऽत्र लक्षणार्थं, उक्तं च—"तस्मादृश्यनमाधस्य तदश्वत्वं तदल्पता। अपाश्रस्त्व विरोधस्य लक्षणार्थाः षट् प्रकीर्तिताः॥" इति] आत्मानं तत्त्वतो नाकलयसि? न जानासि? यथा धनमुच्चया कामनमुच्चां मलनलक्ष्मीयो वसुपालितोऽपवाहितस्तथा तवापि का मतिर्भविष्यतीति वक्ति, आत्मानमित्यादि; यद्वा—

स्त्रीणां कृतं कामणादि कर्म, [ कृतनिति कर्त्रः कर्मणि क्तः ] ततस्तो नाकलयस्यत आत्मानमव रक्ष ; यद्वा कामसन्तप्तो आत्मानमवन रक्षन स मदुपभोगेनेति: मेरक इव परिश्रामितस्तथा त्वमपि भविष्यसीति त्रयोऽप्यात्मानमवेति ; स्पष्टं चेदमुपहारकर्म-चरिते ; ( "मृतकर्म तु कामणम" इत्यमरः ) वैद्यिकं मन्त्रदमभिधाय कृत्यात्मकं मन्त्राऽभिधत्ते—आत्मानं प्रत्यवतोऽथवा, [ अवेः कर्तरि च् ] मा यासो स्त्री अन्यद्वत्ता. तया कृतमवस्त्रीकृतं नीचनारीकर्म, भृङ्गकीटन्यायादात्मस्त्रीभावनात् त्वं स्त्रीव परेत्रांयसे इति गदति—अवेत्यादि, अवस्त्रीकृतं वधकर्मोक्तिरूपम्, आत्मानं तत्त्वतो नाकलयसि ; आवर्जने—खितत्त्वतो वडत्वाडेतोः, [ खिज् वर्जने, क्तः ] त्वमेव मम प्रिया नान्येत्यव गच्छ इति अपथकपपाठादित्यर्थः, [ खितत्त्वत इत्यत्र "झलो झलि" इति पाक्षिकसकारलोप इति तु जगडस्य प्रमाद एव, "अनचि च" इति तकारद्वित्वे रूपसाम्य बीध्यम ] अवस्त्रीभ्यो नीचस्त्रीभ्यः, कृतं पर्याप्तम, आत्मानं नाकलय मा जानीहि, मत्सख्येव त्वामभिलषते इति त्वं नीचनारीसङ्गो मा भूरिति भावः, ( "कृतं युगेऽपि पर्याप्ते विहिते हिंसिते फले" इति विश्वप्रकाशः ) कं सुख, सुखकारी, लयः संश्लेष आलिङ्गनं विलासो वा यस्य सः, न कलयोऽकलयः, न अकलयो नाकलयः, त्वमो मत्सख्या अन्यथा:, खितं वडं, स्त्रीकृतं स्त्रीभ्यः पर्याप्तम, आत्मानम, अव प्रीणय, मत्सख्या सह रतिं विधायात्मानं सन्तोषयेति भावः ; ( "कं मूर्धसुखवारिषु" इति। "लयो विलासे संश्लेषे" इति च विश्वप्रकाशः ) यद्वा—नाकस्य दुःखस्य, लयः संश्लेषः, सख्या यस्य, ( "अकं पापे च दुःखे च" इति विश्वः ) यद्वा—अथ वासुदेवस्य, वो वयोऽवः, तव स्त्री लक्ष्मीः, तया कृतं पर्याप्तम, अवस्त्रीकृतं लक्ष्मीपूर्णम, आत्मानं तत्त्वतो नाकलयसि ? जानासि चेत् कथं तां परित्यज्यान्यवासक्तो भवसि ? ( "अकारो वासुदेवः स्यात्"। "वयः-स्थले च वः प्रोक्तः" इत्येकाक्षरदयम ) "यमकश्लेषचित्रेषु वस्वोर्डलयोर्न भिद्" इत्यनु-शासनाद्वैदाभावेनावार्थान्तरवर्णनम ; यद्वा—खितत्त्वतो वडत्वाडेतोः, अर्थात् तया प्रेम्णा वडत्वादवस्त्रीकृतमात्मानं नाकलय, सा किल त्वां धनेनाप्यविष्यतीति व्यङ्ग्यम ; यद्वा—खितत्वादतो वस्त्वविशेषवडत्वात, स्त्रीकृतमात्मानं नाकलय, अव तत्समीपे गच्छ ; यद्वा—नाकस्येवाकाशस्येव, लयः संश्लेषो यस्य, निरवकाशस्येत्यर्थः, ( "आकाशे विदिवे नाकः" इत्यमरः ) यद्वा—केन सुखेन, लयो विलासः, तेन खितो वडत्वात्सम्बोधनम ; त्वमोऽन्यस्य स्त्री न, [ सर्वनाम्नोरन्यार्थकयोस्त्वत्वतो-स्त्वसिवन्तस्य पञ्चम्यन्तस्य प्रयोगो यथायथं बोध्यः ] यथा पतिव्रतया नान्यपतिः सेव्यते, एवं परावृत्या विदग्धेन सेवनीयेत्यर्थः, कृतं मिथ्याभाषणादिना हिंसितम,

प्रस्तर इव क्रूरोऽसि,न चाकर्षकचुम्बकद्रावकेष्वेकोऽसि,भ्रामको-ऽसि परम्। कितव! धर्मार्थान्यप्रयुक्तः क्षेपणिक इव मुधा

---

आत्मानमव द्योतय, सत्यसद्भावणात् तेजोऽभिवर्द्धिर्भायते इति तदाचरेति व्याख्यम; [कृञ् हिंसायाम्] यद्वा—के जले, स्वयो विलासः, तेन सितावगतः जलक्रीडा-विदितः, ("सितस्त्वसिते बद्धे सिता शर्करा" इति हैमः। "सितः समासे धवले विबन्धज्ञातयोरपि" इति विश्वप्रकाशः) यद्वा—नाके स्वर्गे, स्वयो विलासो येषां ते नाकस्वया देवाः, तद्वत् सितोऽवगतः; यद्वा—अवस्त्रोक्तं लज्जोद्दिसितम्, आत्मानं तत्त्वतो नाकलयसि? पूर्वं तयैव धनदासादिना सर्वस्वदक्षीयतासादादितः, इदानीं तामेवायासयसि? सा दरिद्राबध्या ते किं विस्मृता? इति व्याख्यम; कस्य जलस्य, स्वयो विलासो नीचगमनरूपः, तेन सितावगत नीचगमनप्रसिद्ध, स्त्रोक्तं स्त्रोद्दिसितम्, आत्मानमव; यद्वा—अकारो वासुदेवः, तेन तुल्यमव, इवार्थे वः, अव क्षप इव, स्त्रोक्तं स्त्रीपर्य्यायम्, आत्मानं तत्त्वतो नाकलयसि? अन्यानि: सह क्रीडां करोषि चेत कुरु, परन्तु मय्यप्याऽपि सह क्रीडां कुर्विति भाव, ("व वा यथा तथैवं साम्ये" इत्यमरः) यद्वा—सितत्त्वतो धवलत्वाद्धेतोरेव, क्षप इव स्त्रोक्तं स्त्रीपर्य्यायम्, आत्मानं नाकलय, तदीयशरीरवर्ण एव त्वच्छरीरे नास्ति, अयं तदीयशानर्घ्यमिति भावः; यद्वा—येन यशसा, सितत्वं तस्मात्, नाके स्वर्गे, स इवेन्द्र इव, स्त्रोक्तमात्मानमव, ("यज्ञो यः खचितः मिष्टेः"। "स इन्द्रः" इत्येकाक्षरकोषः) [("अव रक्षे गतौ कान्तौ पीतौ हतौ धृतौ श्रुतौ। प्राप्तौ क्षेपेऽर्थने वेशे भागे ऽङो पङ्क्ति वधे॥ स्वाम्यर्थेऽवगमे खाने क्तो" इति कवि-कल्पद्रुमः]। दूतीसंवादवाक्येषु-व्याख्यादिग्दर्शिता मया। अन्यथाकुल्यभीतेन कैतवं स्वधियाऽधिकम॥ हे कान्त! अस्य सुखस्य, अस्मो यस्मात्, प्रस्तर इव क्रूरोऽसि पाषाण इव कठिनोऽसि, निष्ठुरहृदयोऽसि, तथापि न चाकर्षको यस्मत्सकाशात् प्रत्युपनमपि लोहं निःसरति, अयस्कान्तमणिचुम्बको यस्मत्सकाशाल्लोहमुपनच्छति, सूर्यकान्तो वा सूर्यकरानिसदृश्यच्छायासम्पत्सादिसमादावग्निमुत्पद्यते, द्रावको यस्मत्सकाशाल्लोहं द्रवति, चन्द्रकान्तमणिर्वा स्वं द्रवति स चन्द्रकान्तो वा, भ्रामको यस्मत्सकाशाल्लोहं भ्रमति, स "गुरिया" इति ख्यातः, "पुनको द्रावकश्चैवाकर्षको भ्रामकस्तथा। एवंविधैस्तुः पञ्च-वस्तुभाः सन्त्यवनि ते॥" इति लोकेऽस्ते; कामकलालोभलेन यो नारीमाकर्षति स आकर्षकः, रतिलोभलेन यद्भवति स पुनकः, औषधविशेषयोगेन कुचादिमर्दनेन वा यः कठिनस्त्रीमिनों द्रावयति स

बाढिततरवारिस्त्वमसि। सखेदमिव मनसा चिन्तयसि दुर्लभं जनम्। सत्त्वसारचरितो यो रिपुमण्डलायतो निर्वृतिमुपेत्य तिष्ठति। स खलु वीरः प्रतिपक्षस्य यः सम्प्रहारतः कुञ्जरान्

---

टावक., एतेषु नैकोऽसि, परं केवलं, भामकोऽसि, अन्यमतो योऽन्यनारीं भामयति प्रतारयति, स भामक.; कस्य प्रसूंश्वरः, बली यस्मात् कान्तः, आकर्षको धनुरा-कर्षकः, दुष्प्रकः सैन्यप्रवेशयः, टावकः परसैन्यविद्रावणः, तैत्तिकः शैवः, अपि, भामकोऽस्मादीनाम्, अमे खड्ग्य, भामको वा; कान्त! मनोहर! न भक्तर इव क्रीडसि, प्रार्थितः सन्नपराधान् क्षमसे, आकर्षकत्वेऽटावको दीर्घो बाणो यस्य स कामः, तद्वटकोऽडितोय, अपि, भामको नारीचेतसाम्. ("एकोऽडितीयौ भेदे च"। "क्रूरो कठिनानिर्दयो" इत्यमरश्चापि विश्वः) धर्मार्थमन्येन केनचिद्धर्मिष्ठेन राज्ञा नागरिकादिना वा, प्रयुक्त आतरं विना आकस्मिकजनान् परदारे नयेति प्रेरितः, तैत्तिको नाविक इव, सुधा वृथा, बाढिततर वारि जलं येन तादृशः, अव स्वामिन एव धर्मो न नाविकस्यत्यर्थः; सुधा बाढिततरं वारि जलं येन वा, तदनुरूपनदशायामिति भावः, अतिस्वा संतरितदुस्तरामार्थं संस्थीकं, न तु तत्त्वकथनं, रसाभासापत्तेः; यद्वा—सुधा बाढिततरवारिः खड्गो येन; आकर्णने—कितव! विदग्ध! धर्मार्थं धर्मप्रयोजनं, सुधावा व्यर्थवनाः, बाढिता: प्रबला यस्य, अन्येन प्रबुधा, प्रयुक्तं प्रस्थादि, तरवणिको नाविकः, तरवारिः खड्गः, तद्वत् क्रूरः, धर्मार्थाडमंप्रयोजनात्, अन्येनाधर्मेण, प्रयुक्तः; यदा—त्रिवर्गे धर्मार्थान्यामन्यः कामः, तेन प्रयुक्तः, ("कितवो द्यूतकृत्त-विदग्धेषु निगद्यते"। "तरवारिमेतः खड्ग" इति धरणिश्चयम्। "सुधा तु निष्फले वृथा" इत्यमरः)। तृणी स्थिते पृच्छति—सखेद सकष्टं, मनसा दुर्लभमिव जनं नायिकाऽन्तरं, चिन्तयसि; सखे! मित्र! दमिव खण्डितमिव, अङ्गारे—सखे! दमिव कलमिव, दुर्लभं जनम्, ("दकार उच्यते कामः"। "द कमले बुधैः प्रोक्तं कुंदे दामे च दातरि" इत्येकाक्षरकोष उभयत्र। "दः मदे दोऽवदाते च दातरि ऋददानयोः" इति विश्वप्रकाशः)। स त्वसारचरितस्त्वत्यवहारः, या चरन्ति ता चर्याः, मण्डलस्यायं मण्डलायः कुलटा, रिपुभूता मण्डलायो रिपुमण्डलायः, तासु रतो रिपुमण्डलायतो निर्वृतिं सुखम्, उपेत्य तिष्ठति, [ अत्र चर कुटिलायां गतौ ] यदा—निर्गता वृतिरावरणं यस्यास्तां निरावरणां वेश्याम्; वीरनिन्दायां—रिपुमण्डलायतः शत्रुखड्गात्, निर्वृतिं सुखं, शत्रुणा खड्गे धृते स्वयं सुखी तिष्ठतीत्यर्थः, निर्वृतिं वेश्यादेरावरणं वा, भयादुपेत्य; अङ्गारे—

नयति। धृतोरुकरवालसञ्चयोऽपि परमकाण्ड एव सम्यतन् महापदं विग्रहेण लभते। राजसेन रहितो राजसे न रहितो

—सत्त्वेन गुणेन, सारचरितो यो रिपुमण्डलायतः शत्रुमण्डलायतः, निर्हतिं जीविकाम्; यद्वा—रिपुमण्डलायतः सपत्नीसमूहायतः, [सप्तम्यर्थे तसिः] निर्गता हतिरस्यपुरुषबालस्त्रवरणेच्छा यस्याः, मत्काशी तामुपेत्य तिष्ठति, ["वर्त्तमान-सामीप्ये" इति लट्] पूर्वमन्याः सपत्नीरनादृत्य त्वं तत्रामेवानुरक्तः स्थितः, इदानीं तथैव कर्त्तव्यं त्वयेति द्योतति, ("कौचेयको मण्डलायः करवालः कृपाणवत्" इत्यमरः। "मण्डलं देशसङ्घयोः" इति विश्वः। "निर्हतिस्तु सुखे जीव्ये अभावे अवयेऽपि च" इति धरणिः)। अपरा आह—स खलु वीरः शूरः, यः प्रतिपक्षस्य शत्रोः, सम्प्रहारतः कुञ्जरान् गजान्, नयति; यद्वा—वि विशेषेण, ईरयति, वीन् पक्षिणो वा, ईरयतीति वीरः, सम्प्रहारतो गमनात्, ("सम्प्रहारो रणे गतौ" इति हैमः) [ईर गतौ क्षेपणे च]; यद्वा—विशिष्टा इरा मद्यं यस्य मद्यप इति यावत्, ("इरा भूमिसुरावारि-भारतीषु प्रयुज्यते"। "कुञ्जरोऽनेकपे केशे धातक्यामपि कुञ्जरा" "वीरस्तु सुभटे श्रेष्ठे वीरो भल्लातरेऽपि च" इति विश्वप्रकाशश्लिष्टे) प्रतिगतः पक्षं प्रतिपक्षो बलं तस्य; यद्वा—प्रतिपक्षस्य सख्युः सहायस्य वा, ("पक्षो मासार्द्धके गेह-पार्श्वे साध्यविरोधयोः। केशादेः परतो हन्दे बले सखिसहाययोः॥ पतत्रे चक्षीरन्ध्रे च देहाङ्गे राजकुञ्जरे॥" इति विश्वप्रकाशः) यद्वा—वि विशेषेण, ईं कामम्, ईं लक्ष्मीं वा, राति-आदत्ते वीरः, ("ईकारः कथ्यते कामो लक्ष्मीरीकार उच्यते" इत्येकाक्षरकोषः) सम्यक् प्रकृष्टः, अत्युत्कृष्टः, हारो मुक्तादिमाला तान् सम्प्रहारतः, [द्वितीयार्थे तसिः] कुञ्जरान् केशान्, नयति, ("हारो मुक्तावली युद्धे" इति विश्व-प्रकाशः) यद्वा—सम्प्रहारतोऽत्युत्कृष्टरतियुद्धे, [सप्तम्यर्थे तसिः] ("खलु स्यात् प्रतिषेधेऽपि निश्चयेऽवधारणे" इति विश्वः)। अन्या आह—धृत उरुकरेण विशालहस्तेन, बालानां मृदुकेशानां, सञ्चयो येन; यद्वा—धृत उरुमंडान्, करवालस्य कृपाणस्य, सञ्चयो येन; यद्वा—ऊरुपर्यन्तौ करावूरुकरौ, ताभ्यां धृतो बालानां प्रतिपक्षलक्ष्मीकेशानां, सञ्चयो येन, आ-समन्ताद्गृहीत्यर्थः; यद्वा—धृत उरुकरेण भूरिराजभागेन, बालानामज्ञानां, सञ्चयो येन; यद्वा—धृत उरुकरेणोरु-करणां वा बालानां सञ्चयो येन; यद्वा—धृत उरुकरबालानां सञ्चयः, सुरतबन्धे, विग्रहेण शरीरेण कलहेन युद्धेन पक्षिग्रहणेन वा, महापदं महाज्ञानं महापत्तिं वा, प्रभुं प्रभुं, परमत्यर्थं वा, अकाण्डेऽनवसरे, परमकाण्डे उत्कृष्टावसरे वा, ("विपदी

ध्रुवम्। विशारदा विशारदाभ्रविशदा विशदात्मनीनमहिमा महिमानरक्षणक्षमा क्षमातिलक! धीरताधीरता मनसि भूतता-भूतता वचसि। साहसेन! साहसेन कमला कमलापराजिता-

युधि विस्तारे प्रविभानशरीरयोः" इति हैमः)। अथवा आह—राजसे रजोगुण-विकारे सति, अनरहितो मनुष्यानुकूल्यः, त्वं न राजसे, रहितो मनुष्या अनेर्वा खड्गः; [रह त्यागे क्र:] यद्वा—राजसेन [प्रशस्यवि] रजोगुणेन, रहितो नरहितो मनुष्यहितः, न राजसे ध्रुवम्; यद्वा—राजसः रजोगुणवत्यानः, इनरहितोऽप्रभुत्व, न राजसे, यतो रहितः प्रभुत्वा त्यक्तः, नरेषु हितो राजसे ध्रुवम्। ("ध्रुवं तु निश्चिते तर्के नित्ये ग्राम्यनेऽव्यये" इति विश्वप्रकाशः)। यमकालङ्कारः। अथवा आह—विगता शारदा सरस्वती यस्य तत्सम्बोधनं, धृष्टो वा चतुरो वा, ("विशारदो बुधे धृष्टे" इति विश्वप्रकाशः) स्त्रीविशेषणं वा, वि विशिष्टः, शारदोऽभ्रो मेघः, तद्विशदा निर्मलान्तःकरणा, विशन् प्रविष्टो भवन्, आत्मनीन आत्महितः, महिमा महित्वं यस्याः, मह उत्सवो येषां ते महिनः, तेषां मानरक्षणे सम्मानपालने, क्षमा, क्षमातिलक! पृथ्वीभूषण! भ्रान्तिविलक! धीः प्राप्तिप्रदर्शक! तव मनसि धीरता बुद्धिरता, सार्वकालिकीत्यर्थः, अधीरता भीतरता, वचस्यभूतताऽसत्यता, भुवि पृथिव्या-मता विस्तृता; यद्वा—धकारो वासुदेवः, तस्याऽभूतसत्ता सन्दर्भता; यद्वा—धर्मेण व्यवहारेण, मा लक्ष्मीः, सा तिलकमस्य; यद्वा—धनस्य विभोतलक्ष्य, मा लक्ष्मीः-तत्तिलक! ("धनः स्वर्णे तुषे चक्रे धनटव्यवहारयोः। आत्मजे पाशके चापम्" इति विश्वप्रकाशः) विशेषेण शारं हिंसां, ददातीति विशारदः, [शृञ् हिंसायां घञ्] महिमा धनन्ति प्राप्नन्ति ते माहिमाना मानधनाः, तेषां रक्षणक्षम! हे धीर! साक्षाद्रष्टः, धीरतास्तव मनसि तव वचसि भूतता सत्यता, भूतता पृथ्वीप्रख्याता। ("भूतं न्याये विभावादौ भूतं सत्योपमानयोः" इति विश्वः) विशारदाभ्रविशदा विशिष्टशरन्मेघस्वच्छा, निष्कपटहृदयेति यावत्, आत्मनि स्वविषये, विशिष्टं शं श्रेयः, यति विशदाः, [दो अवखण्डने] इनस्य सूर्यस्य, महिमा महत्त्वं यस्य तादृशस्त्वम। ("शं श्रेयसि सुखादरः स्यात्क्लिशे सौख्ये प्रकीर्तितः" इत्येकाक्षरकोषः। "शं वर्मणि शास्त्र शास्त्रिरि" इति विश्वप्रकाशः) [("आत्मनेविजनभोगोत्तरपदात् खः" इति खः] आत्मनीने। अथवा आह—सा मत्सखी, त्वामाह, हे सेन! सखे! प्रियतम! सा मनसाऽपि मान्यमनुचरतीति प्रतिज्ञाविशिष्टाऽहम्, आहसेन महतोद्यो-द्भटेन, कम्र सुखम्, मया आधारप्राप्तो, [मन मन्न धारणे पचाद्यच्] पराजिता

पराजिता। सा त्वदर्पणा दर्पणाकारविमलाशया अयाजविनिर्जितकिसलया सलयाङ्गुलिविभ्रमेण विभ्रमेण प्रतिगवाक्षं शलाकाविवरं विलोकयन्ती विलोकयन्ती। त्वया विना साविना

---

कमला लक्ष्मीर्यस्याः सा कमलापराजिता, [ आदितान्त्यादिः ] अत एवापराजिता अन्यस्त्रीभी रूपसुरतकौशलादिभिरपराभूता ; ( "पराजितपराभूतौ" इत्यमरः ) यद्वा—आहसेनेयडासेन, अपराजिता एतदभिधाना देवी, पराजिता पराभूता, कै मन्मथस्याः कमला शिरोमात्रिश्चविशिष्टा, सीमन्तकर्मण्यनभिज्ञेति यावत्, तादृशी कमला लक्ष्मीः ; यद्वा—माहसेनाभिसरत्वरूपेण, कमला लक्ष्मीः, तत्परा कमलापरा लुब्धेति यावत्, जिता, यया लुब्धा नाभिसरत्येवं धीरा मन्मथ्यभिसरतीत्यर्थः ; ननु कुरूपा सा केनापि नाद्रियते इति सा स्वतो धावति न तत्र मन्मथहेतुरित्याह—आहसेन सा प्रसिद्धा, कमला लक्ष्मीः, पराजिता, मन्मथ्येति शेषः ; सखीभावमाह —[ सा आदाने ] खातीति सा न सा अस्मा लुब्धा, कं सखम्, अपराजिता त्वया पूर्वं प्रोत्साहनाद्दीपिता ; [ राजृ दीप्तौ ] यद्वा—साहसेन आहसेन, युक्तेति शेषः, सा मन्मथी, कमला वरस्त्री, आकमला बहुसखीका ; ("कमला तु वरस्त्रियाम्" इति शाश्वतः ) [ रक इति "खनडहोर्का" इत्यप्-प्रत्ययान्तः ] यद्वा—यया परा कमला, पराजिता सा मन्मथ्याह, आ-हसेनेयडासयुक्तेन त्वया, जितमात्मानमाश्रित्यर्थः, कीदृशी ? सेवा समभूः, कमला लक्ष्मीर्यस्यास्सा लक्ष्मीदानभोगादियुक्ता, न त्वस्वामिकलक्ष्मीवहनभोगदोनेत्यर्थः। इतरा आह, त्वय्यर्पणमस्यास्त्वदर्पणा, दर्पणाकारो मुकुराकारः, आशयो यस्याः, अयाजेन वरकमलेन, विनिर्जितकिसलया जितनवपल्लवा, अङ्गुलिविभ्रमेणाङ्गुलिसचनेन, सलया सविलासा, ( "लयो विलासे मंक्षेपे साम्ये तौर्यत्रिकस्य च" इति विश्वप्रकाशः ) गवाक्षेषु शलाका लक्ष्मणामागमनप्रतिषेधाय प्रत्यूहाः काष्ठादिनिर्मिताः, तासां विवरं विवरं प्रति प्रतिगवाक्षशलाकाविवरं, विलोकयन्ती पश्यन्ती, विलोकवत् पथिकजनवत्, आचरन्ती विलोकयन्ती, यथा पथिकः पञ्चरशलाकाऽन्तरेण पश्यन्त्येवं साऽपि भवागमनं न वेति गवाक्षशलाकाऽन्तरेण पश्यति ; गवाक्षशलाकाऽन्तरदर्शनं परकीयालक्षीतकम् ; ( "स्यात्काकाऽपि मदनमारिकाशस्त्रयोः शरे । कुवे पञ्चरकाष्ठे च" इति विश्वप्रकाशः ) उक्तं च—" स्वानुरक्ता स्त्री परकीया निगद्यते। उत्तमावमभेदाभ्यां द्विविधेयं पराङ्गना॥ अलक्षितानुरागैषा स्त्रीयाऽन्योत्तमा मता। तद्विज्ञा लक्षणा ज्ञेया तद्देदा लक्षितादिकाः॥ प्रौढ़ाऽन्यसक्तामेतस्य द्विविधा द्विविधा मता। विदग्धाऽविदग्धा चेति

सायमनुभवन्ती दुःखानि। जीवनायक! जीवनाय क इह नाश्रयन्ति सुभगम्?। अन्यास्तावदासतां दासतां पुरतोऽहमेव भजामि मैवमतोऽमैवमतोऽस्तु। अञ्जसारतः सारतः किमपि

---

ऽनुशयानाऽथ खण्डिता। गुप्ता च कुलटा चेति षट्प्रकारोदिता वुधैः।" इत्यलङ्कारे रसरत्नहारे; यत्तु अपरकटपरपुरुषानुरागा परकीयेति तत्र, कुलटाया अभङ्गात्; उपालम्भपदे ऽञ्जनमासः, विभमेव मनसेन, ("स्याच्छलाद्याऽपि मदन सारिकाऽलयोः शरे। पक्षरकाष्ठे च" इति विश्वप्रकाशः)। इतरा आह, अविना मेघेण, त्वया विना सायं सायङ्काले, दुःखानि त्वद्वियोगदुःखानि, अनुभवन्ती तिष्ठति, तामनुसरेति व्यङ्ग्यम्; धीरेयं, "प्रियं सोत्प्रासवक्रोक्त्या मध्या धीरा दृढव्रुधा" इति रसरत्नहारः; अविना रत्नकेण, त्वया विना दुःखान्यनुभवन्त्यतः सायं सादम, अनुभवन्ती तिष्ठति; [अव रक्षणादौ, "सर्वधातुभ्य इनिः" इतीनिः। ङीऽन्तत्वकर्मणि, "अटोच:" इत्यत्वम्,"घासो युक्" इति युक्]। अथवा आह,जीवनायक! प्राणधारक! जीवनाय जलाद्यै, जलाद्यरणार्थमित्यर्थः, सुभगं शोभनपशुं त्वां, के नाश्रयन्ति? (भग-ऐश्वर्यमाहात्म्य-ज्ञानवैराग्ययोनिषु। पञ्चवीर्यप्रयत्नेच्छा-श्रीधर्मरविमुक्तिषु॥" इति विश्वप्रकाशः) अधीरोक्तिरियम्, "अधीरा परुषोक्त्या" इति रसरत्नहारः; यद्वारे—जीवनायक! मत्सखीप्राणेश! जीवनाय प्राणधारणार्थे, के जनाः, सुभगमैश्वर्ययुक्तं त्वां, नाश्रयन्ति? के इति पुंलिङ्गनिर्देशो यदि पुरुषाः स्वप्राणधारणार्थे त्वामाश्रयन्ति तर्हि स्त्रीणां का वार्तेति द्योतयितुम्। अपरा आह, अन्यया मत्सख्यतिरिक्तया, अलं विप्रलब्धसम्बोधनम्, अत एवाद! तस्यां क्रोधादसम्भाषक! अमतां परयोषा-दनभिज्ञानां, पुरोऽग्रे, दासतां दास्यम्, अहमेव भजामि, अतोऽमैवमतोऽमिवभावात्, मैवास्तु; ("अदो यदावदो यक्षा" इत्यमरः) यद्वा—अन्यैस्त्वदपेक्षयाऽन्यैः अङ्गारिभि-रलसत्वन्थिभिर्वा, अक्षा विप्रा, तया सह यदति तत्सम्बोधनम्; यद्वा—अन्याक्ष! अत एव दास! पुरोऽहमेव भजामीति तां दासतां पूर्वस्थितां मत्सख्या दासताम्, अव रक्ष; यद्वा—अन्याक्षेणान्यनारीपरित्यक्तेन, अवदा अभाषणकर्त्री, "निमांस्योज्झित-पुष्पदामनिकरे वा षट्पदानां रतिः?" इत्यहं सतामेव दासतां भजामीति; यद्वा—अवनमाद्यः, [घञ्] अन्याक्षानामावदा रक्षणकर्त्री, अन्यरक्षणेति यावत्, प्रीतिप्रदा वा क्षतिप्रदा वा; यद्वा—अयमहो मयन्द्रीऽक्षाक्षि अमि! [अम्बुदो नपुंसकानां मक्षोपो वा वाच्यः, "क्षापितः क्षाक्षि हे प्रभु!" इत्यत्र

कन्दर्पकं दर्पकं न तनोषि विशेषतोऽशेषतः स्थितमेव मरणम्। अठधियां शोधन! यशोधन! प्रेमदार्य्यामदार्य्यांशयोत्कटाक्षैः कटाक्षैराविर्भूतदास्यास्तदास्याः परिजनाः!। कमलाकृति-नारीणां कमलाकृतिनारीणां भवता मुखं न मलिनितम्?।

---

सम्बुद्धिरूपो यथा रामविरहातिशयपीयूषवल्लभा सर्वथा प्रशोभनत्वद्योतनाय नपुंसक-प्रयोगः) अन्याः प्राचिनः, तेभ्यो हितास्त्वा, ["तस्मै हितम्" इति यत्] सतामावहा, त्वयेति शेषः, अस्ता तिरस्कृता, दृशौ दासतां मम, कीदृशी? पुरो नगर्याः, मेव लक्ष्मीव, [दृक्तेर्विच्] हे अदाम्क्षेटक! अथापि पूर्ववत्, ("मः शिवश्चन्द्रमा वेधाः"। "दृक्षारम्क्षेटने मतः" इत्युभयत्रैवाक्षरलोपः) अन्या इतराः, तावदासतां तिष्ठन्तु, अहमेव पुरो दास्यं भजामि। अपरा आह, अयत्ता शेषेणाह, सारतो वदात, सा, तन्वी तव प्रियेति शेषः, त्वं रतः अक्तः, किमपि दर्पकं न तनोषि, किमुत्कटं, दर्पकं दर्पं, न तनोषि, विशेषतो विशेषात्, अशेषतो निःशेषात्, मरणं स्थितमेव, माधुर्ये गुणः, "मूर्द्धन् वर्गान्त्यगाः स्वर्गा षटवर्गा रषौ लघू। अक्तिसंयुक्तसिद्धौ तन्माधुर्य्यमिति सूत्रम्॥" इति काव्यप्रकाशे। परा प्राह, हे अठधियां जडबुद्धीनां, शोधन! यशसा अधन! बुद्धियद्धियशोधीन! उत्कटमनोज्ञम, अधि येषु तैः, कटाक्षैः प्रेमदार्य्य! सुखदारक्षीय! या त्वां क्रूरकटाक्षैरानन्दयति तस्यास्त्वं वश्य इत्यर्थः, अत एवामदार्य्यांशय! अदानीशाशय! अलं त्यक्तं, दास्यं यया तादृशी, आविर्भूतं दास्यं यस्मिन् तत्सम्बोधनं, पतितो जनान् अभिलक्षजनान्, अक्षति,तया कामंवादिना दृढप्रणयतया, तत्सम्बोधनम; आवर्जने—अठधियां जडबुद्धीनां, शोधन! शिक्षक! अतो यशोधन! प्रेमदार्य्य! केवलप्रणयवश्य! अतो मदार्य्यांशय! अल्पतामिप्राय! तदा मत्सख्या मानसमये, उत्कटाक्षैः कटाक्षैर्मंक्षुमन्यिभिः, अस्या अवश्याख्याः, परिजना अवदादयः, आविर्भूतदास्याः यस्मिन् काले तया मानः कृतो भवता च क्रूरकटाक्षैः सा दृष्टा, तदारभ्येवामदादयस्त्वत्परिजना अवश्यसेवकाः संवृत्ताः, एवं च स्थिरसेवकानामस्मदादीनां प्रार्थनया सा सुखप्रणयनीरक्षा सम्पादयितव्येत्यर्थः; यद्वा—उत्कटप्रकारैः; यद्वा—उत्कटभावैर्वोत्कटार्थैः; यद्वा—तदा भवत्कोप-काले, उत्कटाक्षैः क्रूरैः कटाक्षैरित्यादि पूर्ववत्, अत्र पक्षे सर्वथा तवैव दोष इत्यर्थः। काचिदाह, भवता अरीणां अन्यासां, कमलाकृतिनारीणां सत्यासांकृतिस्त्रीणां, कमलाकृति मुखं न मलिनितमिति न; यद्वा—कृतिना भवता अरीणां अन्यासां, कमला लक्ष्मीः, न मलिनिता न मलिनीकृता, कमलाकृति पद्माकारं, नारीणामन्यासां

विश्वस्य विश्वस्य व्यवस्था समासाद्यमसमासाद्यमनेककाल-सङ्गीतसङ्गी तनुषे तनुषेकमनङ्गमनङ्गपुष्पेषुपुष्पेषु कृजा तरसा जातरसा मन्दात्तमन्दा त्तणं भ्रमन्तो मुह्यति। कामधुरा-धरेण का मधुराधरेण मुक्ता रजोराजिविशेषकेण विशेषकेण मुखेन्दुना। तव हृदि लग्ना स्रदिमाकरेण करेण स्वेदबिन्दु-

---

ष्कवनारीणां, मुखं न मलिनितम् ? इति काकुः, [ "नपुंसकमनपुंसकेन"इति नपुंस-केकशेषः ] ("क्तौ कृयस्य इत्यपि" इत्यमरः ) यद्वा—कमलया लक्ष्म्या, कृतो तेन मदता चरीणां नारीणा कमलाकृति मुखं न मलिनितम ? काकुः पूर्ववत् ; यद्वा—कमलाकृतिम् ! पद्माकार ! निर्लेपत्वेन साम्य, लक्ष्मीकृयकृतिति वा सम्बोधनम् ; चारीणामा साकल्येनातिशठितया वैदग्ध्येन वा काऽपि नाम्नाम् द्राघयितुं पटुरिति प्रभुतापन्नानां, नारीणां कमलाकृति कमलरूप, मुख न मलिनितम् ? इति काकुः ; चलाकुरुपालम्भपरः। कामिदाह, विश्वस्य सर्वस्य, विश्वस्य विश्वासं कृत्वा, सा तव प्रिया, समा सलक्ष्मीका, विगता चवस्था मर्यादा वयो वा यस्या, आदितोऽसमा विषमा, त्वं तु साद्यमासादयोग्य, तनुषे शरीराय, ( "तनुः स्यात् तनुत्रा साहसम्" इति शब्दभेदप्रकाशः ) कमनीयस्नेहाञ्जने तनुषे आसिञ्चसं विश्वस्य सर्वस्य,जगतो मध्ये त्वया व्यवस्था समासादि असमं विषममसेव्यसमासा ई असमास इति वा, आद्यं प्रथमम्, अनङ्गो: कामस्य, सेकं कं सुखं, ( "पुष्पं विकासि कुसुमे स्त्रीणाञ्च रजसि स्मृतम्" इति विश्वः ) अनङ्गमशरीरं, पुष्पेषुपुष्पेषु कामशरेषु, तरसा वेगेन, जातरसा मन्दं मन्देवर्णं, भ्रमन्तो मुह्यति ; आवर्जने—ईडनङ्ग ! शोभन काम ! अनङ्गमसम्बद्धं, प्रति पुष्पेषुपुष्पेषुकृजा कामबाणरुजा, तरसा वेगेन, जातरसोत्पन्नानुरागा, मन्दात्तमन्दा सज्जामत्यरा, क्षणं भ्रमन्तो मुह्यति। धुरायां धरो धुराधरः, [ भागुरिमते टाप् ] कामं धुराधरस्तेनात्यन्तभारवाहकेन, अधरेण नीचेन, रजोराजिभिर्विशेषकं तिलकं यस्य तेन त्वया, विशेषस्य दाक्षाटेः श्रेष्ठो यत्र तेन मुखेन्दुनोपलक्षिता मधुरा रम्या मूर्तिः, का स्त्री, मुक्ता ? न काऽपीत्यर्थः, एतादृशनैसाद्श्यो बहवो उपभुक्ताः। समालङ्कारः, "समं यादृशनं यत्र द्योरप्यनुरूपयोः" इति लक्षणात् ; आवर्जने—कामस्य धूः कामधुरा, [ "सप्तम्यः" इति समासान्तः ] तथा अधरस्तेन मधुरः सुधाधिकत्वाद्यः, अधरोष्ठो यस्य तेन, सुधारजोराजिभिर्विशेषकं तिलकं यत्र तेन, एतन्निर्माणावसरे बहवो

पयोधरेण पयोधरेण वक्षःफलकास्यनेन जितानाविलकास्यनेन। कामदारुण! मदारुणनेत्रास्मरमयं रमयन्तं त्वामदयं मदयन्ती परमकमितारं परमकमितारं वाञ्छति। हारिणा हारिणा स्तनकुम्भेन हारिष्याच्चिरुचिहारिणा चक्षुषा हारिणा।

---

मुखेन्दवो निर्मितावेषु रम्यत्वादस्यैव प्रयोगः। अतो विधिनेति विशेषेण श्रेयो यस्य तेन मुखेन्दुनोपलक्षिता का चाऽपि स्त्री, वर्त्तते, श्रेयो यदत्र मत्सङ्गो ज्ञात्वा न चलति चेत् सामान्यरूपेणाभिधायेनं नेष्यामीति कृतप्रधानसखा इयमुक्तिः, ("समाधपक्तिलक चिबुकादि विशेषकम्" इत्यमरः)। इतरा आह, तव इदि कथा काऽपि वर्त्तते; अथवास्य चाकरणेन, दासोत्वं व्यक्तं, धरेव खेदबिन्दुभिः पयोधरो यस्यास्तेन, वक्षःफलकेऽयनं गमनं यस्य, पतिततत्वादित्यर्थः, तेन पयोधरेणोपलक्षिता चनाविलकास्यनेन जिता, श्यामवर्णत्वादित्यर्थः; अथवाऽने—यदिच अधरेच धरेच खेदबिन्दुपयोधरेण यच फलकवत्कास्यनं पूजनं, रम्यत्वं येन, जितमनाविलं स्वच्छं, कास्यनं येन, गौरत्वादिति भावः, तेन पयोधरेणोपलक्षिता, तव इदि कथा, काऽपि वर्त्तते इति पृच्छति; अस्ति चेत् तामनुसरेति व्यङ्ग्यम्; "चक्षमंसस्थिनो हस्तो पादौ काश्यपि कोमलौ" इति सामुद्रिकशास्त्रं तु पुरुषविषयम्। [षड् मतिपूजनयोः] ("कास्यं चन्यके हेम्नि" इति विश्वः)। अन्य आह, कामेनाभिधायेच, दारुण! मदारुणनेत्र! अस्मरमयमदयं रमयन्तं त्वां, परित्यज्येति शेषः, मदयन्ती मत्ता वा, परमकमितारं, परं दुःखं, इतारं प्राप्तवन्तं, परं मित्रम्, अस्मिन्मारमकामुकम्, ("परं पारे च रोगे च" इति विश्वः); अथवाऽने—कामेन मदेन दारुण! कठिनमारोपामप्यवज्ञया दारुण! मदस्यो रोषुसेवनात्, अत एवारुणनेत्र! कामदाभिधायक! अस्मरमयमदयं रमयन्तं परमकमितारं परमकामुकं, परमकं परमसुखम्, इतारं त्वां वाञ्छति; ("कामुके कमितामुकः" इत्यमरः) अतोऽपि क्षमाधारः। परा आह, हारिष्याऽस्मीऽयं युवतेः, पतिततत्वादिति भावः, अस्याः कामं ईक्षणास्वादनेनेत्यर्थः, इतादृशेन स्तनकुम्भेनोपलक्षिता, हे मर्त्त, वाञ्छति हारि, [हृ मतौ, चक्ष दः] हारिष्या मनसानेन, अत एवाविलचिहारिष्या ईक्षणनेत्राभिधायकारकेण, कुत्सितत्वादित्यर्थः, चक्षुषा चोपलक्षितं त्वामाह, एतादृशेनेक्षणेनाविलेनाहमाकेत्यर्थः; अथवाऽने—हारिष्याविलचिहारिष्या इतिकरणेनेः आविलहारिष्या चक्षुषोपलक्षिता, हारिष्या हारयता, हारिष्या हरिष्-

अनन्तरं दुग्धार्णवप्रविष्टमिव, स्फटिकगृहप्रविष्टमिव, श्वेतद्वीपनिवाससुखमनुभवदिव जगदामुमुदे। क्रमेण च विघटमानदलपुट-कुमुदकाननकोष-मकरन्द-विन्दु-सन्दोहमुदित मुग्ध-मधुकर-कुलकलरुतमुखरितदिगन्ते, चन्द्रिकापानभरालसचकोर-कामिनीभिरभिनन्दितागमने, सुरतभरपरिश्रमखिन्नपुलिन्द-राजसुन्दरीस्वेदजलकणिकाऽपहारिणि प्रयाति सायन्तने तनीयसि निश्वासनिभे नभस्वति कन्दर्पकेतुस्तम्भालिका-मकरन्दसहायो वासवदत्ताजनकनगरमयासीत्।

अथ कटकैकदेशविरचिताभ्रंलिहशिखरेण, सुधाधवलेन,

---

अवभक्तुग्धानुद्धारित्वाद्दुग्धेवेत्यर्थः, स्तनकुम्भेनोपलक्षिता, धनेन मत्सखी युवतिः मुन्दरा अवला प्रलोभिता चेति, सुगमि आम्बुनदम्। ("हा गर्हायामि निगद्यते" इत्येकाक्षर-कोषः)। निरीक्ष्य लोकव्यवहारज्ञां रीतिं कवीनामय कोषजालम्। व्याख्या मदीयं रचिता मदीयपादारविन्दे प्रणिधाय चेतः॥

चन्द्रिकाव्याप्तिं वर्णयति।—अनन्तरं चन्द्रोदयोत्तरं, दुग्धार्णवप्रविष्टमिव स्फटिक-गृहेषु प्रविष्टमिव श्वेतद्वीपनिवासस्य सुखमनुभवदिव जगद्भुवनम, श्रा साकल्येन, मुमुदे। [मुद हर्षे] क्रमेण च कन्दर्पकेतुस्तम्भालिकामकरन्दसहायो वासवदत्ताजनकनगरमयासीदित्यन्वयः। विघटमानं विकसत्, दलपुटं पत्रपुटं यस्य तादृक्, कुमुदकाननं तस्य कोषेषु मध्यभागेषु, मकरन्दविन्दुसन्दोहः पुष्परसविन्दुसमुदायः, तेन मुदितं हृष्टं, मधुकर-कुलं तस्य कलरुतेन मुखरितदिगन्ते, चन्द्रिका ज्योत्स्ना, तस्याः पानभरेणालस-चकोरकामिनीभिरभिनन्दितागमने सुखागमने, ("चन्द्रिका कौमुदी ज्योत्स्ना" इत्यमरः) सुरतभरपरिश्रमखिन्नाः पुलिन्दराजस्य म्लेच्छजातिविशेषराजस्य, सुन्दर्य-स्तासां स्वेदजलिकाऽपहारिणि सायन्तने सन्ध्याकालिके, ["सायंचिरम्" इत्यादिना ट्युः] तनीयसि क्षुद्रे, अत एव निश्वासनिभे नभस्वति वायौ, प्रयाति सति तम्भालिकामकरन्दौ सहायौ यस्य सः, [या प्रापणे, "यमरम" इति खच्]।

अथ वासवदत्ताजनकं दर्शयन्वयः। कटकैकदेशे राजधान्येकदेशे, विरचित-मभ्रंलिह शिखरं यस्य तेन। ["सहाये लिहः" इति खम्] ("कटः वर्षर्ये

एकान्तर-निविष्ट-कनक-मुक्ता-मरकत-पद्मराग-शकलेन, वासवदत्तादर्शनार्थमवस्थितदेवतागणेनेव प्राकारवलयेन परिगतम्; अनिलोल्लासिताभिः, नभस्तरुमञ्जरीभिरिव, तर्जयन्तीभिरिव गगनार्णवश्रियं, पताकाभिरुपशोभमानम्; कनकशिलापट्टाङ्कणप्रसृताभिः, कर्पूरकुङ्कुम-चन्दनेलालवङ्गगन्धोदक-परिमलवाहिनीभिर्वाहिनीभिः, अज्ञातत्तटस्फाटिकपट्टसुखनिषण्ण-निद्रायमाणप्रासादपारावताभिः, प्रभ्रश्यत्तटनिकटविटपिकुसुमस्तवकितसलिलाभिः, अनवरतमज्जदुन्मज्जदुन्मदयुवतिजनघनजघनस्खालनोच्छलच्छीकरनिकरस्रपितवेदिकाभिः, कर्पूरपूरविरचित-पुलिनतट-निविष्ट-निनदानुमीयमान राजहंसीभिः,

---

स्तानो राजधानीमितस्त्वयी:" इति विश्वः)। सुधा चूर्णाल्लेपविशेषः, तया धवलेन। एकान्तरं निविष्टानि कनकं सुवर्णं, मुक्ता मरकतं गारुत्मतं, पद्मराग एवा शकलानि यत्र। वासवदत्तादर्शनार्थमवस्थितदेवतागणेनेव प्राकारवलयेन प्राकारवलयेन, परिगतम्। ("प्राकारो वरणः शालः" इत्यमरः)। अनिलोल्लासिताभिर्नभस्तरुमञ्जरीभिर्गगनार्णवश्रियं तर्जयन्तीभिरिव पताकाभिरुपशोभितम्। ("पताका वैजयन्ती स्यात्" इत्यमरः)। कनकशिलापट्टाङ्कणेषु प्रसृताभिः, कनकयन्त्रविशेषैरिति भावः, "फोआरा" इति "अहर" इति वा भाषायां, "पाटङ्क" इति "परसार" इति भाषायां प्रसिद्धः। कर्पूरकुङ्कुमचन्दनेलालवङ्गानां गन्धो यत्र तादृगुदकं तत्परिमलवाहिनीभिर्वाहिनीभिर्नदीभिः। अज्ञाततटस्फाटिकपट्टेषु सुखेन निषण्णा अत एव निद्रायमाणाः प्रासादपारावता यासु, निश्चलत्वमज्ञाने निश्चलत्वं च निद्रा तस्या सुखोपवेशनं हेतुरिति कारणमालालङ्कारः। प्रभ्रश्यद्भिस्तटविटपिकुसुमैरुच्चयपुष्पैः, स्तवकितं गुच्छातलवकं, सलिलं यासाम्। अनवरतमज्जदुन्मज्जदुन्मदयुवतिजनस्य घनजघनास्खालनेनोच्छलच्छीकरनिकरेण स्रपिता आर्द्रीकृता, वेदिका वितटैः, प्रातृप्तादौ कृतमुपवेशनस्थानं यासिर्याभिर्वा ताभिः। ("स्यादितटिंस्तु वेदिका" इत्यमरः)। कर्पूरपूरेण विरचितं यत् पुलिनं तस्य तटे समीपदेशे, निविष्टा उपविष्टा, निनदैर्ध्वनिभिः, अनुमीयमाना राजहंस्यो यासु ताभिः; मानसोऽत्र पुलिनपदेन। अनुमानालङ्कारेणानुमानालङ्कारः, कर्पूरपुलिनपदेन तत्सदृशवालि-

विकचनीलोत्पलकानन-दर्शिताकाण्ड-चक्रवाक-तिमिरशङ्काभिः, युवतिभिरिव सुपयोधराभिः, सुग्रीवयुद्धकलाभिरिव कीलाल-स्रपितकुम्भकर्णाभिः, सागरकूलभूमिभिरिव सुन्दरीपादपराग-शबलाभिः, नवनृपतिचित्तवृत्तिभिरिव कुल्यापमानकारिणीभिः, अनेकतराभिरुपशोभितम्; शिखरगतमुक्ताजालव्याजेन पुर-युवतिजनदर्शनकुतूहलागतं तारागणमिवोद्वहद्भिः, उपान्त-निलीनाभिः काचकलशाकृतिमुद्वहन्तीभिः शिखिसंहतिभि-रुद्भासितैः प्रासादैरुपशोभितम्; क्वचिदनवरतदह्यमानकृष्णा-

---

मेघत्ववर्णनात् उदात्तालङ्कारोऽप्यत्र, तथाच दण्डी—"आशयस्य विभूतेर्वा यन्महत्त्व-मुत्तमम्। उदात्तं नाम तं प्राहुरलङ्कारं मनीषिणः॥" इति। विकचेत्यादि।—रक्तोत्पलपाठपक्षे—रात्रौ विकासासम्भवात्, नीलोत्पलपाठपक्षे—चक्रवाकाणामेव तिमिरशङ्कावर्णनानुपयोगादुपेक्ष्यम्। युवतिभिरिव तरुणीभिरिव। ["युवतिः" इति तिः] सुपयोधराभिः शोभनस्तनीभिः; पक्षे—धरतीति धरा, [पचाद्यच्] पयसो जलस्य, धराभिः। ("तरुणी युवतिः समे"। "स्तनाभ्यो पयोधरौ" इति हलीरुध्यमरः)। सुग्रीवयुद्धकलाभिरिव कीलालेन रक्तेन, स्रपितः कुम्भकर्णो राक्षसो याभिः; पक्षे—कीलालेन पयसा, स्रपितः कुम्भस्य जलभस्य, कर्णोऽग्रो याभिः; ("ओखितेऽम्भसि कीलालम्" इति पक्षधरोऽप्यमरः)। सागरस्य कूलभूमिभिरिव तीरभूमिभिरिव, सुन्दरीपादपानां रागैः शबलाभिः; पक्षे—सुन्दरीणां पादपरागे-रक्तरेणुभिः, शबलाभिः। ("सुन्दरी तरुभिन्नारी निदोः स्त्री रुचिरेऽन्यवत्")। नवोऽचिरप्राप्तराज्यपदः, नृपतिस्तस्य चित्तवृत्तिभिरिव कुल्यस्य कुले साधोः, ["तत्र साधुः" इति यत्] अपमानकारिणीभिः, पित्रादेरसाधादयः शिष्यत्वाश्रव्यत्वाहा नैनमतिमन्यते इति तेषामपमानः; पक्षे—कुल्यानां क्षुद्रिमाल्पसरितां, अपमानकारिणीभिः। ("कुल्याऽल्पा क्षुद्रिमा सरित्" इत्यमरः)। अनेकतराभिर्बहीभिः, उपशोभितम्। शिखरगतानां पक्षिप्रवेशद्वारार्थमुपरिबद्धानां, मुक्तामयानायानां, व्याजेन पुरयुवतिजनस्य दर्शनार्थं कुतूहलं कौतुकं, तस्मादागतं तारागणमिवोद्वहद्भिः। ("कुतुकं च कुतूहलम्"। "जालं समूहे जालायो गवाक्षखदिरास्त्रयोः" इत्यमर-माध्यमरः)। उपान्ते निलीनाभिर्निलयं लीनाभिः, सिक्थकतया स्थिताभिः, अत एव काचकलशाकृतिमुद्वहन्तीभिः शिखिसंहतिभिर्मयूरयूथैः, उद्भासितैः प्रासादै-

गुरुधूमपटलैर्दर्शितालजलदोदयम्; क्वचिदतिगम्भीरमुरज-रवाहूतमानन्दनर्त्तितनीलकण्ठम्; सायन्तनसमयमिव पतित-लोकलोचनम्; जनस्थानमिव दारोत्सुकरामम्; मानुषक-मिवाभिनन्दितसुरतम्; निधानमिव कौतुकस्य; वासमिव शृङ्गारस्य; कुलगृहमिव विभ्रमस्य, सङ्केतस्थानमिव सौन्दर्य्यस्य; वासवदत्ताभवनं भवनन्दनप्रभावो ददर्श।

द्रवसि द्रवसिद्धितो निगलिते!। चपला चपलायते

---

कपशोभितम्। क्वचिदनवरतदह्यमानकालागुरुधूमपटलैर्दर्शितमकाले जलदानां मेघानाम्, उदयो येन यत्र वा। यत एव क्वचिदतिगम्भीरमुरजरवाहूता: सानन्दं नर्त्तिता नीलकण्ठा बर्हिणो यत्र, रात्रौ मयूरनृत्यवर्णनं तिर्यञ्चोऽपि सर्वकालं सुखिन:, मनुष्याणां तु का कथा? इति ध्वनयितुम्। ("मदका मुरजा:"। "मयूरो बर्हिणो बर्ही नीलकण्ठ:" इति द्वयोरप्यमर:)। सायन्तनसमयमिव पतित: लोकलोचन: सूर्य्यो यत्र; ("किरणमालिविलोचनहेतय:" इति डाराबली) पक्षे—पतितानि स्त्रीसौन्दर्य्यावलोकनार्थं लोकानां लोचनानि यत्र। जनस्थानमिव दारेषु सीतायाम्, उत्सुको रामो राघवो यत्र; पक्षे—दारयतीति दार: कन्दर्प:, तेनोत्सुका रामा: स्त्रियो यत्र। ("सुन्दरी रमणी रामा" इत्यमर:)। मानुषकमिव मनुष्यसमूह इव, अभिनन्दिता श्लाघाविषयीकृता, सुरता देवत्वं येन; पक्षे—अभिनन्दितं सुरतं मैथुनं यत्र। कौतुकस्य निधानगृहं भाण्डागारमिव। शृङ्गारस्य वासगृहमिव, "पुंस: स्त्रियां स्त्रिया: पुंसि सम्भोगं प्रति वा सदा। स शृङ्गार इति ख्यात: कीर्त्यादि-रसकारणम्।" इत्युज्ज्वलनीलम्। विभ्रमस्य विलासस्य, कुलगृहमुत्पत्तिस्थानं, "कामोत्सुकत्वताकारं वपुर्यौवनसम्पदा। अनवस्थितचेष्टत्वं विभ्रम: परिकीर्त्तित:॥" इति भरत:। भवनन्दनस्य खार्त्तिकेयस्येव, प्रभावो यस्य स:।

इत्यनेनोक्तं ग्रन्थेन येन वत्सा:, प्रमदानामालापवत्ता: ग्रन्थेन कन्दर्पकेतु-संकरत्वेन सर्वं विजयमावर्त्तयम्, अकरोत्। द्रवसिद्धितो नमस्सिद्धित:, [सार्वविभक्ति-कस्तसि:] निगलिते! उक्तयोरेकाक्षरनिगलिते! द्रवसि [द्रु गतौ] यदस्य गमन-प्रयास उपकाराय फलत्वादिति लाक्षिदुपदधति; यद्वा—मया प्रेम्णा यद्यदसि तेऽसौ परित्यक्त आसीत्तुपाक्षम:; ("द्रवो विद्रवनर्मणो:। आसवे सरयलोक" इति

किमेषा ?। स्तबकस्तव कर्णतः पतितोऽयं सुरेखे !। सुरया चिता सुरयाचितश्रीस्त्वमसि मत्ता। कलहे ! कलहेमकाञ्चीदामकर्षिणेः स्मरमिवाह्वयसि। मलये ! मलयेप्सितं दृश्यैवाधिगताऽसि। कलिके ! कलिकेतुमिमां मुखरां मुञ्च मेखलां, शृणुमः कलवल्गकीरुतम्। मेखला मे खला न भवति,त्वमेव मुखरतया मुखरतया च। त्वपतेऽत्र पतेदियमवन्तिसेना कुसुमोपहारे

हैमः) यदा—निगलिते ! एतदभिधाने ! द्रवसिडितो द्रावकौषधिविशेषात, द्रवसि। "यद्यप्यष्टगुणः सारो निगदितः पुंसोऽङ्गनानां सदा नो याति द्रवतां तथाऽपि झटिति व्यायासिता सङ्गमे। तत् स्याद्विजलसम्प्रयोगविधिना सङ्क्षेपतो द्रावणम्॥" इति रामदेवः। यद्वोक्तं द्रवसीति तां लक्ष्मीकृत्याऽन्या प्रत्याह, एषा पुरोवर्त्तिनी, चपला चपलाभिधाना, किं चपलेव विद्युदिव, आचरति ? नाचेव गतार्थत्वादिति भावः; यदा—एषा चपला चञ्चला, किञ्चान्यच्च, पलायते ; [ इण् गतौ "उपसर्गेभ्यायतौ" इति लत्वं परारिफल्ल ] यदा—चपलेव विप्लवीव, आचरति, दृश्यमेवौषधिः सर्वथा द्रवतीति भावः। ("चपला कमलाविद्युत्पुंश्चलीविप्लवीषु च" इति विश्वप्रकाश इति दिक्)। हे सुरेखे ! तव कर्णतः स्तबकः पुष्पगुच्छः, अयं पतितः, त्वं न जानासि ? मत्ताऽसि ? इत्युपहासः। ("स्याद्गुच्छस्तु स्तबकः" इत्यमरः)। एनामेवोपहसति, सुरैर्देवैः, याचिता अर्थात् ब्रह्मणा वाञ्छिता योग्या, श्रीः सौन्दर्यधैर्यस्थास्तादृशी त्वं, सुरया मदिरया, चिता व्याप्ता तादृशी सती, मत्ताऽसि। हे कलहे ! कलेर्हेमकाञ्चीदामकर्षिणेः स्मरमाह्वयसीवाकारयसीव, पत्यतिरिक्तपुरुषाह्वानोत्प्रेक्षणमुपहासाय। एनामुपहसति, मलये ! तन्नामिके ! मे गिरे, लयो नाशो यस्य मलयः कामः, तदीप्सितं दृश्य, दृश्यैव दृष्ट्वैव, अधिगताऽसि, त्वं पुरुषं कटाक्षैरामन्त्रयसीति भावः ; ("अभीष्टेऽभीप्सितं इयम्" इत्यमरः) यदा—मः शिवः, लयो गर्भो यस्य मलयश्चन्द्रः, तस्येप्सितं कारणः तं, दृश्यैवाधिगताऽसि मङ्गलोचनाऽसीति भावः, ("मः शिवयन्द्रमा वेधाः" इत्यनेकार्थध्वनिमञ्जरी)। कलिके ! कलेः रतिकलहस्य, केतुं ध्वजं, यथा केतुना सेनादि द्योत्यते, एवमनया रतिकलहो द्योत्यते इति भावः, मुखरां वाचालां, मेखलां काञ्चीं, मुञ्च, त्यागे फलमाह, कलमव्यक्तमधुरं च, तद्वल्गुकीरुतं तत् शृणुमः। ("कलिः स्यात् कलहे सूरे कलिरल्पयुगे युधि" इति विश्वप्रकाशः)। उत्तरयति, मे मम, मेखला काञ्ची, खला पिशुना, न भवति, सुखेन प्रेष्ठेन, रतं यातीति सुखरतया; यदा—सुखेन वात्स्यायनाद्युक्तोपायेन, रतं यातीति सुखरतया; त्वमेव, सुखरतया;

Library Sri Pratap College
Srinagar.

मुग्धा। तव केतवैरलं, लवङ्गिके! वेपथुरेवाश्रयं व्यनक्ति। वहतीव हृतीरनङ्गलेखे! शरसायकानां तव वपुरक्षतम्। विद्धिताऽपि हिताय ते उत्कलिकामङ्गोर्मिः। वदने वद नेत्रपेयकान्तौ किमुपमानमिन्दुरप्युपयाति। वसतीव सतीव्रते! तव हृदि कोऽपि शतधा शतधारसारा वाचस्तवानुभूताः। कुन्तलिके! शरकाकरकालमेघखण्डतुलामयमुल्लसितोत्फुल्लमल्लिकामालभारी कुन्तलकलापः तव याति। केरलिके! पुरगोपुरगोचराः

---

तया वासवदत्तया, खलु। ("सुखसुपाये प्रारम्भे प्रेष्ठे निःसरणाव्ययोः" इति हैमः। "विष्णौ दुर्जनः खलः" इत्यमरः)। कश्चिदाह, मुग्धेयमवस्तिरेना वपते खञ्जते, यत्र कुसुमोपहारे पतेत्। [ वप्रावनायां खिड् ]। तां प्रत्याह, लवङ्गिके! केतवैरलं केतवसाध्यं नास्तीत्यर्थः, वेपथुरेव कम्प एव, तवाश्रयं व्यनक्ति सात्त्विकाविर्भावात् त्वमेव बभ्यसे मां किं वृथा वदसि? इति भावः; "कम्पः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः। वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका मताः॥" वनङ्गलेखे! तव वपुः [ कर्तृ ] शरसायकानां हृतीर्हननानि, [ हृञ् हिंसानयोः क्तिन् ] वहतीव वतोऽक्षतम्। उत्तरमाह, तेऽप्युत्कलिकामङ्गोर्मिः विद्धिता कृता, हिताय विरहकालाविष्कारादर्थात् ते हिताय कल्याणाय; यद्वा—उत्कलिकामङ्गोर्मिः विद्धिताऽपि हितवदाचरति हितायते; यद्वा—उत्कलिकामङ्गोर्मिः विद्धिताऽपि हि निश्चयेन, तायते स्तोकोपहासात् त्वां पालयतीत्यर्थः, [ तायृ सन्तानपालनयोः ] सन्तानः प्रबन्धः; यद्वा—विद्धिताऽप्युत्कलिकामङ्गोर्मिः [ कर्मकर्तृ ] तावति स्वयमेव विच्छिता भवति, हि प्रसिद्धौ; [ तनु विस्तारे, तनोतेर्यङीति विस्तारात्मम् ] यद्वा—उत्कलिकामङ्गोर्मिः विद्धिताऽपि हिता सती, [ हि गतौ वृद्धौ च ] पतते स्तोके गच्छति, प्रसृता भवति। हि नेत्रैः पेया कान्तिरस्य तस्मिन् वदने मुखे, किमिन्दुरुपमानमपि यातीति वद; पूर्वं त्वन्मुखमुपमानमिदानीमिन्दुरुपमानमपि यातीति वस्तुभावनं, मुखे विरहातिशयात् पाण्डुत्वाधिक्यद्योतनाय। उत्तरमाह, सतीनां व्रतमिव व्रतमस्यास्तत्सम्बोधनं, तव हृदये कोऽपि वसतीव, अतथा अतथाकारेण, अतथारोऽग्निः, तत्सारः वज्रपरुषः, तव वाचोऽनुभूताः। ("अतकोटिः खलः अग्नौ दम्भोलिरश्मनिर्द्वयोः" इत्यमरः)। कुन्तलिके! उल्लसितोत्फुल्लमल्लिकामालभारी तवायं कुन्तलकलापः शरकाया वर्षोपलानाम्, शाकुनो

श्रूयन्ते गीतध्वनयः, किमिव कल्पयसि ?। क्षणमीक्षणमीलना-
दपि चटुलं चटुलम्पटं सखीजनमायासयसि मुरालिके !।
स्तनता स्तनताड़नेषु यत् मौख्य तल्लब्ध स्मरता स्मरतापनोदनं
दयितेन दयितेन विमुक्ताऽसि किं मुह्यसि ? मुहतो मुहतो
हतमोहतमो दयितो दयितः स्मरति स्म रतिप्रियं तव
कौशलम्। नवनिशानखराणां नखराणां व्रणः स्मरजन्यां स्म
रजन्यां कुरुते ! न कुरुते रुजं किं ते ?। लोचनाभ्यां

---

यः बालमेघखण्डः तस्य तृष्णां माद्यं, याति प्राप्नोति, ("वर्षोपलस्तु करका" इत्यमरः) [बालमारीश्च "इष्टकेषीकामालानाम्" इति ह्रस्वः]। पुरस्य गोपुरं द्वारं, तद्गोचरा गीतध्वनयः श्रूयन्ते, ["गोपुर द्वारि पुरोधि केवर्ममुखकेऽपि च" इति मेदिनी) किमिव कल्पयसि ? किं वा गायसि ? अहं वा कथं कृते वेति किं कल्पयसि ? सर्वैः स्पष्टतयैव ज्ञायते इति त्वदर्थमेवेत्युपहासः। हे मुरालिके ! क्षणं ["कालाध्वनोरत्यन्तसंयोगे" द्वितीया] ईक्षणमीलनादृष्टिमीलनात, चटुलं चञ्चलं, आर्द्योऽनलसं, चटुलम्पटमपि प्रियवाक्यासक्तमपि, सखीजनमायासयसि त्वमपि विरहवेदनया मूर्च्छिताऽज्ञान् वेदयसीति भावः। दयितेनाभीष्टेन, स्तनता भणितं कुर्वता, सङ्केतार्थं पत्त्यादिशब्दं कुर्वता वा, स्तनमण्डलेषु सुरते चन्द्रकलानुरोधप्रातेषु, यत् स्मरतापनोदनं स्मरतापनाशकं, मौख्यं सौख्यं तत् स्मरताऽपि दयितेन पत्या, विमुक्ताऽसि, ("दयितः स्वामिकान्तयोः" इति धरणिः) पतादृश्येताहृशेन मुक्ता-ऽसीति को वेद तवापराधमिति ध्वनिः, अत एव वदति, किं मुह्यसि ? युक्तमेव कृतं पत्येवभिप्रायः; यद्वा—समाश्वासयति, किं मुह्यसि ? स त्वद्गुणबद्धत्वां न त्यक्ष्यति। पूर्वं वर्णितमपि गुणं तत्प्रत्ययार्थं पुनर्वर्णयति, मुहतो मुहीयसः, मुहतस्त्वटतिरूपात मुहोत्त्वात, हतमोहतमः हतो यथा कथाञ्चित्तविषानरूपो मोहो यस्य सः, तवोऽतिशये तमप्, दयितः कान्तः, दयितः पतिः, रतौ सुरते, प्रियं तव कौशलं स्मरति स्म स्मृतवान्। ["स्मृ सो" इति भूते लट्]। हे कुरुते ! नवं निशानं तेजनं, तेन खराणां नखराणां नखानां, व्रणः क्षतं, स्मरस्य जनो बधूः रतिस्तस्यां रतौ, स्मरं जनयतीति [कर्मण्यण्। "अनिदमोर्य" इति अडिनिषेधः, ङीप्] तस्यां कामोद्दीपिकायां वा, रजन्यां रात्रौ, रुजं पीडां, किं ते न करुते स्म ? [पूर्ववल्लट्। रुजु तेजने] यद्वा—अरेण जन्या कामेनोत्पादिता वा, रुजं, चन्द्रकलानुरोधेन

लोचनाभ्यां प्रीणिताखिलजनेक्षणदेशः क्षणदेशः किं न पीयते ? प्रियसखि मदनमालिनि !। बिम्बाधरसङ्गत्या सङ्गत्यागेच्छया विरागं कुरु मधुमदारुणमालवीकपोलतलसमानो लसमानो रक्तमण्डलतया लतया त्वया विशेषः कः ?। कुरङ्गिके ! कल्पय कुरङ्गशावकेभ्यः शष्पाङ्कुरम्। किशोरिके ! कारय किशोरकस्य प्रत्यवेक्षाम्। तरलिके ! तरलय कृष्णागुरुधूपपटलम्। कर्पूरिके ! पाण्डुरय कर्पूरधूलिभिः पयोधरभारम्। मातङ्गिके ! मानय मातङ्गशिशुयाचनाम्। अग्निलेखे ! लिख ललाटपट्टे

---

मखचतादयो नारीणां कामसुद्दीपयन्तीति स्पष्टं कामतन्त्रे, [ "भस्मगेय—" इति साधुः ] ( "लक्ष्मा माहेयशस्यायां लक्ष्मः स्याज्जनके पुमान्। विष्णावाद्यजनिर्वीरे" इति विश्वमेदिन्यौ। "स्त्री रुक् रुजा रोगतापः" इत्यमरः )। काऽपि मानिनीं प्रति कुलीन वक्ति, हे मदनमालिनि ! लोचनाभ्यां प्रीणितोऽखिलजनानां लोचनदेशो नेत्रदेशो येन सः, क्षणदेशश्चन्द्रः, किं न पीयते ? विश्वसङ्कारः, "सिद्धस्यैव विधानं यत् तामाहुर्विभ्रमक्रियाम्"। लोचनयोर्लोचनविधानं चन्द्रदर्शनेन साफल्यद्योतनाय, नाल्पतरागेयं स्वयमेव प्रियमनुनेष्यतीति भावः ; यद्वा—लोचनाभ्यां नेत्राभ्यां, प्रीणितोऽखिलजनेक्षणदेशः, क्षणदः सुखदक्षाखाबीजस्य स पतिः, लोचनाभ्यां किं न पीयते ?। रक्तमण्डलतया लसमानोऽत एव मधुमदारुणमालवीकपोलतलसमानः ; पक्षे—रक्तमण्डलतया अनुरक्तमण्डलतया, लसमानः शोभमानः, मालवीकपोलतलसमानता रक्तमण्डलतया, बिम्ब एव बिम्बवदा अधरस्तस्य सङ्गत्या लतया त्वया को विशेषः ? न कोऽपीत्यर्थः, अतः सङ्गत्यागेच्छया विरागं कुरु, यद्वा क्षणदेशः क्षीरबीजत्वेनाविरोधी लतयैवं नैकविधबालीकरक्षाबीजत्वेन क्षणदेशेन तवाप्यविरोध उचित इति भावः। कुरङ्गिके ! इत्यादीनि सखिसम्बोधनानि, कुरङ्गशावकेभ्यो हरिणशिशुभ्यः, शष्पं बालतृणं, कोमलं तदङ्कुरं, कल्पयोत्पादय, देहि, ( "स्यो कुरङ्गबालायुः"। "पृषतः शावकः शिशुः"। "शष्पं बालतृणं घासः"। "अङ्कुरोऽभिनवोद्भिदि" इति चतुर्वर्ग्यामरः )। किशोरकस्याश्ववालकस्य, प्रत्यवेक्षामवेक्षणम्। ( "बालः किशोरः" इत्यमरोऽश्वप्रकरणे। "अवेक्षा प्रतिपालनम्" इति च )। तरलय विस्तारय। काऽप्यतिविरक्ताकृष्णाऽऽह, कर्पूरिके ! कर्पूरधूलिभिः पयोधरभारं पाण्डुरय। अथाऽऽह, मातङ्गिके ! मातङ्गशिशुयाचनां मानय सफलीकुरु, पुनः पुनः

अग्निलेखाम्। केतकिके! सङ्केतय केतकीमण्डपस्य दोहदम्। शकुनिके! देहि क्रीड़ाशकुनिभ्य आहारम्। मदनमञ्जरि! मञ्जरय सभामण्डपकदलीगृहम्। शृङ्गारमञ्जरि! सङ्कल्पय शृङ्गाररचनानि। सञ्जीविके! वितर जीवञ्जीवकमिथुनाय मरिचपल्लवम्। पल्लविके! पल्लवय कर्पूरधूलिभिः क्रविम-केतकीकाननम्। सहकारमञ्जरि! सञ्जनय सहकारसौरभं व्यजनवातेन। मदनलेखे! लिख मदनलेखं मलयानिलस्य। मृणालिके! देहि मृणालाङ्कुरं राजहंसशावकेभ्यः। विलास-वति! विलासय मयूरकिशोरम्। तमालिके! परिमलय मलयजरसेन भवनवाटम्। काञ्चनिके! विकिर कस्तूरीदवं काञ्चनमण्डपिकायाम्। प्रवालिके! सेचय द्युसृणरसेन बाल-प्रवालकाननमित्यन्योऽन्यं प्रणयपेशलाः प्रमदानामालापकथाः शृण्वन् कन्दर्पकेतुमंकरन्देन सह विस्मयमकरोत्।

---

करचालनेन कुचौत्रत्यं कुम्भयोः प्राधेयत इति भावः। अग्निलेखे! ललाटपट्टे अग्निलेखां लिख, अरविभोविकाथैमिति भावः। केतकिके! केतकीमण्डपस्य दोहदं सङ्केतय जानीहि, अस्येच्छिद वा। ("दोहदो गर्भलक्षणे। अभिलाषे तथा गर्भे" इति हेमः)। शकुनिके! क्रीडाशकुनिभ्य आहारं देहि, ["घृसोरेऽविभ्योत्वाभ्यासलोपौ"]। मदनमञ्जरीत्यादि। शृङ्गारमञ्जरि! शृङ्गाररचनानि सङ्कल्पयोपादय। सञ्जीविके! जीवञ्जीवकाय मरिचपल्लवं वितर देहि, ("जीवञ्जीवश्चोरकः"। "मरिचं कोलकं कृष्णम्" इति हयोरप्यमरः)। पल्लविके! क्रविमकेतकीकाननं कर्पूरधूलिभिः पल्लवय। सहकारमञ्जरीति। मदनलेखे! मलयानिलस्य मदनावस्थामूर्च्छां लेखं, लिख। मृणालिके! इति। विलासवति! मयूरकिशोरं विशेषेण लासय नर्तय। ("किशोरस्तरुणे श्रेष्ठे" इति धरणिः)। तमालिके! मलयजरसेन चन्दनरसेन, भवनवाटं गृहमार्गं, परिमलय, ("वाटः पथय मार्गयोः" इति विकाण्डशेषः)। काञ्चनिके! काञ्चनमण्डपिकायां कस्तूरीदवं विकिर विक्षिप, [कृ विक्षेपे]। प्रवालिके! द्युसृणरसेन कुङ्कुमरसेन, प्रवालानां प्रकृष्टकेशानां, काननं समूहं, सेचय, ("कुङ्कुमं पीतकाविरं द्युसृणं कुसुमान्तकम्" इति शब्दावली)।

मनस्यहो! भवनानामतिशायि सौन्दर्य्यम्। अहो! शृङ्गार-कलाकेलिकौशलम्। तथा ह्ययं तत्कालालोलावहलविरलविमल-मालतीदशनकान्तिकान्तिदन्तिदन्तघटितो मण्डपः, असावपि कनकशलाकाविनिर्मितयन्त्रपञ्जरसंयतः क्रीड़ाशुकः इत्यादि परिचिन्तयन् प्रविश्य व्याकरणेनेव सरक्तपादेन, भारतेनेव सुपर्वणा, रामायणेनेव सुन्दरकाण्डचारुणा, जङ्घायुगलेन विराजमानां, छन्दोविचितिमिव भ्राजमाननितम्बां, नक्षत्र-विद्यामिव गणनीयहस्तश्रवणां, न्यायस्थितिमिवोद्योतकर-स्वरूपां, बौद्धसङ्गतिमिवालङ्कारभूषिताम्, उपनिषदमिवानन्दा-त्मकमुद्योतयन्तीं, द्विजकुलस्थितिमिव चारुचरणां, विन्ध्यगिरि-

---

प्रविश्य वासवदत्तां दर्शयत्यन्वयः। व्याकरणेनेव पाणिनिप्रोक्ताष्टाध्यायिरूपेणेव, "तेन रक्तं रागात्" इत्युपलक्षितः पादोऽध्यायतुरीयांशः, तत्सदृशेन; पक्षे—रक्तपादेन लोहितचरणेन सह सरक्तपादं तेन। भारतेनेव सुपर्वणा शोभनपरिच्छेद-युतेन; पक्षे—सुपर्वणा शोभनपक्षियुतेन। ("पक्षिणां पर्वपक्षौ" इत्यमरः)। रामायणेनेव सुन्दरकाण्डेन चारुणा; पक्षे—सुन्दरकाण्डवच्चारुणा। ("काण्डं वाणवरे वाणे नाले स्कन्धे च शास्त्रिणाम्। सङ्घे वर्गे च" इति धरणिः)। जङ्घायुगलेन विराजमानाम्। विन्ध्यगिरिस्थितिमिव सुनितम्बां सुन्दरकटकाम्; ("कटकोऽस्त्री नितम्बोऽद्रेः" इत्यमरः) पक्षे—शोभनकटिपश्चाद्भागां, ("पश्चान्नितम्बः श्रोणेच्याः" इत्यमरः)। छन्दोविचितिमिव भ्राजमाननितम्बां, नितम्बशब्दोऽयं छन्दः,—"स्त्री स्यान्नितम्बा"; पक्षे—भ्राजमानं नितम्बं यस्याः। नक्षत्रविद्या ज्योतिःशास्त्रमिव, गणनीयं हस्ती हस्तश्च, श्रवणं श्रवणश्च यत्र; पक्षे—गणनीयमत्युत्कृष्टतया हस्तश्रवणं यस्याः। न्यायस्थितिमिवोद्योतकर चाचार्य्यो न्यायवार्त्तिककृत्, तत्स्वरूपां तदात्मिकाम्; विज्ञानभैरवेऽभेदविवक्षाऽव विभुर्निव्याकरणमितिवत्, भेदविवक्षायां तु—उद्योतकरेण स्वरूपं यस्याः, उक्तानुक्तदुरुक्तविचारात्मता वार्त्तिकरूपता स्वरूपं यस्या प्रतिपादितरूपं, न तु खण्डितं यदनिष्टार्थः; पक्षे—उद्द्योतकरं प्रकाशकरं, स्वरूपं यस्याः, ("प्रकाशो द्योत आतपः" इत्यमरः)। बौद्धसङ्गतिमिवालङ्कारो धर्मकीर्त्तिकृतो ग्रन्थविशेषः, तेन भूषिताम्; पक्षे—अलङ्कारो भूषणं, तेन भूषिताम्। उपनिषदमिवेक्षमाणस्य-मदितीयं ब्रह्मानन्दम्, उद्द्योतयन्तीम्; तदुक्तम्—"आनन्दो ब्रह्मणो रूपं तच्च मोक्षे

श्रियमिव सुनितम्बां, तारामिव गुरुकलत्रतयोपशोभितां, शतकोटिमिव मुष्टिग्राह्यतनुमध्यां, प्रियङ्गुश्यामामखीमिव प्रियदर्शनां, ब्रह्मदत्तमहिषीमिव सोमप्रभां, दिग्गजकरेणुकामिवानुपमां, वेलामिव तमालपत्रप्रमाधितां, अश्वतरकन्यामिव मदालसां वासवदत्तां ददर्श।

अथ तां प्रीतिविस्फारितेन चक्षुषा पिबतः कन्दर्पकेतोर्जहार चेतनां मूर्च्छावेगः। तमपि पश्यन्ती वासवदत्ता मुमूर्च्छ। अथ मकरन्दसखीजनप्रयत्नलब्धसंज्ञौ तावेकासनमलञ्चक्रतुः।

ततो वासवदत्तायाः प्राणेभ्योऽपि गरीयसी सर्वविस्रम्भपात्रं कलावती नाम कन्दर्पकेतुमुवाच—"आर्यपुत्र! नायं विस्रम्भ-

---

प्रतिष्ठितम्" इति; पक्षे—एकमुत्कृष्टम्, आनन्दमाङ्गटम्। द्विजकुलस्थितिमिव चारु सुन्दरं, चरणमाचारो यस्यास्ताम्; पक्षे—चारु रम्यं, चरणं यस्याः, ("चरणोऽस्त्री वृक्षादौ मूले गोत्रे पदेऽपि च")। तारामिव ध्रुवस्थितिमाश्रयामिव, गुरुकलत्रतयोपशोभिताम्; पक्षे—गुरुकुक्षितयोपशोभितां, ("कलत्रं गोत्रभार्ययोः" इत्यमरः)। शतकोटिर्यष्टिमिव वज्रयष्टिमिव, मुष्टिग्राह्यो मध्यो मध्यदेशो यस्याः; पक्षे—मध्यमवलग्नं यस्याः, ("मध्यं चावलग्नं च मध्योऽस्त्री" इत्यमरः)। प्रियङ्गुश्यामासखीमिव प्रियदर्शनां तद्वामिकाम्; पक्षे—प्रियं दर्शनं यस्यास्ताम्। ब्रह्मदत्तमहिषीमिव सोमप्रभां तदभिधानाम्; पक्षे—सोमस्येव चन्द्रस्येव, सोमा रम्या वा, प्रभा यस्यास्तां, ("सोमो मनोहरे चन्द्रे" इति विश्वः)। दिग्गजः कुमुद्वत्करेणुकामिवानुपमां तदाख्याम्; ("करिण्योऽभ्रमुः कपिला पिङ्गलाऽनुपमा क्रमात्" इत्यमरः) पक्षे—अनुपमामुपमारहिताम्। वेलामिव समुद्रतीरभूमिमिव, तमालपत्रैः प्रमाधितामलङ्कृताम्; पक्षे—तमालपत्रं तिलकं, तेन प्रमाधितां, ("तमालपत्रं तिलकक्षितिद्रुमे" इत्यमरः)। अश्वतरकन्यामिव मदालसां तद्वामधेयाम्; पक्षे—मदेन यौवनजन्येन, आलसां मन्दगतिम्।

अथेति स्पष्टम्। मकरन्देन तत्कृतोपचारेण, सखीजनेन सत्कृतोपचारेण, सवाक्रमं लब्धसंज्ञौ तौ वासवदत्ताकन्दर्पकेतू, एकमभिन्नम्, आसनमलञ्चक्रतुः।

तत इति। विस्रम्भपात्रं विश्वासस्थानम्। आर्यपुत्रेति। "आर्यपुत्रेति सम्बोध्यः

कथाया अवसरः, ततो लघुतरमेवाभिधीयसे। त्वत्कृते याऽनया वेदनाऽनुभूता, सा यदि नभः पत्रायते, सागरो मेलानन्दायते, ब्रह्मायते लिपिकरः, भुजगराजायते कथकः, तदा किमपि कथमप्यनेकैर्युगसहस्रैरभिलिख्यते कथ्यते वा। त्वयाऽपि राज्यं भुञ्जितं, किं बहुना? आत्मा सङ्कटे समारोपित एव। एषाऽस्मत्स्वामिदुहिता पित्रा प्रभातप्रायायां रजन्यां यौवनातिक्रान्तिदोषशङ्किना हठेन विद्याधरचक्रवर्त्तिनो विजयकेतोः पुत्राय पुष्पकेतवे पाणिग्रहणेन दातव्येति। अनयाऽप्यालोचितमस्य, यदि अभ्यर्हितं जनमादाय तमालिका नागच्छति, तदाऽवश्यमेव मया हुतवहे प्रवेष्टव्यमिति। तदस्याः सुकृतवशेन महाभाग! इमां भूमिमनुप्राप्तः, तदत्र यत् साम्प्रतं, तत्र भवानेव प्रमाणम्" इत्युक्त्वा विरराम।

अथ कन्दर्पकेतुः सप्रश्रयमानन्दसागरलहरीभिराप्लुत इव,

---

पतिः पत्रीभवनेन वा" इति भरतः। त्वत्कृते त्वदर्थम्, अनया वासवदत्तया, या या वेदना अनुभूता सा सा यदि नभ आकाशः, पत्रवदाचरति पत्रायते, [ "उपमानादाचारे" इति क्यङ् ] पतिवैपुल्यार्थमिदमुक्तम्। सागरो मेलानन्दायते मसीपात्रायते, गाम्भीर्यार्थं चेदं, ( "मेलानन्दो मसीपात्रम्" इति हारावली )। लिपिकरो लेखकः, [ "दिवाविभा—" इति टः ] ब्रह्मायते, चिरजीवितार्थमिदम्। कथको वक्ता, भुजगराजायते भुजगश्रेष्ठशेषायते, योगशास्त्रप्रवेष्टृत्वेनान्तरभावाभिज्ञत्वार्थं, शब्दशास्त्रार्णवपारावारीयत्वेन बहुमुखत्वेन बहुधाऽभिप्रायाविष्कारकर्तृत्वार्थं, वैद्यकशास्त्राचार्यत्वेन विरहवेदनयाऽस्या इयमवस्था, न ज्वरादिजन्येति वक्तृताऽर्थं चेदम्; तथा चोक्तं—"योगेन चित्तस्य पदेन वाचा मलं शरीरस्य तु वैद्यकेन। योऽपाकरोत् तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि।" इति, तदाकल्पमप्यनेकैर्युगसहस्रैः कथ्यतेऽभिलिख्यते वा। सम्भावनाऽलङ्कारः, "सम्भावनं यदीत्थं स्यादित्यूहोऽस्य विषये" इति लक्षणात्। त्वयेत्यादि। पाणिग्रहणं विवाहः। अनया वासवदत्तया, आलोचितं चिन्तितं, यदभ्यर्हितं त्वत्सत्कं जनम्। हुतवहे वह्नौ, प्रवेष्टव्यं प्रवेशयितव्यम्। महान् भागो भाग्यं यस्य तत्सम्बोधनं, ("भागो भाग्येऽंशदेययोः" इति विश्वः)। साम्प्रतं युक्तम्। प्रमाणमुत्तरकर्त्तव्यतायामित्यर्थः।

अथ सखीवाक्यश्रवणोत्तरमानन्दसागरलहरीभिरापुतः कन्दर्पकेतुः

भुवनत्रयराज्याभिषिक्त इव, भीतभीत इव, वासवदत्तया सह सम्मन्त्र्य मकरन्दं वार्त्ताऽन्वेषणाय तत्रैव नगरे नियुज्य भुजङ्गेनेव सदागत्यभिमुखेन मनोजवनाम्ना तुरगेण तया सह नगरान्निर्जगाम।

क्रमेण च जाङ्गलकवलनाभिलाषमिलितनिःशङ्ककङ्ककुलसङ्कुलेन, अर्द्धदग्धचिताचक्रमिममिमायमानविकटकटतृणाचटुलकटपूतनोत्तालवेतालरवभीषणेन, शूलशिखरारोपितशङ्कितवर्णकर्णनासिकच्छेद-रुधिरपटलपतित-भाङ्कारि-भम्भरालीभारभरितभूमिभागबीभत्सेन, कटाग्निदह्यमानापटुचटचटन्नकरोटी-

---

भीतभीत इवानुभूतपुरुषसङ्गेयं मा कदाचिद्दिद्यां भूत्, तथा कृति रक्षभेदः स्यादिति सभय इवेत्यर्थः। सप्रश्रयं सविश्वासं, वासवदत्तया सम्मन्त्र्य मत्वा, कामचारानुज्ञां विधाय तया सह रतिं कृत्वेत्यर्थः, सम्पूर्वो मन्त्रि कामचारानुज्ञार्थकः। वार्त्ताऽन्वेषणाय मकरन्दं तत्रैव नगरे नियुज्य भुजङ्गेनेव सदागतिर्वायुः, तदभिमुखेन; पक्षे—सदा सर्वदा, गत्यभिमुखेन मनोजवनाम्ना तुरगेण तया वासवदत्तया सह, नगरान्निर्जगाम, दुर्गगमनादौ स्त्रीणामनधिकारात्, [अत्र "सहयुक्तेऽप्रधाने" इत्यप्रधाने तृतीया]।

क्रमेण शनैर्गमनवशेन निमेषमात्रादनेकशतयोजनं गत्वा विन्ध्याटवीं विवेशेत्यन्वयः। जाङ्गलकवलनाभिलाषेण मांसगन्धाभिलाषेण, मिलितं निःशङ्कं कङ्कानां पक्षिविशेषाणां, कुलं तेन सङ्कुलेन, ("जाङ्गलं जलदेशे स्याज्जाङ्गलं पिशितेऽपि च" इति विश्वः)। अर्द्धदग्धचिताचक्रे मिममिमायमान एतादृक् शब्दविशिष्टः, विकटो भयानकः, कटो मृतशरीरं, तृणाचटुलकटपूतनानामुत्तालवेतालानां रवेण भीषणेन, ("कटः समूहवर्त्मेऽपि तृणेऽपि मृतकेऽपि च" इति विश्वः)। शूलशिखरारोपितस्य शङ्कितवर्णस्य चोरस्य, कर्णनासिकेति [प्राग्वद्भावादेकवद्भावः] तच्छेदरुधिरपटले कर्णनासिकच्छेदनिर्गतरुधिरपटले, पतिता भाङ्कारिभम्भराल्यो भाङ्कारोऽव्यक्तशब्दः, तद्युक्ता भम्भराल्यो मक्षिकाः, ताभिर्भरितम् [इत्यजन्तो न तु क्रान्तः] पूरितं, तादृग्भूमिभागेन बीभत्सेन, ("घोरः शङ्कितवर्णश्च कुत्सितार्थः प्रकीर्तितः" इत्युत्तरतन्त्रम्। "भम्भरा मक्षिका ज्ञेया भम्भराली च सा मता" इति हारावली)।

टङ्कारभैरवरवेण, शूलपाणिनेव कपालावलिभस्मशिवावष्टिभूत-भुजगावरुद्धदेहेन, पुरुषातिशयेनेवानेकमण्डलक्रतसेवेन, श्मशान-वाटेन गत्वा निमेषमात्रादेवानेकशतयोजनं प्रलयकालवेलामिव समुटितार्कसमूहां, नागराजस्थितिमिवानन्तमूलां, सुधर्मामिव स्वच्छन्दस्थितकौशिकां, सत्पुरुषसेवामिव बहुश्रीफलाढ्यां, भारत-समरभूमिमिव दूरप्ररूढ़ार्जुनां, पुलोमकुलस्थितिमिव सहस्र-नेत्रोचितेन्द्राणिकां, शूलपाणिचित्तवृत्तिमिव फलितगणिकारिकां, सज्जनसम्पदमिव विकसिताशोकसरलपुन्नागां, शिशुजनलीला-

---

कटाग्निरुद्धवाग्निः, तेन दह्यमानापटुचटचटशब्दकरोटिमंसुग्रथिगोऽपि, तस्मादट्टारेव भैरवरवेण भयानकशब्दविशिष्टेन, ("शिरोऽस्थनि करोटिः स्त्री" इत्यमरः)। शूलपाणिनेव शिवेनेव, कपालावलीत्यादि, शिवा गौरी, पक्षे—क्रोष्ट्री। पुरुषेषतिः-शयो यस्य स महाराजः, तेनेवानेकमण्डलं राष्ट्रम्; पक्षे—च, तत्कृतसेवेन। प्रलय-कालवेलामिव समुदितोऽर्कसमूहः सूर्यसमूहो यस्याम्; पक्षे—अर्कौ हस्वविशेषः, ("अर्कोहवसुकास्फोतः" इत्यमरः) "मदार" इति भाषायाम्। नागराज-स्थितिमिवानन्तः शेषः, मूलमादिकारणमस्याः; पक्षे—अनन्तानि मूलानि यस्याम्। सुधर्मामिव देवसभामिव, स्वच्छन्दं स्थितः कौशिक इन्द्रो यस्याम्; पक्षे—कौशिक उलूकः। सत्पुरुषसेवामिव बहुश्रीयुक्तैः फलैराढ्याम्; पक्षे—श्रीफलो बिल्वः। ("बिल्वे शाण्डिल्यशैलूषौ मालूरश्रीफलावपि" इत्यमरः)। भारतसमरभूमिमिव दूरप्ररूढो-ऽर्जुनः पार्थो यस्याम्; पक्षे—अर्जुनो हस्वविशेषः। ("इन्द्रद्रुः ककुभोऽर्जुनः" इत्यमरः)। पुलोमकुलस्थितिमिव सहस्रनेत्रायेन्द्राय, उचिता योग्या, इन्द्राणी यत्नी यस्याम्; ["नप्तृनप्त्र" इति ऋप्] पक्षे—सहस्रनेत्रैः सहस्रमूर्त्तेः, उचिता योग्या, इन्द्राणी प्रतावरी। ("चाटुधारा महेन्द्राणी शक्राणी जयवादिनी" इति रभसः)। शूलपाणी वेश्यापाणी वेश्यिको वा, तच्चित्तवृत्तिमिव फलिता सफला, वेश्यिकेभ्यो धनलाभात् सुरतसुखलाभाद्वा, गणिकानां वेश्यानाम्, चारित्र आगतिरागारकं वा यस्यास्ताम्; [ऋ गतौ वार्त्तयनिर्देशे ण्वुल्, ऋदिः। अथान्तरे चाऽऽगमः। "अन्यत्रस्यात्—" इतीकारः] पक्षे—गणिकारिका हस्वविशेषः, ("श्रीपर्णमग्निमन्थः स्यात् कणिका गणिकारिका" इत्यमरः) जयपर्णं इति प्रसिद्धः। सज्जनसम्पदमिव विकसिता हृष्टाः, अशोकाः शोकरहिताः, सरला ऋजवः, पुष्पा नागा इव पुन्नागाः पुरुषश्रेष्ठा यस्याः इतीयर्थकौ